रेभः । जरिता । कारुः । [14]नदः । [15]स्तामुः । कीरिः । गौः । सूरिः । नादः । छन्दः । स्तुप् । रुद्रः । कृपण्युरिति त्रयोदश स्तोतृनामानि (रेभः । जरिता । कारुः । कीरिः । तामुः । सूरिः । रुद्रः । नदः । नादः । छन्दः । स्तुत् । गौः । कृपण्युरिति स्तोतृणा[16]म्) ॥ १६ ॥

यज्ञः । वेनः । [17]अध्वरः । मेधः । विदथः । [18]नार्यः । सवनम् । होत्रा । इष्टिः । देवताता । मखः । विष्णुः । इन्दुः । प्रजापतिः । [19]घर्म इति यज्ञस्य । [घर्म इति पञ्चदश यज्ञनामानि] ॥ १७ ॥

---

१. पणायते Roth.

२. पियुक्षाः BK 2.

३. मेधः X; BK 2.

४. ऋपुः BK 2.

५. कवि M 2, M 3, W 1, W 2, W 3, BK 2.

६. मनीषिः Bib. Ind.

७. विपः is omitted by M 2, M 3, W 1, W 2, W 3, विधाता and विपः omitted by BK 2.

८. विपन्युः X, BK 2.

९. आकेनिपः । केनिपः । X, BK 2.

१०. अरधातयः M 1; अद्धातयः BK 2.

११. मनुष्याः ग.

१२. मेधाविन......०नाम् X.

१३. [वाघत......नामानि] Y.

१४. नादः M 1.

१५. तामुः ग. C. D. F.

१६. Words within brackets are the text of the shorter recension.

१७. मेधः । नायी । अध्वरः । विदथः । M 2, M 3, W 1, W 2, W 3, BK 2.

१८. नायी M 2, M 3, W 1, W 2, W 3; नारी ग.

१९. धर्म...यज्ञस्य X; [धर्म......नामानि] Y.

भरताः[१] । कुरवः । वाघतः । वृक्तबर्हिषः । यतस्रुचः । मरुतः । सबाधः[२] । देवयव[३] इत्यृत्विजाम् [देवयव इत्यष्टावृत्विङ्नामानि] ॥ १८ ॥

ईमहे । यामि । मन्महे । दद्धि[४] । शग्धि । पूर्धि[५] । मिमिड्ढि[६] । मिमीहि । रिरिड्ढि । रिरीहि । पीपरत् । यन्तारः । यन्धि[७] । इषुध्यति । मदेमहि । मनामहे । मायत इति [सप्तदश[८]] याच्ञाकर्माणः ॥ १९ ॥

दाति । दाशति । दासति । राति । रासति । पृणक्षि[९] । पृणाति[१०] । शिक्षति । तुञ्जति[११] । मंहत इति [दश[१२]] दानकर्माणः ॥ २० ॥

परि स्रव[१३] । पवस्व । अभ्यर्ष । आशिष इति [चत्वारः[१४]] अध्येषणाकर्माणः ॥ २१ ॥

स्वपिति सस्तीति द्वौ स्वपितिकर्माणौ ॥ २२ ॥

कूपः[१५] । कातुः[१६] । कर्तः[१७] । वव्रः । काटः । खातः । अवतः । [१८]क्रिविः । सूदः । उत्सः । ऋश्यदात्[१९] । कारोतरात्[२०] । कुशयः । केवट[२१] इति कूपस्य [केवट इति चतुर्दश कूपनामानि] ॥ २३ ॥

---

१. भारताः क. and Devarāja.

२. सबाधः is placed after वृक्तबर्हिषः by M 2, M 3, W 1, W 2, W 3, BK 2.

३. देवयव...०जाम् X; [देवयव......नामानि] Y.

४. ददि्ध. M 1; दग्धि M 2, M 3, W 1, W 3; दन्धि W 2.

५. पूर्धि M 1.

६. रिरीहि । भिमीहि । रिरिह्वि । मिमिह्वि । BK 2.

७. यन्ति M 2, M 3, W 1, W 2, W 3; BK 2.

८. सप्तदश omitted by X.

९. पृणक्ति M 2, M 3, W 1, W 2, W 3, BK 2.

१०. वृश्चति is added after पृणाति by M 2, M 3, W 1, W 2, W 3, BK 2. प्रीणाति BK 2.

११. तुञ्जति is omitted by M 2, M 3, W 1, W 2, BK 2, W 3.

१२. दश is omitted by X.

१३. परिश्रव. ख.

१४. चत्वारः omitted by X.

१५. वव्रः M 2, M 3, W 2, W 3; वव्रः W 1; वप्रः BK 2. काटः is placed after वव्रः by M 2, M 3, W 1, W 2, W 3, BK 2.

१६. कारुः M 2; कानुः W 3.

१७. खातः । अवटः । अवतः । M 2, M 3, W 1, W 2, W 3, BK 2.

१८. क्रिवि M 2; कृवि M 3, W 1, W 2, W 3; कूपः is placed after क्रिवि in M 3, W 1, W 2, W 3, after कृवि. BK 2.

१९. ऋशदात् W 1; रिश्यदात् M 3.

२०. कारोतरः M 2, M 3, W 1, W 2, W 3.

२१. केवट...कूपस्य X; [केवट......नामानि] Y.

[1]तृपुः । [2]तक्वा । रिभ्वा । रिपुः । रिक्वा । रिहायाः । तायुः । तस्करः । वनर्गुः । हुरश्चित् । मुषीवान् । मलिम्लुचः । अघशंसः । [3]वृक इति स्तेनस्य [वृक इति चतुर्दशैव स्तेननामानि] ॥ २४ ॥

निण्यम् । [4]सस्वः । सनुतः । हिरुक् । प्रतीच्यम् । अपीच्यमिति [[5]षट्] निर्णीतान्तर्हितनामधेयानि ॥ २५ ॥

आके । पराके । पराचैः । आरे । [6]परावत इति दूरस्य [परावत इति पञ्च दूरनामानि] ॥ २६ ॥

प्रत्नम् । प्रदिवः । प्रवयाः । सनेमि । पूर्व्यम् । [7]अह्नायेति पुराणस्य [अह्नायेति षट् पुराणनामानि] ॥ २७ ॥

नवम् । नूत्नम् । नूतनम् । नव्यम् । इदा । [8]इदानीमिति नवस्य [इदानीमिति षळेव नवनामानि] ॥ २८ ॥

प्रपित्वे । अभीके । दभ्रम् । अर्भकम् । तिरः । सतः । त्वः । नेमः । [9]ऋक्षाः । स्तृभिः । [10]वम्रीभिः । उपजिह्विका । ऊर्दरम् । कृदरम् । रम्भः । पिनाकम् । मेना । ग्नाः । शेपः । वैतसः । अया । एना । [11]सिषक्तु । सचते । [12]भ्यसते । [13]रेजते इति द्विशः [रेजते इति षड्विंशतिर्द्विश उत्तराणि नामानि] ॥ २९ ॥

---

१. त्रिपुः M 2, M 3, W 1, W 2, W 3, BK 2.

२. रिपुः । तक्वा । तृक्वा । रिक्वा । रिह्वा । M 2, M 3, W 1, W 2, W 3, BK 2.

३. वृक,......स्तेनस्य X; [वृक......नामानि] Y.

४. सस्तः BK 2.

५. षट् is omitted by X.

६. परावत......दूरस्य X; [परावत...... नामानि] Y.

७. अह्नायेति......पुराणस्य X; [अह्नायेति... नामानि] Y.

८. इदानीमिति नवस्य X; [इदानी...... नामानि] Y.

९. ऋक्षा BK 2.

१०. स्त्रीभिः BK 2.

११. सिषक्ति M 2, M 3, W 1, W 2, W 3, BK 2.

१२. नंसते ग.

१३. रेजते...द्विशः X; [रेजते...नामानि] Y.

स्वधे[1] । पुरन्धी । धिषणे । रोदसी[2] । क्षोणी । अम्भसी । नभसी[3] । रजसी । सदसी । सद्मनी । घृतवती । बहुले । गभीरे । गम्भीरे । ओण्यौ[4] । चम्वौ । पार्श्वौ । मही । उर्वी । पृथ्वी[5] । अदिती । अही । दूरे[6] अन्ते । अपारे[7] अपारे इति द्यावापृथिव्योः[8] [अपारे अपारे इति चतुर्विंशतिर्द्यावापृथिवीनामधेयानि नामधेयानि] ॥ ३० ॥

इति निघण्टौ तृतीयोऽध्यायः ।

M 1, M 4, C 1, C 2, C 3, C 3, S, W 4 added the following summary :—

उर्व्यंहन्महद्गय इरज्यति शिम्बाता निर्णिगस्त्रेमा केतुर्बद् चिक्यद्धिक्मिदमिवार्चति विप्रो रेभो यज्ञो भरता ईमहे दाति परि स्रव स्वपिति कूपस्त्वपुर्निण्यमाके प्रत्नम्नवम् प्रपित्वे स्वधे त्रिंशत् ॥

इति निघण्टौ तृतीयोऽध्यायः समाप्तः ।

अथ चतुर्थोऽध्यायः ।

जहा । निधा । शिताम[9] । मेहना[10] । दमूनाः[11] । मूषः[12] । इषिरेण[13] । कुरुतन । जठरे[14] । तितउ । शिप्रे । मध्या । मन्दू । ईर्मान्तासः । कायमानः । लोधम् । शीरम् । विद्रधे । द्रुपदे । तुग्वनि । नसन्ते । नसन्त[15] । आहनसः ।

---

१. सधे. M 2, M 3, W 1, W 2, W 3.

२. रोधसी is added after रोदसी by M 2, M 3, W 1, W 2, W 3, BK 2.

३. नभसी is omitted by M 2, M 3, W 1, W 2, W 3, BK 2.

४. ओण्यौ । नप्त्यौ । चम्व्यौ । पार्श्वौ । M 2, M 3, W 1, W 2, W 3; BK 2. Ms. ग has नप्त्रौ.

५. पृथ्वी । बृहती । दूरे अन्ते । अपारे etc. M 2, M 3, W 1, W 2, W 3.

६. दूरे । अन्ते । M 3; दूरे ध्वी. BK 2, अन्ते । क. ग.

७. अपारे......०पृथिव्योः X [अपारे...... नामधेयानि] Y.

८. ०द्यावापृथिव्यो नामः M 1.

९. शिताम । निधा । BK 2.

१०. मेहनाः BK 2.

११. दमुनाः ग.

१२. मूशः च.

१३. इषिरः M 2, M 3, W 1, W 2, W 3, BK 2.

१४. जठरम् ख. ग.

१५. नसतः X & Y, BK 2, Roth. नसन्त S'iva and Sāma. The authority of the Mss. of both recensions has been discarded for this particular word because Yāska, a much older authority than all the Mss. put together, reads **नसन्त.**

अब्रसत् । इष्मिणः । वाहः । परितक्म्या[1] । सुविते । दयते । नूचित् । नूच[2] । दावने । अकूपारस्य । शिशीते । सुतुकः[3] । सुप्रायणः । अग्रायुवः । च्यवनः[4] । रजः । हरः । जुहुरे । व्यन्तः । क्राणाः[5] । वाशी । विषुणः । जामिः[6] । पिता । शंयोः । अदितिः । एरिरे[7] । जसुरिः । जरते । मन्दिने । गौः । गातुः । दंसयः । तूताव । चयसे । वियुते । ऋधक् । अस्थाः । अस्य[8] [अस्येति[9] द्विषष्टिः पदानि] ॥ १ ॥

सास्निम् । वाहिष्ठः । दूतः[10] । वावशानः । वार्यम् । अन्धः[11] । असश्चन्ती । वनुष्यति । तरुष्यति[12] । भन्दनाः । आहनः । नदः । सोमो अक्षाः । श्वात्रम् । ऊतिः । हासमाने । पड्भिः । ससम् । द्विता । व्राः । वराहः । स्वसराणि । शर्याः । अर्कः । पविः । वक्षः[13] । धन्व । सिनम्[14] । इत्था । सचा । चित् । आ[15] । द्युम्नम् । पवित्रम् । तोदः । स्वञ्चाः । शिपिविष्टः । विष्णुः । आघृणिः । पृथुज्रयाः । अथर्युम्[16] । काणुका । अध्रिगुः । आङ्गूषः[17] । आपान्तमन्युः[18] । श्मशा[19] । उर्वशी । वयुनम् । वाजपस्त्यम् । वाजगन्ध्यम् । गध्यम्[20] । गधिता[21] । कौरयाणः । तौरयाणः । अह्रयाणः । हरयाणः[22] । आरितः । व्रन्दी[23] । निष्षपी[24] । तूर्णाशम् । क्षुम्पम् । निचुम्पुणः । पदिम् । पादुः । वृकः । जोषवाकम् । कृत्तिः । श्वघ्नी । समस्य । कुटस्य । चर्षणिः । शम्बः । केपयः । तूतुमाकृषे । अंसत्रम् । काकुदम्[25] । वीरिटे । अच्छ । परि । ईम्[26] । सीम्[27] । एनम् । एनाम् सृणिः[28] [सृणिरिति चतुरुत्तरमशीतिः पदानि] ॥ २ ॥

---

१. परितक्या ग.
२. नूच is omitted by M 2, M 3, W 1, W 2, W 3, BK 2.
३. सुलुकः BK 2.
४. च्यवानः a variant given by yāska.
५. क्राणां BK 2.
६. जाम्नि W 1.
७. एरिति BK 2.
८. आंस्या W 3.
९. अस्य X; [अस्येति…पदानि] Y.
१०. दूतः is omitted by M 2, M 3, W 1, W 2, W 3, BK 2.
११. अहः ख.
१२. तरुष्यते. क.
१३. वक्ष. M 3.
१४. सितम् क.
१५. आद्युम्नम् । M 3.
१६. अथयुम् M 3.
१७. आंगूषः । BK 2.
१८. अपान्तमन्युः M 1.
१९. इयसा च.
२०. गन्ध्यम्. ग.
२१. गध्यति M 2, W 1, W 2, BK 2. गध्यतिः M 3, W 3.
२२. हरयाणः is omitted by Roth.
२३. व्रन्दिनः M 2, M 3, W 1, W 2, W 3, BK 2.
२४. निःषपी M 1, W 1; निष्पपी BK 2.
२५. काकुटम् M 3.
२६. ई W 1.
२७. सी. W 1.
२८. सृणिः M 2, M 3, W 1, W 2, W 3; [सृणि……पदानि] Y.

आशुशुक्षणिः[१] । आशाभ्यः । काशिः । कुणारुम् । अलातृणः । सल-
लूकम् । कृत्पयम् । विस्रुहः[२] । वीरुधः । नक्षद्दाभम् । अस्कृधोयुः ।
निशृम्भाः । बृबदुक्थम् । ऋदूदरः । ऋदूपे । पुलुकामः । असिन्वती ।
कपना । भाऋजीकः[३] । रुजानाः । जूर्णिः । ओमना । उपलप्रक्षिणी ।
उपसि । प्रकलवित्[४] । अभ्यर्धयज्वा । ईक्षे । क्षोणस्य । असे । पाथः ।
सर्वीमनि । सप्रथाः । विदथानि । श्रायन्तः । आशीः । अजीगः[५] । अमूरः ।
शशमानः । देवो[६] देवाच्या कृपा । विजामातुः । ओमासः । सोमानम् ।
अनवायम् । किमीदिने । अमवान्[७] । अमीवा । दुरितम् । अप्वा[८] । अमतिः ।
श्रुष्टी । पुरन्धिः । रुशत् । रिशादसः । सुदत्रः । सुविदत्रः । आनषक् ।
तुर्वणिः । गिर्वणसे[९] । असूर्ते सूर्ते । अम्यक् । यादृश्मिन् । जारयायि ।
अग्रिया । चनः । पचता । शुरुधः । अमिनः । जञ्झतीः[१०] । अप्र-
तिष्कुतः[११] । शाशदानः[१२] । सृप्रः । सुशिप्रः[१३] । शिप्रे[१४] । रंसु । द्विबर्हाः । अक्रः ।
उराणः । स्तियानाम् । स्तिपाः[१५] । जबारु । जरूथम् । कुलिशः । तुञ्जः ।
बर्हणा[१६] । ततनुष्टिम् । इलीबिशः । क्रियेधाः । भृमिः । विष्पितः । तुरीपम् ।
रास्पिनः । ऋञ्जतिः[१७] । ऋजुनीती[१८] । प्रतद्वसू । हिनोत । चोष्कूयमाणः ।
चोष्कूयते । सुमत् । दिविष्टिषु । दूतः । जिन्वति । अमत्रः । ऋचीषमः ।
अनर्शरातिम् । अनर्वा । असामि । गल्दया । जल्हवः । बकुरः । बेकनाटान् ।

---

१. आशुशूक्षणिः W 1.

२. विस्रुधः W 1.

३. भाऋजीत्कः W 1.

४. प्रकलवीत् W 1.

५. आजीगः W 1.

६. देवो देवाच्या । कृपा । ख. ग. च.

७. अमः BK 2, M 2, M 3, W 2, W 3; अयः W 1.

८. अप्वे Dev; अवा BK 2.

९. गिर्वणाः Y & Sāma.

१०. जझझती: M 2, W 2; जझती: M 3.

११. अप्रतिष्कृतः BK 2.

१२. The third section comes to an end after शाशदानः in M 2, M 3, W 1, W 2, W 3.

१३. सशिगः W 1.

१४. omitted by C 3 & S.

१५. स्तिपं BK 2. जबारुं । BK 2.

१६. बर्हणाः BK 2.

१७. ऋंजाता BK 2.

१८. ऋजुनीती is omitted by M 2, M 3, W 1, W 2, W 3, BK 2.

अभिधेतन । अंहुरः । बृतः । वाताप्यम् । चाकन् । रथर्यति । [1]असंक्राम् । आधवः । अनवब्रवः । सदान्वे । [2]शिरिम्बिठः । पराशरः । [3]क्रिविर्दती । करूलती । दनः । शरारुः । इदंयुः । कीकटेषु । बुन्दः । वृन्दम् । किः । उल्बम् । [4]ऋबीसमृबीसम् [ऋबीसमृबीसमिति [5]त्रयस्त्रिंशच्छतं पदानि] ॥ [6]३ ॥

इति निघण्टौ चतुर्थोऽध्यायः ।

M 1, M 4, C 1, C 2, C 3, C 4, S, W 4 add the following summnary'.

जहा सस्निमाशुशुक्षणिस्त्रीणि ।

इति निघण्टौ चतुर्थोऽध्यायः समाप्तः ।

अथ पञ्चमोऽध्यायः ।

अग्निः । जातवेदाः । [7]वैश्वानर [इति त्रीणि पदानि] ॥ १ ॥

द्रविणोदाः । इध्मः । तनूनपात् । नराशंसः । [8]ईळः । बर्हिः । द्वारः । उषासानक्ता । दैव्या होतारा । तिस्रो देवीः । त्वष्टा । वनस्पतिः । [9]स्वाहाकृतय [इति त्रयोदशपदानि] ॥ २ ॥

अश्वः । शकुनिः । मण्डूकाः । अक्षाः । ग्रावाणः । [10]नाराशंसः । रथः । दुन्दुभिः । इषुधिः । हस्तघ्नः । अभीशवः । धनुः । ज्या । इषुः । [11]अश्वाजनी । उलूखलम् । वृषभः । द्रुघणः । पितुः । नद्यः । आपः । ओषधयः । रात्रिः । [12]अरण्यानी । [13]श्रद्धा । पृथिवी । अप्वा । अग्नायी । उलूखलमुसले ।

---

१. असरथर्यति is added before असक्राम् by M 2; असक्रात् BK 2.

२. शिरिम्बिठः is omitted by M 2, M 3, W 1, W 2, W 3, BK 2.

३. कृविर्दति BK 2.

४. ऋबीसमृबीसम् X; [ऋबीस...पदानि] Y. कबीसमृबीसम् BK 2.

५. द्वात्रिंशच्छतं C 3, S. Roth. Bhad; Sāma.

६. M 2, M 3, W 1, W 2, W 3 have ॥ ४ ॥ instead of ॥ ३ ॥

७. वैश्वानरः । द्रविणोदाः etc, M 2, M 3, W 1, W 2, W 3, BK 2.

८. इलः क. ख. ग. BK 2.

९. स्वाहाकृतयः ॥ १ ॥ M 2, M 3, W 1, W 2, W 3; ०कृतय...॥ २ ॥ y.

१०. नराशंसः M 1, M 4, C 1, C 2, C 4, S, W 4.

११. अश्वाजनि । उलूखलं मुशलं । BK 2.

१२. अरण्यानि ग. च. अरंण्यानी M 2, M 3.

१३. श्रद्धा । पृथिवी । M 3.

हविर्धाने । द्यावापृथिवी । विपाट्छुतुद्री । आर्त्नी । शुनासीरौ । देवी जोष्ट्री । देवी ऊर्जाहुती [इति षट्त्रिंशत् पदानि] ॥ ३ ॥

वायुः । वरुणः । रुद्रः । इन्द्रः । पर्जन्यः । बृहस्पतिः । ब्रह्मणस्पतिः । क्षेत्रस्य पतिः । वास्तोष्पतिः । वाचस्पतिः । अपां नपात् । यमः । मित्रः । कः । सरस्वान् । विश्वकर्मा । तार्क्ष्यः । मन्युः । दधिक्राः । सविता । त्वष्टा । वातः । अग्निः । वेनः । असुनीतिः । ऋतः । इन्दुः । प्रजापतिः । अहिः । अहिर्बुध्न्यः । सुपर्णः । पुरूरवा [इति द्वात्रिंशत् पदानि] ॥ ४ ॥

श्येनः । सोमः । चन्द्रमाः । मृत्युः । विश्वानरः । धाता । विधाता । मरुतः । रुद्राः । ऋभवः । अङ्गिरसः । पितरः । अथर्वाणः । भृगवः । आप्त्याः । अदितिः । सरमा । सरस्वती । वाक् । अनुमतिः । राका । सिनीवाली । कुहूः । यमी । उर्वशी । पृथिवी । इन्द्राणी । गौरी । गौः । धेनुः । अघ्न्या । पथ्या । स्वस्तिः । उषाः । इळा । रोदसी [इति षट्त्रिंशत् पदानि] ॥ ५ ॥

अश्विनौ । उषाः । सूर्या । वृषाकपायी । सरण्यूः । त्वष्टा । सविता । भगः । सूर्यः । पूषा । विष्णुः । विश्वानरः । वरुणः । केशी । केशिनः । वृषाकपिः । यमः । अज एकपात् । पृथिवी । समुद्रः । अथर्वा । मनुः । दध्यङ् । आदित्याः । सप्तऋषयः । देवाः । विश्वेदेवाः । साध्याः । वसवः । वाजिनः । देवपत्न्यो देवपत्न्य [इत्येकत्रिंशत् पदानि] ॥ ६ ॥

इति निघण्टौ पञ्चमोऽध्यायः ।

M 1, M 4, C 1, C 2, C 3, C 4, S, W 4 add the following summary'.

अग्निर्द्रविणोदा अश्वो वायुः श्येनोऽश्विनौ षट् ।

इति निघण्टौ पञ्चमोऽध्यायः समाप्तः ।

---

१. द्यावापृथिव्यौ M 2, M 3, W 1, W 2, W 3, BK 2.

२. विपाट्छुतुद्र्यौ M 2, M 3, W 1, W 2, W 3, BK 2.

३. [–] is omitted by X, BK 2; ॥ २ ॥ X. ॥ ३ ॥ Y.

४. पुरूरवा ॥ ३ ॥ X; BK 2. पुरूरवा...... ॥ ४ ॥ Y.

५. ऋषयः is added after भृगवः by X, BK 2.

६. ...प्त्या BK 2.

७. कुल्हः C 3, कुह्व W 2, W 3, ग.

८. ग adds हूषा after उषाः; उषा BK 2.

९. रोदसी ॥ ४ ॥ X; रोदसी......॥ ५ ॥ Y.

१०. सगः BK 2.

११. दध्यङ् । अथर्वा । मनुः । Dev.

१२. देवपत्न्यः ॥ ५ ॥ X; ०देवपत्न्य......॥ ६ ॥ Y.

श्रीयास्कमुनिविरचितं निरुक्तं प्रारभ्यते ।

अथ प्रथमोऽध्यायः ।

समाम्नायः[1] समाम्नातः[2] । स व्याख्यातव्यः । तमिमं समाम्नायं निघण्टव इत्याचक्षते । निघण्टवः कस्मात् । निगमा[3] इमे भवन्ति । छन्दोभ्यः समाहृत्य समाहृत्य[4] समाम्नाताः । ते निगन्तव एव सन्तो निगमनान्निघण्टव[5] उच्यन्त इत्यौपमन्यवः । अपि वा हननादेव स्युः । समाहता भवन्ति । यद्वा समाहृता भवन्ति ।

तद् यानि चत्वारि पदजातानि नामाख्याते[6] चोपसर्गनिपाताश्च तानीमानि भवन्ति[7] । तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति । भावप्रधानमाख्यातम् । सत्त्वप्रधानानि

---

१. The word समाम्नायः means 'a list,' or 'a traditional list'; cf. VPR. viii. i:

अथातो वर्णसमाम्नायं व्याख्यास्यामः । TPR. i. 1. अथ वर्णसमाम्नायः ।

अनुवाकानुक्रमणी 1. 6:

पदाक्षरसमाम्नायं छन्दस्येव प्रतिष्ठितम् ।

Durga: समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य कर्मणि कारके समाम्नायः । समभ्यस्यते मर्यादयायमिति समाम्नायः ।

cf. also त्रिभाष्यरत्न on TPR. i. 1.

२. cf. Sāyaṇa, *Int. to RV. p. 21:*

तत् व्याख्यानं च समाम्नायः समाम्नात इत्यारभ्य तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवतीत्यंतैर्द्वादशभिरध्यायैर्यास्को निर्ममे । तदपि निरुक्तमित्युच्यते ।

३. Durga explains the term in the following way:

निश्चयेनाधिकं वा निगूढार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ज्ञापयन्ति ततो निगमसंज्ञा···इमे भवन्ति ।

४. Roth adopted the variant समाहत्य on the principle *lectio difficilior potior est.* This reading was adopted on the evidence of a single Ms. unsupported by any other. Roth was rather hasty in doing so and later on he rectified this mistake. All the Mss. that I have collated and Durga read समाहृत्य.

५. निगमनां निघ॰ BK 1.

६. ॰ख्यातो BK 1.

७. cf. RPR. 12. 5: 699:

नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शब्दाः ।

APR. i. 1: चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां संध्यपद्यौ गुणौ प्रातिज्ञम् ।

VPR. 8. 52: तच्चतुर्धा नामाख्यातोपसर्गनिपाताः ।

KAS.' II. 10: 28. p. 72: वर्णसंघातः पदम् । तच्चतुर्विधम् । नामाख्यातोपसर्गनिपाताश्चेति ।

PMbh. i. 1. 1: p. 3: चत्वारि पदजातानि । नामाख्यातोपसर्गनिपाताश्च ।

SDS. p. 140: ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीतेः कथं चातुर्विध्यमुक्तमिति चेन्मैवं प्रकारान्तरस्य प्रसिद्धत्वात् । तदुक्तं प्रकीर्णके । द्विधा कैश्चित् पदं भिन्नं चतुर्धा पंचधापि वा । अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवदिति ॥

नामानि[१]। तद् यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे[२]। व्रजति पचतीति। उपक्रमप्रभृत्यपवर्गपर्यन्तं[३] मूर्तं सत्त्वभूतं सत्त्वनामभिः। व्रज्या पक्तिरिति[४]। अद इति सत्त्वानामुपदेशः। गौरश्वः पुरुषो हस्तीति[५]। भवतीति भावस्य। आस्ते शेते व्रजति तिष्ठतीति[६]।

कर्मप्रवचनीयेन वै पंचमेन सह पदस्य पंचविधत्वमिति हेलराजो व्याख्यातवान्। कर्मप्रवचनीयास्तु.....उपसर्गेष्वेवान्तर्भवन्तीत्यभिसन्धाय पदचातुर्विधं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम्।

Sāyaṇa, *Int. to RV. p.* 21: तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च।

cf. Dionysius of Halicarnassus: *Literary Composition. Ch. iii, Robert's ed. p.* 71. "Composition is......a certain arrangement of the parts of speech...These were reckoned as three only by Theodects and Aristotle and the philosophers of those times, who regarded nouns, verbs, connectives as the primary parts of speech. Their successors, particularly the leaders of the stoic school, raised the number to four, separating the article from the connectives",

cf. Aristotle, *Poetics* 20. 1456 *b Bywater's ed. p.* 57: 'Diction viewed as a whole is made up of the following parts: the letter (or the ultimate element) the syllable, the conjunction, the article, the noun, the verb, the case, and the speech.

८. तत्रैतं नाम॰. BK 1.

१. cf. RPR. 12. 5: 700-1, 707:

तन्नाम येनाभिदधाति सत्त्वं तदाख्यातं येन भावं स धातुः। क्रियावाचकमाख्यातं ......सत्त्वाभिधायकं नाम।

The following stanza is cited by the commentator on the APR. in the beginning of the 4th ch. *J. A. O. S. Vol.* 7. *p.* 591:

आख्यातं यत्क्रियावाचि नाम सत्त्वाख्यमुच्यते।
निपाताश्चादय सर्वे उपसर्गास्तु प्रादयः॥

VPR. 8. 54-55:

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्। सत्त्वाभिधायकं नाम निपाताः पादपूरणाः॥

BD. ii. 121: भावप्रधानमाख्यातम्। KAS'. II. 10: 28. p. 72:

अविशिष्टलिङ्गमाख्यातं क्रियावाचि। तत्र नाम सत्त्वाभिधायि।

JPM: 2. 1. 1: भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयते। एष ह्यर्थो विधीयते।

SDS. p. 144: भाववचनो धातुरिति। ......क्रियावचनो धातुरिति।

cf. Plato, *the Cratylus*: Jowett: *Dialogues of Plato p. i.* 368-9:

'Name is not a musical or pictorial imitation......but it is expression of the essence of each thing in letters and syllables'.

cf. Aristotle, *Poetics* 20. 1456 *b* 10 *Bywater', ed. p.* 58: 'A noun or name is a composite significant sound not involving the idea of time, with parts which have no significance by themselves in it.... A verb is a composite significant sound involving the idea of time, with parts which have no significance by themselves in it. Whereas the word 'man' or 'white' does not imply when, 'walks' and 'has walked' involve in addition to the idea of walking that of time present or time past'.

२. आचष्ट BK 1.

३. ॰पवर्गपर्यन्तमूर्त्तं BK 1.

४. पंक्तिरिति BK 1.

५. The 1st section comes to an end in Mss. of the shorter recension.

६. इति is omitted by G.

इन्द्रियनित्यं[१] वचनमौदुम्बरायणः ॥ १ ॥

तत्र चतुष्ट्वं नोपपद्यते । अयुगपत्[२]उत्पन्नानां[३] वा शब्दानामितरेतरोपदेशः[४] । शास्त्रकृतो योगश्च[५] । व्याप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च[६] शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तेषां मनुष्यवद् देवताभिधानम् । पुरुषविद्यानित्यत्वात्[७] कर्मसंपत्तिर्मन्त्रो वेदे[८] ।

षड्भावविकारा[९] भवन्तीति वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति[१०] । जायत इति पूर्वभावस्यादिमाचष्टे । नापरभावमाचष्टे[११] न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् । विपरिणमत इत्यप्रच्यवमानस्य[१२] तत्त्वाद् विकारम् । वर्धत इति स्वाङ्गाभ्युच्चयम् । सांयौगिकानां वार्थानाम् । वर्धते विजयेनेति वा । वर्धते शरीरेणेति वा । अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे[१३] । न पूर्वभावमाचष्टे न प्रतिषेधति ॥ २ ॥

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह[१४] । ते यथावचनमभ्यूहितव्याः[१५] ।

न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति[१६] । उच्चावचाः पदार्था भवन्तीति गार्ग्यः[१७] । तद् य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम्[१८] ।

आ[१९] इत्यर्वागर्थे । प्र परा इत्येतस्य प्रातिलोम्यम् । अभि इत्याभिमुख्यम् । प्रति इत्येतस्य प्रातिलोम्यम् । अति सु इत्यभिपूजितार्थे । निर् दुर् इत्येतयोः प्रातिलोम्यम् । नि अव इति विनिग्रहार्थीयौ[२०] । उद् इत्येतयोः प्रातिलोम्यम् । सम् इत्येकीभावम् । वि अप इत्येतस्य प्रातिलोम्यम्[२१] । अनु इति सादृश्यापरभावम् । अपि इति

---

१. नित्यं is omitted in BK.
२. Durga gives युगपत् as a variant.
३. ०त्पन्नानां BK.
४. ०मितरोतरो BK.
५. ०कृतोपयोगश्च A.
६. शब्दायणीमत्वाच्च BK.
७. ०नित्यात् W. 2.
८. Here ends the second section in BK.
९. इति is omitted in BK.
१०. cf. BD. ii. 121; PMbh. i. 3. 1. p. i. 258.
११. आयष्टे BK.
१२. द्रव्याप्र० BK.
१३. ०तीत्यपभाव० BK.
१४. स्याह BK.
१५. cf. BD. ii. 122.
१६. भवन्तीति G. cf. RP. 12. 6: 702; VP. 8. 54–55; KAS'. II. 10: 28. p. 72; PMbh. i. 3. 1. p. 256; ii. 1. 1. p. 365.
१७. cf. RP. 12. 5: 707.
१८. cf. BD. ii. 94. Here ends the 4th section in BK.
१९. आ आ BK.
२०. विनिग्रहार्थीयौ M 1, C 2, C 3, C 6. cf. SRV. I. 124. 11. p. i. 566: अत्रावशब्दो विनिग्रहार्थीयो न्यवेति विनिग्रहार्थीयौ । इति यास्केनोक्तत्वात् ।
२१. cf. SRV. I. 123. 7. p. i. 559: अपेत्येतस्य प्रातिलोम्यं......अभीत्याभिमुख्यमिति यास्कः ।

संसर्गम् । उप इत्युपजनम् । परि इति सर्वतोभावम् । अधि इत्युपरिभावमैश्वर्यं वा । एवमुच्चावचानर्थान्प्राहुः । त उपेक्षितव्याः[1] ॥ ३ ॥[2]

अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति[3] । अप्युपमार्थे । अपि कर्मोपसंग्रहार्थे । अपि पदपूरणाः[4] । तेषामेते चत्वार उपमार्थे भवन्ति[5] ।

इवेति भाषायां च । अन्वध्यायं च ।

अ॒ग्निरि॑व[6] । इन्द्र॑ इव[7] । इति ।

नेति प्रतिषेधार्थीयो भाषायाम्[8] । उभयमन्वध्यायम् ।

नेन्द्रं॑ दे॒वम॑मंसत[9] ।

इति प्रतिषेधार्थीयः । पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति ।

दु॒र्मदा॑सो॒ न सुरा॑याम्[10] ।

इत्युपमार्थीयः । उपरिष्टादुपाचारस्तस्य येनोपमिमीते[11] ।

चिदित्येषोऽनेककर्मा । आचार्यश्चिदिदं ब्रूयात् । इति पूजायाम् । [आचार्य कस्मात्[12]] आचार्य आचारं ग्राहयति । आचिनोत्यर्थान् । आचिनोति बुद्धिमिति वा[13][14] । दधिचित् । इत्युपमार्थे[15] । कुल्माषांश्चिदाहर[16] । इत्यवकुत्सिते[17] । कुल्माषाः[18] कुलेषु सीदन्ति[19] ।

---

१. The sentence एवमु...उपेक्षितव्याः is omitted by Durga.

२. Here ends the 5th sec. of the 1st pāda in BK.

३. cf. SRV. I. 124. 12. p. i. 566:

उच्चावचेष्वर्थेषु निपतन्तीति यास्केनोक्तत्वात् ।

४. cf. BD. ii. 89; RP. 12. 8: 707; VP. 8. 55.

५. भवन्तीति R. भवन्ति is omitted by C 2, G, S. cf. BD. ii. 91:

इव न चिन्नु चत्वार उपमार्था भवन्ति ते।

६. RV. X. 84. 2; 106. 3.

७. RV. X. 84. 5; 166. 2; 173. 2.

८. cf. BD. ii. 92.

९. RV. X. 86. 1.

१०. RV. VIII. 2. 12.

११. cf. SRV. I. 8. 5; 124. 4. pp. i. 61, 563. Here ends the 1st sec. of the 2nd pāda in BK.

१२. Omitted in BK, C 4, C 5, Kn, M 3, M i, R 4, R 6, W 1, W 2, W 3. and Durga.

१३. cf. PMbh. i. 1. 3. p. 38:

आचार्याचारात् संज्ञासिद्धिः ।

१४. The whole sentence from आचार्य... वा is omitted by Durga.

१५. cf. SRV. I. 169. 3. p. i. 737:

चिदित्युपमार्थे । इति यास्केनोपमार्थस्योक्तत्वात् ।

१६. कुल्मासांश्चिद् BK.

१७. Quoted by SRV. I. 129. 10. p. i. 588.

१८. कुल्मासाः BK.

१९. The sentence कुल्माषाः कुलेषु सीदन्ति is omitted by Durga.

नु इत्येषोऽनेककर्मा । इदं नु करिष्यति । इति हेत्वपदेशे । कथं नु करिष्यति । इत्यनुपृष्टे । नन्वेतदकार्षीत्[1] । इति च । अथाप्युपमार्थे भवति[2] ।

वृ॒क्षस्य॒ नु ते॑ पुरुहूत व॒याः[3] ।

वृक्षस्येव ते पुरुहूत शाखाः । वयाः शाखा वेतेः[4] । वातायना भवन्ति[5] । शाखाः खशयाः । शक्नोतेर्वा[6] ।

अथ यस्यागमादर्थपृथक्त्वमह[7] विज्ञायते न त्वौद्देशिकमिव[8] विग्रहेण पृथक्त्वात् स[9] कर्मोपसंग्रहः ।

चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते ।

अ॒हं च॒ त्वं च॑ वृत्रहन्[10] । इति ।

एतस्मिन्नेवार्थे[11] ।

दे॒वेभ्य॑श्च पि॒तृभ्य॒ आ[12] । इत्याकारः ।

वेति विचारणार्थे ।

[13]हन्ता॒हं पृ॑थि॒वीमि॒मां नि द॑धानी॒ह वे॒ह वा[14] । इति ।

अथापि समुच्चयार्थे भवति ॥ ४ ॥

वायुर्वा त्वा मनुर्वा त्वा । इति[15] ।

अह इति च ह इति च विनिग्रहार्थीयौ[16] । पूर्वेण संप्रयुज्येते । अयमहेदं करोत्वयमिदम्[17] । इदं ह करिष्यतीदं न[18] करिष्यतीति ।

---

१. ०कार्षीः M i, M 3, BK.

२. Quoted by SRV. I. 91. 3. p. i. 403: तदुक्तं यास्केन। अथाप्युपमार्थे भवति। वृक्षस्य...वयाः। Here ends the 2nd section of the 2nd pāda in BK.

३. RV. VI. 24. 3.

४. The passage वयाः...भवन्ति is quoted by SRV. I. 59. 1. p. i. 291.

५. वातायना भवन्ति is omitted by Durga.

६. शक्नोतेर्वा is omitted by Durga.

७. ०पृथक्त्वमहमिति BK; ०पृथक्त्वमिति ह A, G.

८. चौद्देशिकम् BK.

९. च. W 1, W 2, M i, BK.

१०. RV. VIII. 62. 11. The अ of अहं is elided after संप्रयुज्यते by the Mss. of the longer recension. The first *i* of *iti* is accented in the Mss. but as I have separated it from the Vedic quotation, I leave it unaccented.

११. Quoted by SRV. I. 48. 16. p. i. 246.

१२. RV. X. 16. 11.

१३. cf. BD. i. 56: प्रमादस्त्वेष हन्ताहं etc.

१४. RV. X. 119. 9.

१५. TS. 1. 7. 7. 2; KS. 13. 14. Here ends the 3rd Section of the 2nd pāda in BK.

१६. विनिग्रहार्थीयौ M 1, C 2, C 3, C 6, BK.

१७. इदम् is omitted by Roth.

१८. नु M 2, M 3, W 1, W 2, C 4, C 5, BK.

अथाप्युकार एतस्मिन्नेवार्थे उत्तरेण। मृषेमे वदन्ति सत्यमु ते वदन्तीति। अथापि पदपूरणः।

इदमु[1]। तदु[2]।

हीत्येषोऽनेककर्मा। इदं हि करिष्यति। इति हेत्वपदेशे। कथं हि करिष्यति। इत्यनुपृष्टे। कथं हि व्याकरिष्यति। इत्यसूयायाम्।

किलेति विद्याप्रकर्षे। एवं किलेति। अथापि नु ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे। न किलैवम्। ननु किलैवम्।

मेति प्रतिषेधे। मा कार्षीः। मा हार्षीरिति च।

खल्विति च। खलु कृत्वा। खलु कृतम्। अथापि पदपूरणः। एवं खलु तद् बभूवेति।

शश्वदिति विचिकित्सार्थीयो भाषायाम्। शश्वदेवम्। इत्यनुपृष्टे। एवं शश्वत्। इत्यस्वयं पृष्टे।

नूनमिति विचिकित्सार्थीयो भाषायाम्। उभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्च।

अगस्त्य[3] इन्द्राय हविर्निरूप्य मरुद्भ्यः संप्रदित्सांचकार। स इन्द्र एत्य परिदेवयांचक्रे[4] ॥ ५ ॥

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं विनश्यति[5] ॥

न नूनमस्त्यद्यतनम्। नो एव श्वस्तनम्। अद्यास्मिन् द्यवि। द्युरित्यह्नो नामधेयम्। द्योतत इति सतः। श्व उपाशंसनीयः[6] कालः। ह्यो हीनः कालः। कस्तद्वेद यदद्भुतम्। कस्तद्वेद यदभूतम्। इदमपीतरदद्भुतमभूतमिव[7]। अन्यस्य चित्तम्। अभिसंचरेण्यमभिसंचारि। अन्यो नानेयः। चित्तं चेततेः। उताधीतं विनश्यतीति। [अप्याध्यातं विनश्यति][8] आध्यातमभिप्रेतम्।

अथापि पदपूरणः[9] ॥ ६ ॥

---

१. RV. IV. 51. 1.

२. RV. I. 62. 6.

३. The passage अगस्त्य...चक्रे is quoted by SRV. I. 170. 1. p. i. 739; cf. BD. iv. 48-50.

४. Here ends the 4th sec. of the 2nd pāda. BK. cf. BD. IV. 50-51.

५. RV. I. 170. 1.

६. उपासंसनीयः BK.

७. ०भूतमिति वा. BK.

८. अप्याध्यातं विनश्यति is omitted by BK, C 4, C 5, Kn, M 3, M i, R 4, R 6, W 1, W 2, W 3, and Durga.

९. Here ends the 5th sec. of the 2nd pāda. BK.

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥

सा ते प्रतिदुग्धां वरं जरित्रे । वरो वरयितव्यो भवति । जरिता गरिता । दक्षिणा मघोनी मघवती । मघमिति धननामधेयम् । मंहतेर्दानकर्मणः । दक्षिणा दक्षतेः समर्धयतिकर्मणः । व्यृद्धं समर्धयतीति । अपि वा प्रदक्षिणागमनात् । दिशमभिप्रेत्य । दिग्घस्तप्रकृतिर्दक्षिणो हस्तः । दक्षतेरुत्साहकर्मणः । दाशतेर्वा स्याद् दानकर्मणः । हस्तो हन्तेः । प्राशुर्हनने । देहि स्तोतृभ्यः कामान् । मास्मानतिदंहीः । मास्मानतिहाय दाः । भगो नोऽस्तु । बृहद्वदेम स्वे वेदने । भगो भजतेः । बृहदिति महतो नामधेयम् । परिवृढं भवति । वीरवन्तः कल्याणवीरा वा । वीरो वीरयत्यमित्रान् । वेतेर्वा स्याद्गतिकर्मणः वीरयतेर्वा ।

सीमिति परिग्रहार्थीयो वा पदपूरणो वा ।

प्र सीमादित्यो असृजत् ।

प्रासृजदिति वा । प्रासृजत् सर्वत इति वा ।

वि सीमतः सुरुचो वेन आवः । इति च ।

व्यवृणोत् सर्वत आदित्यः । सुरुच आदित्यरश्मयः । सुरोचनात् ।

अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पंचमीकर्माणम् । सीम्नः सीमतः सीमातो मर्यादातः । सीमा मर्यादा । विषीव्यति देशाविति ।

त्व इति विनिग्रहार्थीयम् । सर्वनामानुदात्तम् । अर्धनामेत्येके ॥ ७ ॥

---

१. RV. II. 11. 21
cf. SRV. VIII. 10. 21. p. iii. 290:
उक्तं च यास्केन । अथापि पदपूरणः ।
नूनं सा ते प्रति वरं जरित्रे etc.

२. प्रतिदग्धं C 5.

३. cf. PMbh. VI. 1. 1. p. 16: मंहतिर्दानकर्मा । cf. SRV. I. 57. 1. p. i. 284: मंहति दानकर्मा ।

४. ०प्रति BK.

५. cf. SRV. VI. 30. 2. p. ii: 770:
उक्तं यास्केन । हस्तो हन्तेः प्राशुर्हनने ।
cf. also SRV. IX. 79. 4. p. iii. 729:
हस्तो हन्तेरिति निरुक्तम् ।

६. भगो भजतेः is omitted by Durga.

७. परिवृढं C 2, C 6, M 1, M 4, R 1, R 2, R 5, S 6, M 3, W 3.

८. ०वीरो वा BK.

९. The passage वीरो...वा is quoted by SRV. X. 10. 2. p. IV. 21. cf. also II. 11. 21. p. ii. 32:
वीरो ... वेत्यंतं निरुक्तमनुसंधेयम् ।

१०. RV. II. 28. 4.

११. AV. 4. 1. 1; 5. 6. 1; SV. 1. 321; VS. 13. 3.

१२. सुरोचनाः G.

१३. सीमामतो BK.

१४. विसीव्यति W 1, Mi, C 4, BK.

१५. cf. SRV. I. 113. 5. p. i. 498:
यदाह त्व इति...सर्वनामानुदात्तम् ।

१६. Here ends the 6th sec. of the 2nd pada in BK.

ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥[1]

इत्यृत्विक्कर्मणां विनियोगमाचष्टे । ऋचामेकः पोषमास्ते पुपुष्वान् । होता । ऋगर्चनी[2] । गायत्रमेको गायति शक्वरीषु । उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्वर्य ऋचः । शक्नोतेः ।

तद् यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वम्[3] ।

इति विज्ञायते । ब्रह्मैको जाते जाते विद्यां वदति । ब्रह्मा । सर्वविद्यः । सर्वं वेदितुमर्हति[4] । ब्रह्मा परिवृढः[5] श्रुततः । ब्रह्म परिवृढं[6] सर्वतः । यज्ञस्य मात्रां विमिमीत एकः । अध्वर्युः । अध्वर्युरध्वरयुः । अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयत इति वा । अपि वाधीयाने युरुपबन्धः । अध्वर इति यज्ञनाम । ध्वरतिर्हिंसाकर्मा । तत्प्रतिषेधः ।

निपात इत्येके । तत्कथमनुदात्तप्रकृति नाम स्यात् । दृष्टव्ययं तु भवति ।

उत त्वं सख्ये स्थिरपीतमाहुः[9] । इति द्वितीयायाम् ।

उतो त्वस्मै तन्वं वि सस्रे[10] । इति चतुर्थ्याम् ।

अथापि प्रथमाबहुवचने[11] ॥ ८ ॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥[12]

अक्षिमन्तः कर्णवन्तः [सखायः[13]] । अक्षि चष्टेः[14] । अनक्तेरित्याग्रायणः ।

तस्मादेते व्यक्ततरे इव भवतः[15] ।

इति ह विज्ञायते । कर्णः कृन्ततेः । निकृत्तद्वारो भवति । ऋच्छतेरित्याग्रायणः ।

ऋच्छन्तीव खे उदगन्ताम्[15] ।

---

१. RV. X. 71. 11.

२. cf. SRV. X. 71. 11. p. IV. 223: ऋचामेकः पोषमास्ते...ऋगर्चनी । इत्यादिनिरुक्तानुसारेण ।

३. cf. KB. 23. 2; cf. AB. 5. 7. 3.

४. The passage ब्रह्मैको...मर्हति is quoted by SRV. I. 162. 5. p. i. 685.

५. परिवृढः C 2, C 6, M 1, M 4, R 1, R 2, R 5, S, M 3, W 3.

६. परिवृढं C 2, C 6, M 1, M 4, R 1, R 2, R 5, S, M 3, W 3.

७. Quoted by SRV. II. 14. 1. p. ii. 41; cf. also II. 1. 2. p. ii. 2.

८. cf. BD. ii. 114.

९. RV. X. 71. 5; cf. N. 1. 20.

१०. RV. X. 71. 4; cf. N. 1. 19.

११. प्रथमा० Kn.

१२. RV. X. 71. 7.

१३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3 and S.

१४. cf. SRV. X. 71. 7. p. IV. 222: चष्टेरित्यादिकं निरुक्तमत्र द्रष्टव्यम् ।

१५. The quotation is untraced.

इति ह विज्ञायते । मनसां प्रजवेष्वसमा बभूवुः । आस्यदघ्ना अपरे । उपकक्षदघ्ना अपरे । आस्यमस्यतेः । आस्यन्दत[1] एनद[2]न्नमिति वा । दघ्नं दघ्यतेः स्रवतिकर्मणः । दस्यतेर्वा स्यात् । विदस्ततरं भवति । प्रस्नेया ह्रदा इवैके ददृशिरे[3] । प्रस्नेया स्नानार्हाः[4] । ह्रदो ह्रादतेः[5] शब्दकर्मणः । ह्रादतेर्वा स्याच्छीतीभावकर्मणः ।

अथापि समुच्चयार्थे भवति ।

पर्याया इव त्वदाश्विनम्[6] ।

आश्विनं च पर्यायाश्चेति ।

अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः । कमीमिद्विति ॥ ९ ॥

निष्टक्रासश्चिदिन्नरो भूरितोका वृकादिव ।

बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनाय कम् ॥

शिशिरं जीवनाय । शिशिरं शृणातेः शम्नातेर्वा ।

एमेनं सृजता सुते[11] ।

आसृजतैनं सुते ।

तमिद्वर्धन्तु नो गिरः[12] ।

तं वर्धयन्तु नो गिरः स्तुतयः । गिरो गृणातेः ।

अयमु ते सम[13]तसि ।

अयं ते समतसि ।

इवोऽपि दृश्यते । सु विदुरिव । सु विज्ञायेते इव[14] ।

---

१. आस्यन्दन्त Kn.

२. एतद॰. S'ivadatta's edition. cf. PMbh. i. 1. 4. p. i. 61: अस्यन्त्यनेन वर्णानित्यास्यम् । अन्नमेतदास्यन्दत इति वास्यम् ।

३. ददर्शिरे C 4.

४. The Mss. of the longer and the Shorter recension except Kn. read the passage as follows: प्रस्नेया ह्रदा इवैके प्रस्नेया ददृशिरे स्नानार्हाः । I have adopted the variant on the authority of a single Ms. because it makes the text intelligible.

5. The Printed editions read ह्रदतेः ।

6. K. B. 17. 4

7. मिताक्षरेषु M1, M. 3,

८. पदपूरणार्थे BK, C 4, M 3, R 4, R 6, W 3.

९. Quoted by SRV. I. 9. 2. p. i. 64; cf. also I. 50. 1; 123. 11; pp. i. 248, 561; cf. RP. 12. 9: 708; BD. ii. 90–91.

१०. The quotation is untraced. cf. SRV. V. 83. 10. p. ii. 678: कमित्ययं शिशिरं जीवनाय कम् । Ms. Kn. cites the pratikas only but gives this quotation in full.

११. RV. I. 9. 2; AV. 20. 71. 8. see. SRV. loc. cit.

१२. RV. VIII. 92. 21; IX. 61. 14.

१३. RV. I. 50. 4; AV. 20. 45. 1; SV. 1. 183; 2. 949.

१४. इति वा Kn.

अथापि नेत्येष इदित्येतेन[1] संप्रयुज्यते परिभये ॥ १० ॥

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् ।
शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम[2] ॥ इति

नरकं न्यरकं नीचैर्गमनम् । नास्मिन् रमणं स्थानमल्पमप्यस्तीति वा ।

अथापि न चेत्येष इदित्येतेन संप्रयुज्यतेऽनुपृष्टे[3] । न चेत् सुरां पिबन्तीति । सुरा सुनोतेः । एवमुच्चावचेष्वर्थेषु निपतन्ति । त उपेक्षितव्याः ॥ ११ ॥

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि । नामाख्याते चोपसर्गनिपाताश्च ।

[4] तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च[5] । न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणान्वितौ[6] स्याताम्[7] । संविज्ञातानि[8] तानि यथा गौरश्वः पुरुषो हस्तीति ।

अथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात् सर्वं तत् सत्त्वं तथाचक्षीरन् । यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात् । यत् किञ्चित्तृन्द्यात् तृणं तत् ।

अथापि चेत् सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् । तत्रैवं स्थूणा दरशया वा[9] संजनी च स्यात् ॥१२॥

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन् । पुरुषं पुरिशय इत्याचक्षीरन् । अष्टेत्यश्वम् । तर्दनमिति तृणम् ।

अथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति[10] । प्रथनात्पृथिवीत्याहुः । क एनामप्रथयिष्यत् । किमाधारश्चेति ।

---

१. इदित्येन Kn.

२. RVKH. 10. 106. 1.

३. परिभयेऽनुपृष्टे Kn.

४. cf. BD. i. 23-24, 26-27, 30-31:

तत्खल्वाहुः कतिभ्यस्तु नाम जायते ।
सत्त्वानां वैदिकानां वा यद्वान्यदिह किंचन ॥
नवभ्य इति नैरुक्ताः पुराणाः कवयश्च ये ।
मधुकः श्वेतकेतुश्च गालवश्चैव मन्वते ॥
चतुर्भ्य इति तत्राहुर्यास्कगार्ग्यरथीतराः ।
....
सर्वाण्येतानि नामानि कर्मतस्त्वाह शौनकः ।
....
नाकर्मकोऽस्ति भावो हि न नामास्ति निरर्थकम् ।
नान्यत्र भावान्नामानि तस्मात्सर्वाणि कर्मतः ॥

cf. PMbh. iii. 3. 1. p. 138.

नाम च धातुजमाह निरुक्ते । नाम खल्वपि धातुजम् । एवमाहुर्नैरुक्ताः व्याकरणे शकटस्य च तोकम् । वैयाकरणानां च शाकटायन आह धातुजं नामेति ।

५. cf. SRV. I. 1. 1. p. i. 25. With regard to the punctuation at this place see my *English Translation of the Nirukta* note on pp. 212, 213.

६. गुणेन C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Kn.

७. Gune proposes to add a clause सर्वं प्रादेशिकम् after स्याताम्. But see my note *Translation of the Nirukta* pp. 212, 213.

८. Durga gives संविज्ञानानि as a variant.

९. च Kn.

१०. ०विचारयन्

अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः। एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च।

अथापि सत्त्वपूर्वो भाव इत्याहुः। अपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति। तदेतन्नोपपद्यते ॥ १३ ॥

यथो हि नु वा एतत् तद् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणान्वितौ स्याताम्[2] सर्वं प्रादेशिकमित्येवं सत्य[3]नुपालम्भ एष भवति।

यथो एतद् यः कश्च तत्कर्म कुर्यात् सर्वं तत् सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इति।

एतेनैवोत्तरः प्रत्युक्तः।

यथो एतद् यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्यैकपदिका यथा व्रततिर्दमूना जाट्य[4] आटूणारो[5] जागरूको दर्विहोमीति।

यथो एतन्निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः। प्रथ[6]नात्पृथिवीत्याहुः। क एनामप्रथयिष्यत् किमाधारश्चेति। अथ वै दर्शनेन पृथुः। अप्रथिता चेदप्य[7]न्यैः। अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते।

यथो एतत्पदेभ्यः पदेतरार्धान्त्संचस्कारेति योऽनन्वितेऽर्थे संचस्कार स तेन गर्ह्यः। सैषा पुरुषगर्हा न शास्त्रगर्हा[8][9] [[10]इति]।

यथो एतदपरस्माद् भावात्पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्त्वानामपरस्माद्भावान्नामधेयप्रतिलम्भमेकेषां नैकेषां यथा बिल्वादो लम्ब[11]चूडक इति। बिल्वं भरणाद्वा भेदनाद्वा ॥ १४ ॥

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते। अर्थमप्रति[12]यन्तो नात्यन्तं स्वरसंस्कारोद्देशः। तदिदं विद्यास्था[13]नं व्याकरणस्य कार्त्स्न्यम्। स्वार्थसाधकं च[14]।

यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सः। अनर्थका हि मन्त्राः। तदेतेनोपेक्षितव्यम्।

---

१. गुणेन C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Kn.

२. स्यातामिति Kn.

३. सत्यमुपालम्भ Mi, C 5, Kn.

४. जाड्य M 1, M 3, Mi, W 1, W 2, C 2, C 3, C 4, C 6; ज़ाथ्य M 2.

५. आटूारो C 2, C 3, C 6, M 1, M 2, W 2.

६. ॰मनात् W 2.

७. ॰न्यैः M 3.

८. गर्ह्यः C 4, C 5, M 3, Mi, W 2.

९. न शास्त्रगर्हा is omitted by C 2, Kn.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. लम्बचूलुक C 5; लम्बचुलक C 4, Mi.

१२. ॰प्रतीयतो C 4.

१३. विद्यात्स्थानं Kn.

१४. Quoted by SRV. p. i. 21.

नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति ।
अथापि ब्राह्मणेन रूपसंपन्ना विधीयन्ते ।

उ॒रु प्र॑थस्व[1] । इति प्रथयति ।

प्रोहा॑णि[2] । इति प्रोहति ।

अथाप्यनुपपन्नार्था भवन्ति ।

ओष॑धे॒ त्राय॑स्वैनम्[3] ।

स्वधि॑ते॒ मैनं॑ हिंसीः[4] । इत्याह हिंसन् ।

अथापि विप्रतिषिद्धार्था भवन्ति ।

एक॑ ए॒व रु॒द्रोऽव॑तस्थे॒ न द्वि॒तीयः[5] ।

असं॑ख्याता स॒हस्रा॑णि ये रु॒द्रा अधि॒ भूम्या॑म्[6] ।

अ॒श॒त्रुरि॑न्द्र जज्ञिषे[7] ।

श॒तं सेना॑ अजयत् सा॒कमिन्द्रः[8] । इति ।

अथापि जानन्तं संप्रेष्यति ।

अग्नये समिध्यमानायानुब्रूहि[9] । इति ।

अथाप्याहादितिः सर्वमिति ।

अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्षम्[10] । इति ।

तदुपरिष्टाद्[11] व्याख्यास्यामः ।

अथाप्यविस्पष्टार्था भवन्ति ।

अम्य॑क्[12] । या॒दृश्मि॑न्[13] । जा॒रया॑यि[14] । का॒णुका॑[15] । इति ॥ १५ ॥

---

१. VS. 1. 22; TS. i. 1. 8. 1; VI. 2. 7. 3; KS. 1. 8; 31. 7; Ms. i. 1. 9.

२. cf. VS. 2. 15: प्रोहामि.

३. TS. i. 2. 1. 1; 3. 5. 1; VI. 3. 3. 2; KS. ii. 1; Ms. i. 2. 1; iii. 9. 3; cf. VS. 4. 1; 5. 42; 6. 15: ओषधे त्रायस्व; cf. S'B. iii. 1. 2. 7.

४. VS. 4. 1; 5. 42; 6. 15; TS. i. 2. 1. 1; 3. 5. 1; VI. 3. 3. 2; KS. ii. 1; Ms. i. 2. 1; iii. 9. 3; cf. S'B. iii. 1. 2. 7; 6. 4. 10; 8. 2. 12.

५. cf. TS. i. 8. 6. 1.

६. VS. 16. 54; Ms. ii. 9. 9.

७. RV. X. 133. 2; AV. 20. 95. 3; SV. 2. 1152.

८. RV. X. 103. 1; AV. 19. 13. 2; SV. 2. 1199; VS. 17. 33.

९. TS. VI. 3. 7. 1; Ms. 1. 4. 11; TB. III. 3. 7. 1; S'B. ii. 5. 2. 9.

१०. RV. I. 89. 10.

११. See N. 4. 23.

१२. Occurs once only in RV. I. 169. 3.

१३. Occurs once only in RV. V. 44. 8.

१४. Occurs once only in RV. VI. 12. 4.

१५. Occurs once only in RV. VIII. 77. 4.

All the 4 words are written, in the Mss. I have collated, without the accent. But as they are the words of the Ṛgveda, I have restored the accent.

अर्थवन्तः शब्दसामान्यात् ।

एतद् वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति ।[1]

इति च ब्राह्मणम् ।

क्रीळन्तौ पुत्रैर्नप्तृभिः[2] । इति ।

यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतत् । यथा । इन्द्राग्नी । पितापुत्रौ । इति ।

यथो एतद् ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्युदितानुवादः स भवति ।

यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा[3] प्रतीयेत ।

यथो एतद् विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतत् । यथा । असपत्नोऽयं[4] ब्राह्मणः । अनमित्रो राजा । इति ।

यथो एतज्जानन्तं संप्रेष्यतीति जानन्तमभिवादयते[5] । जानते मधुपर्कं प्राह [इति[6]] ।

यथो एतददितिः सर्वमिति लौकिकेष्वप्येतत् । यथा । सर्वरसा अनुप्राप्ताः पानीयम् । इति ।

यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति । पुरुषापराधः स भवति । यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारोवर्य-[7] वित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ १६ ॥

III. अथापीदमन्तरेण पदविभागो न विद्यते ।

अवसाय पद्वते रुद्र मृळ[8] । इति ।

पद्वदवसं गावः पथ्यदनम् । अवतेर्गत्यर्थस्यासो नामकरणः । तस्मान्नावगृह्णन्ति ।

---

१. GB. II. 2. 6; cf. AB. 1. 4. 9; 1. 13; 16; 17 etc. The quotation in AB. is found without यजुर्वा.

२. RV. X. 85. 42; AV. 14. 1. 22.

३. cf. Manu V. 39; 44:

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
यज्ञस्य भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः ॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्यात् वेदाद् धर्मो हि निर्बभौ ॥

४. संपन्नो C 5; सपन्नो Mi.

५. cf. Manu II. 130, 122:

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।
असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥
अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ।
असौनामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥

cf. also II. 123–125.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. परोवर्यवित्सु C 5.

८. RV. X. 169. 1.

अव सायाश्वान्[1]। इति।

स्यतिरुपसृष्टो[2] विमोचने[3]। तस्मादवगृह्णन्ति।

दूतो निर्ऋत्या इदमा जगाम[4]। इति।

पंचम्यर्थप्रेक्षा वा। षष्ठ्यर्थप्रेक्षा वा। आःकारान्तम्।

परो निर्ऋत्या आ चक्ष्व[5]। इति।

चतुर्थ्यर्थप्रेक्षा। ऐकारान्तम्।

परः सन्निकर्षः संहिता[6]। पदप्रकृतिः संहिता[7]। पदप्रकृतीनि सर्वचरणानां पार्षदानि।

अथापि यज्ञे[8] दैवतेन बहवः प्रदेशा भवन्ति[9]। तदेतेनोपेक्षितव्यम्। ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति।

इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति[10]। इति।

वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे।

अग्निरिव मन्यो त्विषितः सहस्व[11]। इति।

तथाग्निर्मान्यवे[12] मन्त्रे। त्विषितो ज्वलितः। त्विषिरित्यप्यस्य दीप्तिनाम[13] भवति।

अथापि ज्ञानप्रशंसा भवति। अज्ञाननिन्दा च ॥ १७ ॥

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ[14] इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा[15] ॥
यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्[16] ॥

---

१. RV. I. 104. 1. See Sāyaṇa's commentary on the same.

२. ०रुपस्पृष्टो C 5.

३. cf. SRV. VII. 28. 4. p. iii. 62.

४. RV. X. 165. 1; AV. 6. 27. 1.

५. RV. X. 164. 1; AV. 20. 96. 23.

६. cf. Panini. i. 4. 109; cf. PMbh. i. 4. 4. p. i. 354.

७. RP. 2. 1: 105.

८. यज्ञे C 5.

९. cf. BD. ii. 39, 109 B, 110 B.

१०. RV. VI. 4. 7; VS. 33. 13.

११. RV. X. 84. 2; AV. 4. 31. 2; cf. N. 1. 4.

१२. अथाग्नि Kn.

१३. दीप्तिर्नाम C 4, M 3, Mi.

१४. cf. BD. ii, 119.

१५. cf. S. U. B. 3. Comm. and S'āṅkh. B. XIV.

१६. cf. PMbh. i. 1. 1. p. i. 2:

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

cf. Sāyaṇa's comm. on the *Mantra Brāhmaṇa:*

यदधीतमविज्ञातं......कर्हिचित् ॥

The whole passage: अथापि ज्ञानप्रशंसा......कर्हिचित् is quoted by SRV. p. i. 15.

स्थाणुस्तिष्ठतेः । अर्थोऽर्तेः । अरणस्थो वा ॥ १८ ॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥

अप्येकः पश्यन्न पश्यति वाचम्[3] । अपि च शृण्वन्न शृणोत्येनाम् । इत्यविद्वांसमाहार्धम्[4] । अप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते । ज्ञानं प्रकाशनमर्थस्याह । अनया वाचा । उपमोत्तमया वाचा । जायेव पत्ये कामयमाना सुवासाः [ऋतुकालेषु सुवासाः कल्याणवासाः कामयमानाः] । ऋतुकालेषु यथा स एनां पश्यति स शृणोति । इत्यर्थज्ञप्रशंसा । तस्योत्तरा भूयसे निर्वचनाय ॥ १९ ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥

अप्येकं वाक्सख्ये । स्थिरपीतमाहु रममाणं विपीतार्थम् । देवसख्ये । रमणीये स्थान इति वा । विज्ञातार्थम् । यं नाप्नुवन्ति वाग्ज्ञेयेषु बलवत्स्वपि । अधेन्वा ह्येष चरति मायया । वाक्प्रतिरूपया । नास्मै कामान्दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु यो वाचं श्रुतवान् भवत्यफलामपुष्पामिति । अफलास्मा अपुष्पा वाग्भवतीति वा । किंचित्पुष्पफलेति वा । अर्थं वाचः पुष्पफलमाह । याज्ञदैवते[11] पुष्पफले । देवताध्यात्मे वा ।

साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन[12]

---

१. cf. SRV. II. 39. 1; V. 43. 1; pp. ii. 117, 587: अर्थोऽर्तेरिति यास्कः ।

२. RV. X. 71. 4; cf. N. 1. 8.

३. cf. SRV. X. 71. 4. p. IV. 221: अप्येकः......वाचमित्यादि निरुक्तमत्र द्रष्टव्यम् ।

४. ०र्थम् C 4, C 5.

५. cf. PM bh. i. 1. 1. p. i. 4.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3 and Durga.

७. Sāyaṇa reads अर्थज्ञस्य प्रशंसा See SRV. p. i. 16.

८. Quoted by SRV. p. i. 17.

९. RV. X. 71. 5; cf. N. 1. 8.

१०. cf. SRV. X. 71. 5. p. IV. 221: अप्येकं.........पीतमित्यादि निरुक्तमनुसंधेयम् ।

११. याज्ञदेवते C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

१२. The whole passage साक्षात्कृत... वेदाङ्गानि च is quoted by Helārāja in his commentary on the *Vākyapadīya* of Bhartṛhari; Ben. S. S. Vol. II. I. p. 39. (1905).

मन्त्रान्संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुः[1]। वेदं च वेदाङ्गानि च[2]। बिल्मं[3] भिल्मं भासनमिति वा।

एतावन्तः समानकर्माणो धातवः। धातुर्दधातेः। एतावन्त्यस्य सत्त्वस्य नामधेयानि। एतावतामर्थानामिदमभिधानम्। नैघंटुकमिदं देवतानाम। प्राधान्येनेदमिति। तद् यदन्यदैवते[4] मन्त्रे निपतति नैघंटुकं तत्[5]।

अश्वं न त्वा वारवन्तम्[6]।

अश्वमिव त्वा वालवन्तम्। वाला दंशवारणार्था भवन्ति। दंशो दशतेः।

मृगो न भीमः कुचरो गिरिष्ठाः[7]।

मृग इव भीमः कुचरो गिरिष्ठाः। मृगो मार्ष्टेर्गतिकर्मणः[8]। भीमो बिभ्यत्यस्मात्[9]। भीष्मोऽप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सितम्[10]। अथ चेद् देवताभिधानम्। क्वायं न चरतीति। गिरिष्ठा गिरिस्थायी। गिरिः पर्वतः। समुद्गीर्णो भवति। पर्ववान् पर्वतः। पर्व पुनः पृणातेः प्रीणातेर्वा[11]। अर्धमासपर्व। देवानस्मिन्प्रीणन्तीति। तत् प्रकृतीतरत्सन्धिसामान्यात्। मेघस्थायी। मेघोऽपि गिरिरेतस्मादेव।

तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतमित्याचक्षते। तदुपरिष्टाद् व्याख्यास्यामः[12]। नैघण्टुकानि नैगमानीहेह ॥ २० ॥

इति प्रथमोऽध्यायः।

---

१. संप्राहुरुपदेशात् Helārāja. *op. cit.*

२. चेत्यागमप्रामाण्यात् । Helārāja. *op. cit.*

३. Harivṛṣabha in his commentary on the *Vākyapadīya* of Bhartṛhari Ben. S. S. Nos. 11, 19, 24. (1887) p. 3. remarks: ऋषयः साक्षात्कृतधर्माणो...बिल्मं समामनन्ति...वेदवेदाङ्गानि बिल्मः।

४. ०दैवते C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

५. cf. BD. i. 18, 19:

मन्त्रेऽन्यदैवतेऽन्यानि निगद्यन्तेऽत्र कानिचित्। सालोक्यात्साहचर्याद्वा तानि नैपातिकानि तु ॥

६. RV. I. 27. 1; SV. 1. 17; 2. 984.

७. RV. I. 154. 2; X. 180. 2.

८. Quoted by SRV. I. 145. 5. p. i. 645.

९. Quoted by SRV. I. 55. 1. p. i. 278.

१०. cf. BD. i. 33: अपि कुत्सितनामायम्।

११. Quoted by SRV. I. 145. 2. p. i. 662. cf. also I. 51. 5; V. 56. 4; VIII. 63. 12.

१२. See N. 7-12.

[समाम्नायस्त[2]त्रैचतुष्ट्व[3]मेतोऽन्येऽ[4]थ निपाता [5]वायुर्वात्वा [6]न नूनं [7]नूनं सा त [8]ऋर्चा-न्त्वोऽ[9]क्षेण्वन्तो नि[10]ष्ट्वक्रासो[11] हवि[12]र्भिरितीमान्य[13]थापि यो [14]यथो हि न्व[15]थापीद[16]मेर्थवन्तो-ऽ[17]थापीदं स्था[18]णुरयमुत [19]त्वः पश्यन्नु[20]तै त्वं सख्ये विंशतिः ॥]

॥ इति निरुक्ते पूर्वषट्के प्रथमोऽध्यायः समाप्तः ॥

Small figure on this page represents the corresponding section of the first chapter of the *Nirukta*.

अथ द्वितीयोऽध्यायः ।

अथ निर्वचनम् । तद् येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणा[1]न्वितौ स्यातां[2] तथा तानि निर्ब्रूयात् । अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत । केनचिद् वृत्तिसामान्येन । अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात् । न त्वेव न निर्ब्रूयात्[3] । न संस्कारमाद्रियेत[4] । विशयवत्यो[5] . वृत्तयो भवन्ति । यथार्थं विभक्तीः सन्नमयेत् ।

प्रत्तमवत्तमिति धात्वादी एव शिष्येते । अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति । स्तः । सन्तीति । अथाप्यन्तलोपो भवति । गत्वा । गतमिति । अथाप्युपधालोपो भवति । जग्मतुः । जग्मुरिति[6] । अथाप्युपधाविकारो भवति । राजा[7] । दण्डीति । अथापि वर्णलोपो भवति । तत्त्वा यामि । इति । अथापि[8] द्विवर्णलोपः । तृच इति । अथाप्यादिविपर्ययो भवति । ज्योतिः । घनः । बिन्दुः । वाट्य इति । अथाप्याद्यन्तविपर्ययो भवति । स्तोकाः । रज्जुः । सिकताः । तर्क्विति[9] ।

अथाप्यन्तव्यापत्तिर्भवति ॥ १ ॥

ओघः । मेघः । नाधः । गाधः । वधूः । मध्विति । अथापि वर्णोपजनः । आस्थत् । द्वारः । भरूजेति ।

तद् यत्र स्वरादनन्तरान्तस्थान्तर्धातुर्भवति तद् द्विप्रकृतीनां स्थानमिति प्रदिशन्ति । तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत् । तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति । तद् यथैतत् । ऊतिः । मृदुः । पृथुः । पृषतः । कुणारुमिति ।

---

१. गुणेन. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Durga; Roth's and S'ivadatta's edition.

२. cf. N. I. 14.

३. cf. SRV. I. 1. 1. p. i. 25.

४. Quoted in the *Māṭhara Vṛtti* on the *Sāṅkhyakārikā* XXII. ed. by Sāhityācārya. Benares 1922, p. 37 :

अप्यक्षरवर्णसामान्यान्निर्ब्रूयात् । न संस्कारमाद्रियेत् । इति नैरुक्तश्रुतिप्रामाण्यात् ।. It should be noted that the intervening sentence न त्वेव् न निर्ब्रूयात् is omitted and the *Nirukta* is raised to the dignity of a *S'ruti.*

५. विषयवत्यो C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; M 3, Mi.

६. cf. PMbh. VI. 1. 1. p. iii. 17; उपधालोपस्यावकाशः ...जग्मतुः । जग्मुः । जघ्नतुः । जघ्नुः ।

७. राला. C 5.

८. cf. BD. ii. 116.

९. cf. PMbh. i. 1. 2. p. i. 31। कृतेस्तर्कुः । कसेः सिकताः । हिंसेः सिंहः । cf. also Vol. ii. p. 87. कृतेराद्यन्तविपर्ययश्च ॥ uṇā. Sū. 1. 17. Aufrecht's edition p. 7.

अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते। दमूनाः। क्षेत्रसाधा इति। अथापि नैगमेभ्यो भाषिकाः। उष्णम्। घृतमिति।

अथापि प्रकृतय एवैकेषु भाष्यन्ते। विकृतय एकेषु।[1] शवतिर्गतिकर्मा कंबोजेष्वेव भाष्यते। कंबोजाः कंबलभोजाः।[2] कमनीयभोजा वा। कंबलः कमनीयो भवति। विकारमस्यार्येषु भाषन्ते। शव इति। दातिर्लवनार्थे प्राच्येषु। दात्रमुदीच्येषु[3]। एवमेकपदानि निर्ब्रूयात्।

अथ तद्धितसमासेष्वेकपर्वसु [4]चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्। दण्ड्यः पुरुषः [दण्डपुरुषः][5]। दण्डमर्हतीति[6] वा। दण्डेन संपद्यत इति वा। दण्डो ददातेर्धारयतिकर्मणः। अक्रूरो ददते[7] मणिमित्यभिभाषन्ते। दमनादित्यौपमन्यवः। दण्डमस्याकर्षतीति[8] गर्हायाम्।

कक्ष्यारज्जुरश्वस्य[9]। कक्षं सेवते। कक्षो गाहतेः। क्स इति नामकरणः। ख्यातेर्वानर्थकोऽभ्यासः। किमस्मिन् ख्यानमिति। कषतेर्वा। तत्सामान्यान्मनुष्यकक्षः। बाहुमूलसामान्यादश्वस्य॥ २॥

राज्ञः पुरुषो राजपुरुषः। राजा राजतेः। पुरुषः पुरि षादः[10]। पुरि शयः। पूरयतेर्वा। पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य।

यस्मात्परं नापरमस्ति किंचिद्[11] यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्[12]॥ ३॥

इत्यपि निगमो भवति।

विश्वकद्राकर्षः। वीति चकद्र इति श्वगतौ भाष्यते। द्रातीति गतिकुत्सना। कद्रातीति द्रातिकुत्सना। चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः। तदस्मिन्नस्तीति विश्वकद्रः।

कल्याणवर्णरूपः। कल्याणवर्णस्येवास्य रूपम्। कल्याणं कमनीयं भवति। वर्णो वृणोतेः। रूपं रोचतेः। एवं तद्धितसमासान्निर्ब्रूयात्।

---

१. cf. PMbh. i. 1. 1. p. i. 9; शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति।

२. कंबल...भवति is quoted by Kṣīrasvāmin in his commentary on the *Amarakoṣa* II. 9. 107. Poona ed. (1913) p. 157.

३. cf. PMbh. i. 1. 1. p. i. 9; विकार एनमार्या भाषन्ते शव इति...दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु।

४. चानेक०. C 1, C 2, C 3, C 6, M 1, M 2 R 1, R 2, R 5, S; C 4, C 5, Mi, W 1, W 2; Roth's edition.

५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

६. cf. BD. ii. 106.

७. ददते०. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

८. ०कर्षतेति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

९. cf. SRV. I. 126. 4. p. i. 571: कक्ष्यारज्जुरश्वस्येति यास्केनोक्तत्वात्।

१०. पुरुशादः W 2.

११. किंचित् C 2, C 3, C 4, C 5, C 6, M 3, Mi, W 1, W 2.

१२. TA. 10. 10. 3: Mu. 10. 4.

नैकपदानि निर्ब्रूयात्। नावैयाकरणाय। नानुपसन्नाय। अनिदंविदे वा। नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया। उपसन्नाय तु निर्ब्रूयात्। यो वालं विज्ञातुं स्यात्। मेधाविने। तपस्विने वा॥ ३॥

विद्या ह वै ब्राह्मणमा जगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्॥
य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सं प्रयच्छन्।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाह॥
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्॥
यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्॥

इति। निधिः शेवधिरिति॥ ४॥

अथातोऽनुक्रमिष्यामः। गौरिति पृथिव्या नामधेयम्। यद् दूरं गता भवति। यच्चास्यां भूतानि गच्छन्ति। गातेर्वौकारो नामकरणः।

अथापि पशुनामेह भवत्येतस्मादेव। अथाप्यस्यां ताद्धितेन कृत्स्नवन्निगमा भवन्ति।

गोभिः श्रीणीत मत्सरम्।

इति पयसः। मत्सरः सोमः। मन्दतेस्तृप्तिकर्मणः। मत्सर इति लोभनाम। अभिमत्त एनेन धनं भवति। पयः पिबतेर्वा प्यायतेर्वा। क्षीरं क्षरतेः। घसेर्वेरो नामकरणः। उशीरमिति यथा।

अंशुं दुहन्तो अध्यासते गवि।

इत्यधिषवणचर्मणः। अंशुः शमष्टमात्रो भवति। अननाय शं भवतीति वा। चर्म चरते र्वा। उच्चृतं भवतीति वा।

अथापि चर्म च श्लेष्मा च।

---

१. cf. Manu II. 114; Su. III.; Vas. II. 8; Viṣṇu XXIX. 9.

२. आतृण्त्त्ववि॰. C 5.

३. cf. Manu II. 144; Vas. II. 10; Viṣṇu. XXX. 47; Āp. I. 1. 14.

४. cf. Manu II. 115; Vas. II. 9; Viṣṇu XXIX. 10.

५. All the 4 verses are found in SU. B. 3. (Burnell. pp. 29-32). Quoted by SRV. p. i. 22.

६. cf. SRV. I. 158. 2. p. i. 672: तथा च निरुक्तं गौरिति...नामकरणः। cf. S'B. VI. 1. 2. 34. Weber's ed. p. 505: इमे वै लोका गौर्यद्धि किं च गच्छतीमांस्तल्लोकान् गच्छति।

७. RV. IX. 46. 4.

८. RV. X. 94. 9.

९. Quoted by SRV. IX. 89. 6; 97. 14; pp. iii. 759, 780.

गोभिः सन्नद्धो असि वीळयस्व[1] ।

इति रथस्तुतौ । अथापि स्नाव च श्लेष्मा च ।

गोभिः सन्नद्धा पतति प्रसूता[2] ।

इतीषुस्तुतौ ।

ज्यापि गौरुच्यते । गव्या चेत् ताद्धितम् । अथ चेन्न । गव्या गमयतीषूनिति ॥ ५ ॥

वृक्षेवृक्षे नियता मीमयद् गौस्ततो वयः प्र पतान्पूरुषादः[3] ।

वृक्षेवृक्षे धनुषिधनुषि । वृक्षो व्रश्चनात् [वृत्वा क्षां तिष्ठतीति वा । क्षाक्षियते। निवासकर्मणः[4]] नियता मीमयद् गौः शब्दं करोति । मीमयतिः शब्दकर्मा[5] । ततो वयः प्रपतन्ति । पुरुषानदनाय[6] । विरिति शकुनिनाम । वेतेर्गतिकर्मणः । अथापीषुनामेह भवत्येतस्मादेव ।

आदित्योऽपि गौरुच्यते ।

उतादः परुषे गवि[7] ।

पर्ववति भास्वतीत्यौपमन्यवः । अथाप्यस्यैको रश्मिश्चंद्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यम् । आदित्यतोऽस्य दीप्तिर्भवति ।

सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः[8] ।

इत्यपि निगमो भवति । सोऽपि गौरुच्यते ।

अत्राह गोरमन्वत[9] ।

इति । तदुपरिष्टाद्[10] व्याख्यास्यामः । सर्वेऽपि रश्मयो गाव उच्यन्ते ॥ ६ ॥

---

१. RV. VI. 47. 26; AV. 6. 125. 1; cf. N. 9. 12.

२. RV. VI. 75. 11; VS. 29. 48; cf. N. 9. 12.

३. RV. X. 27. 22.

४. Omitted by BK, C 4, C 5, Kn, M3, Mi, R 4, R 6, W 1, W 2, W 3.

५. Quoted by SRV. VI. 75. 11. p. ii. 890.

६. cf. BD. ii. 111.

७. RV. VI. 56. 3.

८. VS. 18. 40; S'B. IX. 4. 1. 9; cf. सुषुम्नः etc. TS. 111. 4. 7. 1.

९. RV. I. 84. 15; AV. 20. 41. 3; SV. 1. 147; 2. 265; cf. N. 4. 25. The passage: अथाप्यस्यैको...गोरमन्वतेति is quoted by SRV. I. 84. 15; p. i. 379.

१०. N. 4. 25.

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि॥[1]

तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो [भूरिशृंगा][2] बहुशृंगाः। भूरीति बहुनो[3] नामधेयम्। प्रभवतीति सतः। शृंगं श्रयतेर्वा। शृणातेर्वा। शम्नातेर्वा। शरणायोद्गतमिति वा। शिरसो निर्गतमिति वा। अयासोऽयनाः[4]। तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादः पद्यतेः। तन्निधानात् पदम्। पशुपादप्रकृतिः प्रभागपादः। प्रभागपादसामान्यादितराणि पदानि।[5]

एवमन्येषामपि सत्त्वानां संदेहा विद्यन्ते। तानि चेत् समानकर्माणि समाननिर्वचनानि। नानाकर्माणि चेन्नानानिर्वचनानि। यथार्थं निर्वक्तव्यानि। इतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि।

तत्र निर्ऋतिर्निरमणात्। ऋच्छतेः कृच्छ्रापत्तिरितरा। सा पृथिव्या संदिह्यते। तयोर्विभागः। तस्या एषा भवति॥ ७॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश॥[6]

बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः। वर्षकर्मेति नैरुक्ताः। य ईं चकारेति करोतिकिरती संदिग्धौ वर्षकर्मणा। न सो अस्य वेद मध्यमः। स एवास्य वेद मध्यमो यो ददर्शादित्योपहितम्। स मातुर्योनौ। मातान्तरिक्षम्। निर्मीयन्तेऽस्मिन् भूतानि। योनिरन्तरिक्षम्। महानवयवः। परिवीतो वायुना। अयमपीतरो योनिरेतस्मादेव। परियुतो भवति। बहुप्रजा भूमिमापद्यते वर्षकर्मणा।[7]

शाकपूणिः संकल्पयाञ्चक्रे। सर्वा देवता जानानीति[8]। तस्मै देवतोभयलिङ्गा प्रादुर्बभूव। तां न जज्ञे। तां पप्रच्छ। विविदिषाणि त्वेति। सास्मा एतामृचमादिदेश। एषा मद् देवतेति[9]॥ ८॥

अयं स शिंक्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत॥[10]

---

१. RV. I. 154. 6.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. बहुलो BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. अयनात् C 4, M 3, Mi, W 1.

५. cf. SRV. I. 154. 6. p. i. 664. अयं मन्त्रो यास्केन...व्याख्यातः। तानि वां... पादः पद्यतेः। cf. PMbh. i. 2. 3. p. 1. 247: पद्यतेः पादः।

६. RV. I. 164. 32; AV. 9. 10. 10.

७. Quoted by SRV. I. 160. 2. p. i. 674.

८. जानामीति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

९. SRV. I. 164. 29. p. i. 709; सा चायं स शिंक्त इत्येषा मद् देवता तत्र प्रतीयमानं मत्स्वरूपमित्युपदिदेश।

१०. RV. I. 164. 29; AV. 9. 10. 7.

अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति । मायुं शब्दं करोति । मायुमिवादित्यमिति वा । वागेषा माध्यमिका । ध्वंसने मेघेऽधिश्रिता । सा चित्तिभिः [कर्मभिर्नीचैः[1]] निकरोति मर्त्यम् । विद्युद्भवन्ती प्रत्यूहते वव्रिम् । वव्रिरिति रूपनाम । वृणोतीति सतः । वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ॥ ९ ॥

[2] हिरण्यनामान्युत्तराणि पंचदश । हिरण्यं कस्मात् । ह्रियत आयम्यमानमिति वा । ह्रियते जनाज्जनमिति वा । हितरमणं भवतीति वा [हृदयरमणं भवतीति वा][3] । हर्यतेर्वा स्यात् प्रेप्साकर्मणः[4] ।

अन्तरिक्षनामान्युत्तराणि षोडश[5] । अन्तरिक्षं कस्मात् । अन्तरा क्षान्तं भवति । अन्तरेमे इति वा । शरीरेष्वन्तरक्षयमिति[6] वा ।

तत्र समुद्र इत्येतत् पार्थिवेन समुद्रेण संदिह्यते । समुद्रः कस्मात् । समुद्द्रवन्त्यस्मादापः । समभिद्रवन्त्येनमापः[7] । संमोदन्तेऽस्मिन्भूतानि । समुदको भवति । समुनत्तीति वा । तयोर्विभागः ।

तत्रेतिहासमाचक्षते । देवापिश्चार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः[8] । स शंतनुः कनीयान्[9]भिषेचयांचक्रे । देवापिस्तपः प्रतिपेदे । ततः शंतनो राज्ये द्वादश वर्षाणि देवो न ववर्ष[10] । तमूचुर्ब्राह्मणाः । अधर्मस्त्वया चरितः । ज्येष्ठं भ्रातरमन्तरित्याऽभिषेचितम् । तस्मात्ते देवो न वर्षतीति । स शंतनुर्देवापिं शिशिक्ष राज्येन । तमुवाच देवापिः । पुरोहितस्तेऽसानि । याजयानि च त्वेति[11][12] । तस्यैतद् वर्षकामसूक्तम्[13] । तस्यैषा भवति ॥ १० ॥

आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या[14] अभि[15] ॥

आर्ष्टिषेण ऋष्टिषेणस्य पुत्रः । इषितसेनस्येति वा । सेना सेश्वरा । समानग-

---

१. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

२. Quoted by SRV. III. 54. 11. p. ii. 309; cf. also VI. 72. 3. p. ii. 882.

३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

४. The whole passage : हिरण्यं कस्मात्... प्रेप्साकर्मणः is quoted by SRV. I. 22. 5. p. i. 115.

५. षोलश C 5, Mi.

६. ०न्तरिक्षयमिति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2; W 3.

७. The passage समुद्रः कस्मात्...समुनत्तीति वा। is quoted by SRV I. 30. 18. p. i. 156; cf. also I. 160. 4, VI. 72. 3; pp. i. 675; ii. 884.

८. cf. BD. VII. 155.

९. कलीयान् C 5.

१०. cf. BD. VII. 156; VIII. 1.

११. cf. BD. VIII. 2.

१२. cf. BD. VIII. 4–5.

१३. cf. SRV. X. 98. 1. p. IV. 324.

१४. RV. X. 98. 5.

१५. cf. SRV. X. 98. 5. p. IV. 325.

निर्वा । पुत्रः पुरु त्रायते । निपरणाद्वा । पुन्नरकं ततस्त्रायत इति वा । होत्रमृषिर्निषीदन् । ऋषिर्दर्शनात् । स्तोमान्ददर्शेत्यौपमन्यवः ।

तयदेनांस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत [न ऋषयोऽभवन्[3]] तदृषीणामृषित्वम्[4] ।

इति विज्ञायते । देवापिर्देवानामाप्त्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान् । स उत्तरस्मादधरं समुद्रम् । उत्तर उद्धततरो भवति । अधरोऽधोरः । अधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा । तस्योत्तरा भूयसे निर्वचनाय ॥ ११ ॥

यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्[6] ॥

शन्तनुः शं तनोऽस्त्विति वा । शमस्मै तन्वा अस्त्विति वा । पुरोहितः पुर एनं दधति । होत्राय वृतः कृपायमाणोऽन्वध्यायत् । देवश्रुतं देवा एनं शृण्वन्ति [वृष्टिवनिं] वृष्टियाचिनम् । रराणो रातिरभ्यस्तः । बृहस्पतिर्ब्रह्मासीत् । सोऽस्मै वाचमयच्छत् । बृहदुपव्याख्यातम् ॥ १२ ॥

साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च । यानि त्वस्य प्राधान्येनोपरिष्टात्तानि व्याख्यास्यामः । आदित्यः कस्मात् । आदत्ते रसान् । आदत्ते भासं ज्योतिषाम् । आदीप्तो भासेति वा । अदितेः पुत्र इति वा । अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् ।

सूर्यमादितेयम्[11] ।

[अदितेः पुत्रम्[12]] । एवमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति । तद् यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येति ।

अथापि मित्रावरुणयोः ।

---

१. cf. SRV. I. 68. 10; 40. 2; 125. 3; pp. i. 329, 212, 568. cf. Manu. IX. 138.

२. Quoted by SRV. IX. 96. 6. p. iii. 770.

३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. TA. ii. 9. The words within the brackets are not omitted in TA.

५. Quoted by SRV. I. 70. 6. p. i. 333.

६. RV. X. 98. 7.

७. Quoted by SRV. I. 1. 1. p. i. 24. cf. BD. VIII. 6.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

९. cf. BD. VIII. 8 B.

१०. See N. 12. 8–22.

११. RV. X. 88. 11; cf. N. 7. 29.

१२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

आदित्या दानुनस्पती ।[1]

दानपती । अथापि मित्रस्यैकस्य ।

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।[2]

इत्यपि निगमो भवति । अथापि वरुणस्यैकस्य

अथा वयमादित्य व्रते तव ।[3]

व्रतमिति कर्मनाम । निवृत्तिकर्म वारयतीति सतः ।[4] इदमपीतरद्व्रतमेतस्मादेव वृणोतीति सतः ।[5] अन्नमपि व्रतमुच्यते । यदावृणोति शरीरम् ॥ १३ ॥

स्वरादित्यो भवति । सु अरणः । सु ईरणः । स्वृतो रसान् । स्वृतो भासं ज्योतिषाम् । स्वृतो भासेति वा[6] । एतेन द्यौर्व्याख्याता । पृश्निरादित्यो भवति । प्राश्नुत एनं वर्ण इति नैरुक्ताः । संस्प्रष्टा रसान् । संस्प्रष्टा भासं ज्योतिषाम् । संस्प्रष्टो भासेति वा । अथ द्यौः । संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च ।

नाक आदित्यो भवति [नेता रसानाम्[8]] नेता भासाम् । ज्योतिषां प्रणयः । अथ द्यौः । कमिति सुखनाम । तत्प्रतिषिद्धं प्रतिषिध्येत ।

न वा अमुं लोकं जग्मुषे किं च नाकम्[9] ।

न वा अमुं लोकं जग्मुषे[10] किं च नासुखम् । पुण्यकृतो ह्येव तत्र गच्छन्ति ।

गौरादित्यो भवति । गमयति रसान् । गच्छत्यन्तरिक्षे । अथ द्यौः । यत्पृथिव्या अधिदूरं गता भवति । यच्चास्यां ज्योतींषि गच्छन्ति । विष्टबादित्यो[11] भवति । आविष्टो रसान् । आविष्टो भासं ज्योतिषाम् । आविष्टो भासेति वा । अथ द्यौः । आविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च ।

नभ आदित्यो भवति । [नेता रसानां[12]] । नेता भासाम् । ज्योतिषां प्रणयः[13] । अपि वा भन एव स्याद्विपरीतः ।

---

१. RV. I. 136. 3; II. 41. 6; SV. 2, 262.

२. RV. III. 59. 2.

३. RV. I. 24. 15; VS. 12. 12.

४. वृणोतीति सतः Durga and Bib. Ind.

५. निवृत्तिकर्म वारयतीति सतः Durga and Bib. Ind.

६. Cf. SRV. I. 112. 5; 148. 1; VII. 10. 2. pp. i. 488; 650; iii. 25.

७. Cf. SRV. IX. 83. 3. p. iii. 734

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

९. The quotation is untraced. Cf. SRV. I. 125. 5. p. i. 569.

१०. गतवते C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; and Roth, edition.

११. विष्टपा° C 3; विष्टवा°. W 1.

१२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

१३. प्रभवः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

न न भातीति वा । एतेन द्यौर्व्याख्याता ॥ १४ ॥

रश्मिनामान्युत्तराणि पञ्चदश । रश्मिर्यमनात् । तेषामादितः साधारणानि पञ्चाश्वरश्मिभिः ।

दिङ्नामान्युत्तराण्यष्टौ । दिशः कस्मात् । दिशतेः । आसदनात् । अपि वाभ्यशनात् ।

तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य [नाम[1]] भवति । काष्ठा दिशो भवन्ति । क्रान्त्वा स्थिता भवन्ति । काष्ठा उपदिशो भवन्ति । इतरेतरं क्रान्त्वा स्थिता भवन्ति । आदित्योऽपि काष्ठोच्यते । क्रान्त्वा स्थितो भवति । आज्यन्तोऽपि[2] काष्ठोच्यते । क्रान्त्वा स्थितो भवति[3] । आपोऽपि काष्ठा उच्यन्ते । क्रान्त्वा स्थिता भवन्तीति[4] स्थावराणाम् ॥ १५ ॥

> अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
> वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ।[5]

अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरं शृणातेः । शम्नातेर्वा । वृत्रस्य [निण्यं[6]] निर्णामं विचरन्ति विजानन्त्याप इति । दीर्घं द्राघतेः[7] । तमस्तनोतेः । आशयदाशेतेः[8] । इन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा । तस्मादिन्द्रशत्रुः । तत्को वृत्रः । मेघ इति नैरुक्ताः । [त्वाष्ट्रोऽसुर इत्यैतिहासिकाः[9] ।] अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । तत्रोपमार्थेन युद्धवर्णा भवन्ति । अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च । विवृद्ध्या शरीरस्य स्रोतांसि निवारयाञ्चकार । तस्मिन् हते प्रसस्यन्दिर[10] आपः । तदभिवादिन्येषर्ग्भवति ॥ १६ ॥

---

1. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
2. आज्यन्त्वो W 1; आज्यत्यंतो C 5.
3. Cf. SRV. VIII. 80. 8; X. 103. 9. pp. iii. 529; IV. 340.
4. Cf. SRV. I. 37. 10. p. i. 202.
5. RV. I. 32. 10.
6. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3
7. जाघतेः C 5.
8. ०दाशयतेः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
9. त्वाष्ट्रो...इत्यैतिहासिकाः is omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga. The passage अतिष्ठन्तीनाम...इत्यैतिहासिकाः is quoted by SRV. I. 32. 10. p. i. 170.
10. प्रशस्यन्दिर BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

दा॒सप॑त्नी॒रहि॑गोपा अतिष्ठ॒न्निरु॑द्धा॒ आप॑: प॒णिने॑व॒ गाव॑: ।
अ॒पां बिल॒मपि॑हितं॒ यदासी॑द्वृ॒त्रं ज॑घ॒न्वाँ अप॒ तद्व॑वार ॥[1]

दासपत्नीर्दासाधिपत्न्यः। दासो दस्यतेः। उपदासयति कर्माणि। अहिगोपा अतिष्ठन्। अहिना गुप्ताः। अहिरयनात्। एत्यन्तरिक्षे।

अयमपीतरोऽहिरेतस्मादेव। निर्ह्रसितोपसर्गः। आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग्भवति। पणिः पणनात्। वणिक् पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेः। वृत्रं जघ्निवान्। अपववार तत्। वृत्रो वृणोतेर्वा वर्ततेर्वा। वर्धतेर्वा।

यदवृणोत्तद्[4] वृत्रस्य वृत्रत्वम्[5]। इति विज्ञायते। यदवर्तत तद्[3] वृत्रस्य वृत्रत्वम्। इति विज्ञायते। यदवर्धत तद्[3] वृत्रस्य वृत्रत्वम्। इति विज्ञायते ॥ १७ ॥

रात्रिनामान्युत्तराणि त्रयोविंशतिः[6]। रात्रिः कस्मात्। प्ररमयति भूतानि नक्तञ्चारीणि। उपरमयतीतराणि[7] ध्रुवीकरोति। रातेर्वा[8] स्याद्दानकर्मणः। प्रदीयन्तेऽस्यामवश्यायाः।

उषोनामान्युत्तराणि षोडश[9]। उषाः कस्मात्। उच्छतीति सत्याः[10]। रात्रेरपरः कालः[11]। तस्या एषा भवति ॥ १८ ॥

इ॒दं श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॒राग॑ाच्चि॒त्रः प्र॑के॒तो अ॑जनिष्ट॒ विभ्वा॑ ।
यथा॒ प्रसू॑ता सवि॒तुः स॒वाय॑ँ ए॒वा रात्र्यु॒षसे॒ योनि॑मारैक्[12] ॥

इदं श्रेष्ठं[14] ज्योतिषां ज्योतिरागमत्। चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमम्। यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे[13] योनिमरिचत् स्थानम्[14]। स्त्रीयोनिरभियुत एनां गर्भः।

तस्या एषापरा भवति ॥ १९ ॥

---

१. RV. I. 32. 11.

२. Cf. BD. V. 166.

३. तद् C 4, Mi, W 1, W 2.

४. Cf. TS. 11. 4. 12. 2. स इमाँल्लोकानवृणोत्। यदिमाँल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्।

५. All the three quotations are untraced. The passage: दासपत्नी... विज्ञायते in quoted by SRV. I. 32. 11. p. i. 170; Cf. also I. 124. 10. p. i. 566.

६. ०विंशती BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3

७. प्ररमयति......इतराणि is quoted by SRV. III. 34. 4. p. ii. 249.

८. Cf. BD. iii. 9.

९. षोलश C 3, C 5.

१०. Cf. BD. III. 9.

११. Cf. BD. iii. 8. Dawn is a *kalā i. e.* 16th portion of night.

१२. RV. I. 113. 1; SV. 2. 1099.

१३. The text seems to be corrupt. I propose to read उषाः for रात्रिः, this will make the line intelligible.

१४. इदं श्रेष्ठं...स्थानम् is quoted SRV. I. 113. 1. p. i. 496.

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥

रुशद्वत्सा सूर्यवत्सा । रुशदिति वर्णनाम । रोचतेर्ज्वलतिकर्मणः । सूर्यमस्या वत्समाह । साहचर्यात् । रसहरणाद्वा । रुशती श्वेत्यागात् । श्वेत्या श्वेततेः । अरिचत् कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः । कृष्णं कृष्यतेः । निकृष्टो वर्णः । अथैने संस्तौति । समानबन्धू समानबन्धने । अमृते अमरणधर्माणौ । अनूची [अनूच्याविति] । इतीतरेतरमभिप्रेत्य । द्यावा वर्णं चरतः । ते एव द्यावौ । द्योतनात् । अपि वा द्यावा चरतस्तया [सह] चरत इति स्यात् । आमिनाने [आमिन्वाने] । अन्योन्यस्याध्यात्मं कुर्वाणे ।

अहर्नामान्युत्तराणि द्वादश । अहः कस्मात् । उपाहरन्त्यस्मिन् कर्माणि । तस्यैष निपातो भवति वैश्वानरीयायामृचि ॥ २० ॥

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥

अहश्च कृष्णं रात्रिः । शुक्लं चाहरर्जुनम् । विवर्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिः । वैश्वानरो जायमान इव । उद्यन्नादित्यः । सर्वेषां ज्योतिषां राजा । अवाहन्नग्निर्ज्योतिषा तमांसि ।

मेघनामान्युत्तराणि त्रिंशत् । मेघः कस्मात् । मेहतीति सतः । आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः । उपर उपलो मेघो भवति । उपरमन्तेऽस्मिन्नभ्राणि । उपरता आप इति वा । तेषामेषा भवति ॥ २१ ॥

देवानां माने प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन् ।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् ॥

---

१. RV. I. 113. 2.

२. Cf. SRV. VI. 64. 1. p. ii. 865.

३. Cf. SRV. I. 92. 2. p. i. 410.

४. Cf. SRV. I. 35. 2; 123. 2. pp. i. 186, 557.

५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

७. The passage रुशद्वत्सा...कुर्वाणे is quoted by SRV. I. 113. 2. p. i. 497.

८. RV. VI. 9. 1.

९. विद्याभि॰ C 6.

१०. मेहयतीति C 4, W 1.

११. RV. X. 27. 23.

देवानां निर्माणे प्रथमा अतिष्ठन्माध्यमिका देवगणा[1]ः । प्रथम इति मुख्यनाम । प्र[2]तमो भव[3]ति । [कृन्तत्रमन्तरिक्षम् । विकर्तनं मेघानाम्[4] ।] विकर्तनेन मेघाना-मुदकं जायते । त्रयस्तपन्ति पृथिवीमनूपाः । पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्ति । अनूपा अनुवपन्ति लोकान्स्वेन स्वेन कर्मणा । अयमपीतरोऽनूप एतस्मादेव । अनूप्यत उदकेन । अपि वान्वाविति स्यात् । यथा प्रागिति । तस्यानूप इति स्यात् । यथा प्राचीनमिति । द्वा बृबूकं वहतः पुरीषं । वाय्वादित्या उदकम् । बृबूकमित्युदकनाम । ब्रवीतेः [वा[4]] शब्दकर्मणः । भ्रंशतेर्वा । पुरीषं पृणातेः[5] । पूरयतेर्वा ॥ २२[6] ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत् । वाक् कस्मात् । वचेः । तत्र सरस्वतीत्ये-तस्य नदीवद्देवतावच्च निगमा भव[7]न्ति । तद् यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामः । अथैतन्नदीवत् ॥ २३ ॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।

पा[8]रावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः[9] ।

इयं शुष्मैः शोषणैः । शुष्ममिति बलनाम । शोषयतीति सतः । बिसं बिस्यते-र्भेदनकर्मणः । वृद्धिकर्मणो वा । सानु स[10]मुच्छ्रितं भव[11]ति । समु[12]न्नुन्नमिति वा । महद्भिरू-र्मिभिः । पारावतघ्नीं पारावारघातिनीम्[13] । पारं परं भवति । अवारमवरम् । अवनाय सुप्र[14]वृत्ताभिः [शोभना[15]भिः] स्तुतिभिः सरस्वतीं [नदीं[15]] कर्मभिः परिचरेम ।

उदकनामान्युत्तराण्येकशतम् । उदकं कस्मात् । उनत्तीति सतः ।

नदीनामान्युत्तराणि सप्तत्रिंशत् । नद्यः कस्मात् । नदना [इमा[15]] भवन्ति । शब्दवत्यः । बहुलमासां नैघ[16]ण्टुकं वृत्तम् । आश्चर्यमिव प्राधान्येन ।

त[17]त्रेतिहासमाचक्षते । विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव ।

---

१. Cf. SRV. X. 27. 23. p. IV. 80.

२. प्रथमो C 5, M 3, Mi, W 1, W 2.

३. Cf. SRV. I. 123. 2. p. i. 557; VI. 72. 1. p. ii. 883.

४. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

५. Cf. SRV. III. 22. 4. p. ii. 194; omitted along with पूरयतेर्वा by Durga.

६. Cf. SRV. I. 3. 12. p. i. 40; Cf. BD. ii. 135–136.

७. See N. 11. 25–27.

८. परावतघ्नीम॰ M 1.

९. RV. VI. 61. 2.

१०. समुद्धृतं G.

११. Quoted by SRV. I. 128. 3. p. i. 580; Cf. also II. 23. 7. p. ii. 65.

१२. समुन्ननमिति M 1, M 2, W 3; is omitted along with वा by C 3; समुन्नं नयतीति वा Durga.

१३. Quoted by SRV. VI. 61. 2. p. ii. 855.

१४. सुप्रवृक्ताभिः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१६. नैकण्टुकं M 3.

१७. तत्रेदिहास॰ C 3.

विश्वामित्रः सर्वमित्रः । सर्वं संसृतम् । सुदाः कल्याणदानः[१] । पैजवनः पिजवनस्य पुत्रः । पिजवनः पुनः स्पर्धनीयजवो वा । अमिश्रीभावगतिर्वा । स वित्तं गृहीत्वा विपाट्छुतुद्र्योः सम्भेदमाययौ । अनुययुरितरे । स विश्वामित्रो नदीस्तुष्टाव । गाधा भवतेति । अपि द्विवत् । अपि बहुवत्[२] । तद् यद् द्विवदुपरिष्टात्[३]तद् व्याख्यास्यामः । अथैतद्बहुवत् ॥ २४ ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः[४] ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥

उपरमध्वं मे वचसे सोम्याय सोमसम्पादिने । ऋतावरीर्ऋत त्यः । ऋतमित्युदकनाम[५] । प्रत्यृतं[६] भवति । मुहूर्तमेवैरयनैरवनैर्वा । मुहूर्तो मुहुर्ऋतुः । ऋतुरर्त्तेर्गति[७]कर्मणः । मुहुर्मूढ[८] इव कालः । यावदभीक्ष्णं चेति । अभीक्ष्णमभिक्षणं भवति । क्षणः क्षणोतेः । प्रक्ष्णुतः कालः । कालः कालयतेर्गतिकर्मणः । प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय । कुशिकस्य सूनुः । कुशिको राजा बभूव[९] । क्रोशतेः शब्दकर्मणः । क्रंशतेर्वा स्यात्प्रकाशयति कर्मणः । साधु विक्रोशयिताऽर्थानामिति वा । नद्यः प्रत्यूचुः ॥ २५ ॥

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः[१०] ॥

इन्द्रोऽस्मानरदद्वज्रबाहुः[११] । रदतिः खनतिकर्मा । अपाहन् वृत्रं परिधिं नदीनामिति व्याख्यातम् । देवोऽनयत्सविता । सुपाणिः कल्याणपाणिः । पाणिः पणायतेः[१२] पूजाकर्मणः[१३] । प्रगृह्य पाणी देवान् पूजयन्ति[१४] । तस्य वयं प्रसवे याम उर्वीः[१५] । उर्व्य[१६] ऊर्णोतेः । वृणोतेरित्यौर्णवाभः[१७] । प्रत्याख्यायान्तत आशुश्रुवुः ॥ २६ ॥

---

१. Cf. SRV. I. 63. 8. p. i. 313.

२. Cf. BD. IV. 106, 107.

३. N. 9. 39.

४. RV. III. 33. 5.

५. Cf. SRV. I. 2. 8. p. i. 3.

६. प्रत्सृतं C 3.

७. ऋतु: is omitted by C 5.

८. मूढ C 6, M 1, M 2.

९. Cf. SRV. III. 33. 5. p. ii. 243.

१०. RV. III. 33. 6.

११. बाहू BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. पणेयते C 4, M 3.

१३. cf. SRV. I. 22. 5; III. 54. 11. pp. i. 115; ii. 309.

१४. The passage कल्याणपाणि...पूजयन्ति is omitted by C 4.

१५. cf. SRV. III. 33. 6. p. ii. 244.

१६. ऊर्व्य BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१७. उर्व्य...स्यौर्णवाभः is omitted by Durga.

आ ते॑ कारो शृणवामा॒ वचां॑सि य॒याथ॑ दू॒राद॑न॑सा॒ रथे॑न ।
नि ते॑ नंसै पीप्या॒नेव॒ योषा॒ मर्या॑येव क॒न्या॑ शश्व॒चै ते॑[1] ॥

आशृणवाम ते कारो वचनानि । याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रम् । मर्यायेव कन्या परिष्वजनाय । निनमा इति वा[2] ।

अश्वनमान्युत्तराणि षड्विंशतिः । तेषामष्टा उत्तराणि बहुवत् । अश्वः कस्मात् । अश्नुतेऽध्वानम् । महाशनो भवतीति वा । तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा । दधत् क्रन्दतीति[3] वा । दधदाकारी भवतीति वा । तस्याश्ववद्देवतावच्च निगमा भवन्ति । तद् यद् देवतावदुपरिष्टात्तद्[4] व्याख्यास्यामः । अथैतदश्ववत् ॥ २७ ॥

उ॒त स्य वा॒जी क्षि॒प॒णिं तु॑रण्यति ग्री॒वायां॑ ब॒द्धो अ॑पि क॒क्ष आ॒सनि॑[5] ।
क्रतुं॑ दधि॒क्रा अनु॑ सं॒तवी॑त्वत्प॒थामङ्कां॒स्यन्वा॒पनी॑फणत् ॥

अपि स वाजी वेजनवान्[6] । क्षेपणमनु तूर्णमश्नुतेऽध्वानम् । ग्रीवायां बद्धः । ग्रीवा गिरतेर्वा । गृणातेर्वा । गृह्णातेर्वा । अपि कक्ष आसनीति व्याख्यातम् । क्रतुं[7] दधिक्राः कर्म वा प्रज्ञां वा । अनुसंतवीत्वत् । तनोतेः पूर्वया प्रकृत्या निगमः । पथामङ्कांसि पथां कुटिलानि । पन्थाः पततेर्वा । पद्यतेर्वा । पन्थतेर्वा । अङ्कोऽञ्चतेः । आपनीफणदिति फणतेश्चर्करीतवृत्तम् ॥

दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्यज्ञानाय ।

ज्वलतिकर्माण उत्तरे धातव एकाद

तावन्त्येवोत्तराणि ज्वलतो नामधेयानि यानि ॥ २८ ॥

इति द्वितीयोऽध्य.

१. RV. III. 33. 10.

२. cf. SRV. III. 33. 10. p. ii. 246.

३. cf. BD. ii. 56.

४.

५. RV. IV. 40. 4.

६. cf. SRV. IV. 40. 4. p. ii. 458.

७. The following passage is added after क्रतुं by C 5: वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धः ।

८. cf. SRV. I. 123. 8. p. i. 560.

[अथ निर्वचनमोघो राज्ञो विद्या ह व अथातोऽनुक्रमिष्यामो वृक्षेवृक्षे तावां वास्तूनि यं ईं चकारायं स शिङ्क्ते हिरण्यनामान्यार्ष्टिषेणो यद्देवापिः [13]साधारणानि [14]स्वरादित्यो [15]रश्मिनामान्य[16]तिष्ठन्तीनां [17]दासपत्नी [18]रात्रिनामानीदं [19]श्रेष्ठं [20]रुशद्वत्साह[21]श्वे कृष्णं [22]देवानां माने [23]वाङ्नामानीयं [24]शुष्मेभि [25]रमध्वं म इन्द्रो [26]असमानाते [27]कारावुर्त [28]स्य वाज्यष्टाविंशतिः ॥]

॥ इति निरुक्ते पूर्वपट्के द्वितीयोऽध्यायः समाप्तः ॥

Small figure on this page represents the corresponding section of the second chapter of the *Nirukta.*

॥ अथ तृतीयोऽध्यायः ॥

कर्मनामान्युत्तराणि षड्विंशतिः । कर्म कस्मात् । क्रियत इति सतः ।

अपत्यनामान्युत्तराणि पञ्चदश । अपत्यं कस्मात् । अपततं भवति । नानेन पततीति वा[1] । तद् यथा जनयितुः प्रजा[2] । एवमर्थीये ऋचा उदाहरिष्यामः ॥ १ ॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः[3] ॥

परिहर्तव्यं हि नोपसर्तव्यम् । अरणस्य रेक्णः । अरणोऽपार्णो भवति । रेक्ण इति धननाम । रिच्यते प्रयतः । नित्यस्य रायः पतयः स्याम । पित्र्यस्येव धनस्य[4] । न शेषोऽग्ने अन्यजातमस्ति । शेष इत्यपत्यनाम । शिष्यते प्रयतः । अचेतयमानस्य तत्प्रमत्तस्य भवति । मा नः पथो विदूदुष[5] इति ।

तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

न हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः[6] ॥

न हि ग्रहीतव्यो अरणः सुसुखतमोऽपि । अन्योदर्यो मनसापि न मन्तव्यः । ममायं [पुत्रः][8] इति । अथ स ओकः पुनरेव तदेति यत[9] आगतो भवति । ओक इति निवासनामोच्यते । एतु नो वाजी वेजनवान् । अभिषहमाणः[10] सपत्नान् । नवजातः स एव पुत्र इति ।

अथैतां[11] दुहितृदायाद्य उदाहरन्ति । पुत्रदायाद्य इत्येके ॥ ३ ॥

---

१. cf. Manu. IX. 138; Viṣṇu. XV. 44.

२. cf. Manu. IX. 32, 35-41. The diametrically opposite view is given IX. 48-54. cf. also Vas. XVII. 6-9; 63-64; Ap. Dh. II. 13. 6-7; Ga. Dh. XVIII. 9-14.

३. RV. VII. 4. 7.

४. cf. SRV. VII. 4. 7. p. iii. 14.

५. cf. SRV. I. 93. 4; p. i. 418.

६. cf. SRV. VII. 4. 7. p. iii. 14.

७. RV. VII. 4. 8.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

९. यते BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१०. अभिषह्यमाणः C 4, C 5.

११. अथैनां Durga and S'ivadatta's edition. cf. BD. IV. 110-111.

शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥

प्रशास्ति वोढा सन्तानकर्मणे दुहितुः पुत्रभावम् । दुहिता दुर्हिता । दूरे हिता । दोग्धेर्वा । नप्तारमुपागमत् । दौहित्रं पौत्रमिति । विद्वान् प्रजननयज्ञस्य । रेतसो वा । अङ्गादङ्गात्संभूतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य । विधानं पूजयन् । अविशेषेण मिथुनाः पुत्रा दायादा इति । तदेतदृक्श्लोकाभ्यामभ्युक्तम् ।

अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ इति ।

अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायंभुवोऽब्रवीत् ॥

न दुहितर इत्येके ।

तस्मात्पुमान् दायादोऽदायादा स्त्री[10] ।

इति विज्ञायते ।

तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसम्[11] ।

इति च ।

स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः । पुंसोऽपीत्येके । शौनःशेपे दर्शनात् । अभ्रातृमतीवाद इत्यपरम् ।

[अमूर्या यन्ति जामयः सर्वा लोहितवाससः[12]]
अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः[13] ॥

---

१. RV. III. 31. 1. The Second hemistitch is paraphrased by yāska in the last part of the fifth Section.

२. वोढा, C 1, C, 2, C 3, C, 6, M 1, M 2, R 1, R 2, R 5, S.

३. cf. BD. IV. 112.

४. Omitted by C 5.

५. cf. SRV. I. 34. 5. p. i. 182.

६. cf. SRV. III. 31. 1. p. ii. 226.

७. दायदा C 5.

८. S'B. XIV. 9. 4. 8; BU. VI. 4. 8; SVB. 1. 5. 17.

९. cf. Manu. IX. 130, 133, 139; Ba. II. 3. 14.

१०. The quotation is untraced. cf. Ms. 4. 6. 4; 4. 7. 9: यत्स्थालीं रिंचन्ति न दारुमयं तस्मात्पुमान् दायादः स्त्र्यदायादा । यत्स्थालीं परास्यन्ति न दारुमयं तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम् ।

११. Durga gives the quotation in the following manner: अथ यत् स्थालीं परास्यन्ति हवनकर्मणो न तथा जुह्वति न दारुमयं परास्यन्ति हवनकर्मणः दारुमयेणैव जुह्वति तस्मात् स्त्रियं जातां परास्यन्ति परस्मै प्रयच्छन्ति न पुमांसम् ।

१२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

१३. cf. AV. 1. 17. 1.

अभ्रातृका इव योपास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हतवर्त्मानः । इत्यभ्रातृकाया अनीर्वाहं औपमिकः । तस्योत्तरा भूयसे निर्वचनाय ॥ ४ ॥

अभ्रातेर्व पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥

अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय न पतिम् । गर्तारोहिणीव धनलाभाय दाक्षिणाजी । गर्तः सभास्थाणुः । गृणातेः । सत्यसङ्गरो भवति । तं तत्र यापुत्रा यापतिका सारोहति । तां तत्राक्षैराघ्नन्ति । सा रिक्थं लभते । श्मशानसंचयोऽपि गर्त उच्यते । गुरतेः । अपगूर्णो भवति । श्मशानं श्मशयनम् । श्म शरीरम् । शरीरं शृणातेः । शम्नातेर्वा । श्मश्रु लोम । श्मनि श्रितं भवति । लोम लुनातेर्वा । लीयतेर्वा ।

नोपरस्याविष्कुर्याद् यदुपरस्याविष्कुर्याद् गर्तेष्ठाः स्यात्प्रमायुको यजमानः ।

इत्यपि निगमो भवति ।

रथोऽपि गर्त उच्यते । गृणातेः स्तुतिकर्मणः । स्तुततमं यानम् ।

आ रोहथो वरुण मित्र गर्तम् ।

इत्यपि निगमो भवति ।

जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान्विवृणुते रूपाणीति । चतस्र उपमाः ।

नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद् भवति ।

इत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षः । पितुश्च पुत्रभावः । पिता यत्र दुहितरप्रत्ताया रेतःसेकं प्राजयति । संदधात्यात्मानं संगमेन मनसेति ।

अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति । ज्येष्ठं पुत्रिकायां इत्येके ॥ ५ ॥

---

१. cf. Manu. III. 11; Ya. I. 53.
२. RV. I. 124. 7.
३. Omitted by C 2, C 5, C 6, M 1, M 2, M 3, W 3.
४. दाक्षिणाय. BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3. दाक्षिणाजा SRV.
५. ०सङ्करो W 2.
६. तत्राक्षैराघ्नन्ति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.
७. cf. SRV. I. 124. 7. p. i. 565.
८. श्मनि: C 4.
९. ०वि: कुर्या. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.
१०. The quotation in untraced.
११. cf. SRV. V. 62. 5. p. ii. 643.
१२. RV. V. 62. 8.
१३. उषा is omitted by C 5.
१४. The quotation is untraced.
१५. cf. Manu. III. 11; Ya. I. 53.
१६. cf. BD. IV. 111: रिक्थस्य दुहितुर्दानं नेत्यृचि प्रतिषिध्यते ।
१७. cf. Manu. IX. 134.

न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम् ।
यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन्[1] ॥

न जामये भगिन्यै । जामिरन्येऽस्यां जनयन्ति जा[2]मपत्यम्[3] । जमतेर्वा स्याद्गतिकर्मणः । निर्गमनप्राया भवति । तान्व[4] आत्मजः पुत्रः । रिक्थं प्रारिचत् प्रादात् । चकारैनां गर्भनिधानीम्[5] । सनितुर्हस्तग्राहस्य । [6]यदी मातरो जनयन्त[7] । वह्निं पुत्रम् । अवह्निं च स्त्रियम् । अन्यतरः सन्तानकर्ता भवति पुमान्दायादः । अन्यतरोऽर्द्धयित्वा जामिः प्रदीयते परस्मै[8] ॥ ६ ॥

मनुष्यनामान्युत्तराणि पञ्चविंशतिः ।

मनुष्याः कस्मात् । मत्वा कर्माणि सीव्यन्ति । मनस्यमानेन सृष्टाः । मनस्यतिः पुनर्मनस्वीभावे । मनोरपत्यम् । मनुषो वा ।

तत्र पञ्चजना इत्येतस्य निगमा भवन्ति ॥ ७ ॥

तदद्य वाचः प्रथमं मंसीय येनासुराँ[9] अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पञ्चजना मम होत्रं[10] जुषध्वम्[11] ॥

तदद्य[12]वाचः परमं मंसीय येनासुरानभिभवेम देवाः । असुरा असुरताः । स्थानेष्वस्ताः । स्थानेभ्य इति वा । अपि वा सुरिति प्राणनाम । अस्तः शरीरे भवति । तेन तद्वन्तः ।

सोऽदेवानसृजत तत् सुराणां सुरत्वम् । असोरसुरानसृजत तदसुराणाम्[13]असुरत्वम् ।

इति विज्ञायते ।

ऊर्जाद उत यज्ञियासः[14] । अन्नादाश्च यज्ञियाश्च । ऊर्गित्यन्ननाम । ऊर्जयतीति

---

१. RV. III. 31. 2. cf. BD. i. 57, where it is quoted as an example of denial.

२. अजनिम्० M 3; अजैनम्० C 4, C 5, Mi, W 1, W 2.

३. ०अपचम् C 5. cf. A B. 7. 3. 1.

४. तान्वा M 3, Mi.

५. cf. BD. ii. 113.

६. यदि ह C 1, C 3, M 1, M 2, R. cf. SRV. III. 31. 2. p. ii. 227.

७. भजनयन्त SRV. loc. cit.

८. cf. SRV. III. 31. 2; I. 123. 5; pp. ii. 227; i. 558. cf. अर्थो हि कन्या परकीय एव S'ak. IV.

९. असुरा C 5,

१०. होरात्रं C 3, M 3.

११. RV. X. 53. 4.

१२. Cf. SRV. X. 53. 4. p. IV. 158.

१३. Cf. TB. ii. 3. 8. 2, 4. तेनासुनाऽसुरानसृजत तदसुराणामसुरत्वम् ।

१४ यज्ञेयासः C 5.

सतः । पकं सुप्रवृक्णमिति वा । पञ्चजना मम होत्रं जुषध्वम् । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके[1] । चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः[2] । निषादः कस्मात् । निषदनो[3] भवति । निषण्णमस्मिन्पापकमिति नैरुक्ताः ।

यत्पाञ्चजन्यया विशा[4] ।

पञ्चजनीनया[5] विशा । पञ्च पृक्ता संख्या । स्त्रीपुंनपुंसकेष्वविशिष्टा ।

बाहुनामान्युत्तराणि द्वादश । बाहुः कस्मात् । प्रबाधत आभ्यां कर्माणि ।

अङ्गुलिनामान्युत्तराणि द्वाविंशतिः । अङ्गुल्यः कस्मात् । अग्रगामिन्यो भवन्तीति वा । अग्रगालिन्यो भवन्तीति वा । अग्रकारिण्यो भवन्तीति वा । [अग्रसारिण्यो भवन्तीति वा[6]] अङ्कना भवन्तीति वा । अञ्चना[7] भवन्तीति वा । अपि वाभ्यञ्चनादेव[8] स्युः । तासामेषा भवति ॥ ८ ॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥[9]

अवनयोऽङ्गुल्यो भवन्ति । अवन्ति कर्माणि[10] । कक्ष्याः प्रकाशयन्ति कर्माणि । योक्त्राणि योजनानीति व्याख्यातम् । अभीशवोऽभ्यश्नुवते कर्माणि[11] । दशधुरो दश युक्ता वहद्भ्यः । धूर्धूर्वतेर्वधकर्मणः । इयमपीतरा धूरेतस्मादेव ।

विहन्ति[12] वहम्[13] । धारयतेर्वा[14] ।

कान्तिकर्माण उत्तरे धातवोऽष्टादश ।

अन्ननामान्युत्तराण्यष्टाविंशतिः । अन्नं कस्मात् । आनतं भूतेभ्यः । अत्तेर्वा ।

अत्तिकर्माण उत्तरे धातवो दश ।

---

१. Cf. BD. VII. 68; cf. AB. III. 31. 5.

२. Cf. BD. VII. 69—72; SRV. 1. 89. 10; VIII. 32. 22; pp. i. 399; iii. 390.

३. Omitted by Durga. निषद्यतीति is added by C 1.

४. RV. VIII. 63. 7.

५. पञ्चजनीयया C 1, M 3.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, & Durga.

७. अञ्जना BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

८. वाभ्यञ्जनादेव॰. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, S, R. 5. Roth.

९. RV. X. 94. 7.

१०. Cf. SRV. I. 62. 10. p. i. 309.

११. Cf. SRV. I. 38. 12. p. i. 206.

१२. विहत्ति C 3.

१३. वहे C 5.

१४. Cf. SRV. X. 94. 7. p. IV. 206.

बलनामान्युत्तराण्यष्टाविंशतिः । बलं कस्मात् । बलं भरं भवति । बिभर्तेः ।

धननामान्युत्तराण्यष्टाविंशतिरेव । धनं कस्मात् । धिनोतीति सतः ।

गोनामान्युत्तराणि नव ।

क्रुध्यतिकर्माण उत्तरे धातवो दश ।

क्रोधनामान्युत्तराण्येकादश ।

गतिकर्माण उत्तरे धातवो द्वाविंशशतम्[1] ।

क्षिप्रनामान्युत्तराणि षड्विंशतिः । क्षिप्रं कस्मात् । संक्षिप्तो विकर्षः ।

अन्तिकनामान्युत्तराण्येकादश । अन्तिकं कस्मात् । आनीतं भवति ।

संग्रामनामान्युत्तराणि षट्चत्वारिंशत् । संग्रामः कस्मात् । संगमनाद्वा । संगरणाद्वा । संगतौ ग्रामाविति वा ।

तत्र खल इत्येतस्य निगमा भवन्ति ॥ ९ ॥

अ॒भी॒३॑दमेक॒मेको॑ अस्मि नि॒ष्षाळ्[2]॒भी द्वा किमु॒ त्रयः॑ करन्ति ।
खले॒ न प॒र्षान्प्रति॑ हन्मि॒ भूरि॒ किं मा॑ निन्दन्ति॒ शत्र॑वोऽनि॒न्द्राः[3] ॥

अभिभवामि[4]दमेकमेकः । अस्मि निष्षहमाणः । सपत्नानभिभवामि । द्वौ किं मा त्रयः कुर्वन्ति । एक इता संख्या । द्वौ द्रुततरा संख्या । त्रयस्तीर्णतमा संख्या । चत्वारश्चलिततमा संख्या । अष्टावश्नोतेः । नव न वननीया । नावाप्ता[5] वा । दश दस्ता । दृष्टार्था[6] वा । विंशतिर्द्विदशतः । शतं दशदशतः । सहस्रं सहस्वत् । अयुतं[7] प्रयुतं नियुतं[8] तत्तदभ्यस्तम् ।

अर्बुदो मेघो भवति । अरणमम्बु । तद्दः । [अम्बुदो] अम्बुमद्भातीति वा । अम्बुमद्भवतीति वा । स यथा महान्बहुर्भवति वर्षंस्तदिवार्बुदम् । खले[11] न पर्षान्प्रति हन्मि भूरि । खल इव पर्षान् प्रतिहन्मि भूरि । खल इति संग्रामनाम । खलतेर्वा । स्खलतेर्वा । अयमपीतरः खल एतस्मादेव । समास्कन्नो भवति । किं मा निन्दन्ति शत्रवोऽनिन्द्राः । य इन्द्रं न विदुः[12] । इन्द्रो ह्यहमस्मि । अनिन्द्रा इतर इति वा ।

---

१. द्वाविंशं शतम् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

२. निःषाळ० C 6, M 1; निःषाद् C 3; निःषालः C 4.

३. RV. X. 48. 7; cf. BD. I. 49.

४. Cf. SRV. X. 48. 7. p. IV. 146.

५. नावात्ता C 6

६. दिष्टार्था C 3.

७. Omitted by C 5.

८. नियुतं. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

९. अयुतं C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi. R 4, R 6, W 1, W 2, W 3. अम्बुमद्भातीति is omitted by Durga;

११. खलेन Roth.

१२. विविदुः C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 6, S.

व्याप्तिकर्माण उत्तरे धातवो दश । तत्र द्वे नामनी आक्षाण आश्नुवानः । आपान आप्नुवानः ।

वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् । तत्र वियात इत्येतद् वियातयत इति वा । वियातयेति वा ।

आखण्डल प्र हूयसे[1] ।

आखण्डयितः । [खण्डं खण्डयतेः[2]] ।

[3]तळिदित्यन्तिकवधयोः संसृष्टकर्म । ताळयतीति[4] सतः ॥ १० ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः[5] ॥

त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि । याश्च नो दूरे तळितो याश्चान्तिके । अरातयोऽदानकर्माणो वा । अदानप्रज्ञा वा । जम्भय ता अनप्नसः । अप्न इति रूपनाम[6] । आप्नोतीति सतः ।

विद्युत्तळिद्भवतीति शाकपूणिः । सा ह्यवताळयति । दूराच्च दृश्यते । अपि त्विदमन्तिकनामैवाभिप्रेतं स्यात् ।

दूरे चित्सन्तळिदिवाति रोचसे[7] ।

दूरेऽपि सन्नन्तिक इव संदृश्यसे[8] इति ।

वज्रनामान्युत्तराण्यष्टादश । वज्रः कस्मात् । वर्जयतीति[9] सतः । तत्र कुत्स इत्येतत् कृन्ततेः । ऋषिः कुत्सो भवति । कर्ता स्तोमानामित्यौपमन्यवः । [10]अथाप्यस्य वधकर्मैव भवति । तत्सख इन्द्रः शुष्णं जघानेति[11] ।

ऐश्वर्यकर्माण उत्तरे धातवश्चत्वारः ॥

ईश्वरनामान्युत्तराणि चत्वारि । तत्रेन इत्येतत् सनित ऐश्वर्येणेति वा । सनितमनेनैश्वर्यमिति वा ॥ ११ ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभि स्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश[12] ॥

---

१. RV. VIII. 17. 12; AV. 20. 5. 6. SV. 2. 76.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, Durga.

३. तडिदि॰ C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

४. ताडयतीति. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

५. RV. II. 23. 9.

६. Cf. SRV. II. 23. 9. p. ii. 66.

७. RV. I. 94. 7.

८. Cf. SRV. I. 94. 7. p. i. 423.

९. वज्रयतीति C 4, C 5, M 3, Mi, W 1.

१०. अत्रा॰ C 1, C 6, M 1, M 2.

११. Cf. SRV. I. 11. 7. p. i. 78.

१२. RV. I 164. 21; cf. AV. 9. 9. 22.

यत्र [सुपर्णाः] सुपतना आदित्यरश्मयः[1]। अमृतस्य भागमुदकस्य। अनिमिषन्तो वेदनेनाभिस्वरन्तीति वा। अभिप्रयन्तीति वा। ईश्वरः सर्वेषां भूतानां गोपायितादित्यः। स मा धीरः पाकमत्रा विवेशेति। धीरो धीमान्। पाकः पक्तव्यो भवति[3]।

विपक्कप्रज्ञ आदित्यः।

इत्युपनिषद्वर्णो भवति। इत्यधिदैवतम्।

अथाध्यात्मम्। यत्र [सुपर्णाः] सुपतनानीन्द्रियाणि। अमृतस्य भागं ज्ञानस्य। अनिमिषन्तो वेदनेनाभिस्वरन्तीति वा। अभिप्रयन्तीति वा। ईश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा। स मा धीरः पाकमत्रा विवेशेति। धीरो धीमान्। पाकः पक्तव्यो भवति। विपक्कप्रज्ञ आत्मा। इत्यात्मगतिमाचष्टे ॥ १२ ॥

बहुनामान्युत्तराणि द्वादश। बहुः कस्मात्। प्रभवतीति सतः॥

ह्रस्वनामान्युत्तराण्येकादश। ह्रस्वो ह्रसतेः।

महन्नामान्युत्तराणि पञ्चविंशतिः। महान् कस्मात्। मानेनान्याञ्जहातीति शाकपूणिः। मंहनीयो भवतीति वा। तत्र ववक्षिथ विवक्षस इत्येते वक्तेर्वा वहतेर्वा साभ्यासात्।

गृहनामान्युत्तराणि द्वाविंशतिः। गृहाः कस्मात्। गृह्णन्तीति सताम्।

परिचरणकर्माण उत्तरे धातवो दश।

सुखनामान्युत्तराणि विंशतिः। सुखं कस्मात्। सुहितं खेभ्यः। खं पुनः खनतेः।

रूपनामान्युत्तराणि षोडश। रूपं रोचतेः।

प्रशस्यनामान्युत्तराणि दश।

प्रज्ञानामान्युत्तराण्येकादश।

सत्यनामान्युत्तराणि षट्। सत्यं कस्मात्। सत्सु तायते। सत्प्रभवं भवतीति वा।

अष्टा उत्तराणि पदानि पश्यतिकर्माण [उत्तरे] धातवश्चायतिप्रभृतीनि च। नामान्यामिश्राणि।

नवोत्तराणि पदानि सर्वपदसमाम्नानाय।

१. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

२. Cf. SRV. I. 164. 21. p. i. 705.

३. Cf. SRV. I. 31. 14; 129. 1; pp. i. 163, 583.

४. The quotation is untraced.

५. अनिमिषन्ति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. ०प्रज्ञा M 3.

७. मांहनीयो M 3.

८. Cf. SRV. V. 30. 1. p. ii. 551.

९. प्रशंस्य Mi.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

११. Cf. SRV. X. 50. 5. p. iv. 152: तथापि हिकं नुकमित्यादीनि नवोत्तराणि पदानीत्युक्तवान्यास्काचार्यः।

अथात उपमाः । यदतत्तत्सदृशमिति गार्ग्यः । तदासां कर्म । ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वाप्रख्यातं वोपमिमीते । अथापि कनीयसा ज्यायांसम् ॥ १३ ॥

तनूत्यजे॑व॒ तस्क॑रा वन॒र्गू र॑श॒नाभि॑र्द॒शभि॑र॒भ्य॑धीताम्[1] ॥

तनूत्यक् तनूत्यक्ता । वनर्गू वनगामिनौ । अग्निमन्थनौ बाहू तस्कराभ्यामुप[2]मिमीते । तस्करस्तत्करोति [तत्करो भवति][3] यत्पापकमिति[4] नैरुक्ताः । तनोतेर्वा स्यात् । सन्ततकर्मा भवति । अहोरात्रकर्मा वा । रशनाभिर्दशभिरभ्यधीताम् । [अभ्यधीतामिति][5] अभ्यधाताम् । ज्यायांस्तत्र गुणोऽभिप्रेतः ॥ १४ ॥

कुह॑ स्वि॒द् दो॒षा कुह॒ वस्तो॑र॒श्विना॒ कुहा॑भिपि॒त्वं क॑रतः॒ कुहो॑षतुः ।
को वां॑ शयु॒त्रा वि॒धवे॑व दे॒वरं॒ मर्यं॒ न योषा॑ कृणुते स॒धस्थ आ[6] ॥

क स्विद्रात्रौ भवथः क दिवा । काभिप्राप्तिं कुरुथः । क वसथः । को वां शयने विधवेव देवरम् । [देवरः कस्मात् । द्वितीयो वर उच्यते] । विधवा विधातृका भवति । विधवनाद्वा । विधावनाद्वेति[7] चर्मशिराः[8] । अपि वा धव इति मनुष्यनाम । तद्वियोगाद्विधवा । देवरो दीव्यतिकर्मा । मर्यो मनुष्यो मरणधर्मा । योषा यौतेः । आकुरुते सधस्थाने[9] ।

अथ निपाताः पुरस्तादेव व्याख्याताः । यथेति कर्मोपमा ।

यथा॒ वातो॒ यथा॒ वनं॒ यथा॑ समु॒द्र एज॑ति[10][11] ॥
भ्राज॑न्तो अ॒ग्नयो॒ यथा॑[12] ॥
आ॒त्मा यक्ष्म॑स्य नश्यति पु॒रा जी॑व॒गृभो॒ यथा॑[13] ॥

आत्माततेर्वा । आप्तेर्वा । अपि वाप्त इव स्यात् । यावद् व्याप्तिभूत इति ।

अ॒ग्निर्न ये भ्राज॑सा रु॒क्मव॑क्षसः[14] ।

---

१. RV. X. 4. 6.

२. Cf. SRV. X. 4. 6. p. iv. 9.

३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

४. यतः करोति पापकमिति Durga.

५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

६. RV. X. 40. 2.

७. विधवनाद्वेति S'ivadatta's ed.

८. प्रचर्मशिराः S'ivadatta's ed.

९. सह०. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S. and Roth's edition.

१०. Cf. SRV. X. 40. 2. p. iv. 121.

११. RV. V. 78. 8.

१२. RV. I. 50. 3; AV. 13. 2. 18; 20. 47. 15; VS. 8. 40.

१३. RV. X. 97. 11; VS. 12. 85.

१४. RV. X. 78. 2. According to Durga some Mss. do not read the quotation thinking that *na* is already explained: दुर्मदासो न सुरायाम् see N. 1. 4.

अग्निरिव ये [मरुतो भ्राजमाना रोचिष्णूरस्का[1]] भ्राजस्वन्तो रुक्मवक्षसः ॥ १५ ॥

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः ।
न दुरुक्ताय स्पृहयेत्[2] ॥

चतुरश्चिद्[3] [अक्षान्[4]] धारयत इति । तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयात् । न दुरुक्ताय स्पृहयेत् कदाचित् ।

आ इत्याकार उपसर्गः पुरस्तादेव व्याख्यातः । अथाप्युपमार्थे दृश्यते ।

जार आ भगम्[5] ।

जार इव भगम् । आदित्योऽत्र जार उच्यते । रात्रेर्जरयिता[6] । स एव भासाम् । तथापि निगमो भवति ।

स्वसुर्जारः[7] शृणोतु नः[8] । इति

उषसमस्य स्वसारमाह साहचर्यात् । रसहरणाद्वा । अपि त्वयं मनुष्यजार एवाभिप्रेतः[9] स्यात् । स्त्रीभगस्तथा स्यात् । भजतेः ।

मेष इति भूतोपमा ।

मेषो भूतो३भि यन्नयः[10] ।

मेषो मिषतेः । तथा पशुः पश्यतेः[11] ।

अग्निरिति रूपोपमा ।

हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः[12] ।

हिरण्यवर्णस्येवास्य रूपम् ।

था इति च ।

तं प्रत्नथा[13] पूर्वथा विश्वथेमथा[14] ।

प्रत्न[15] इव पूर्व इव विश्व इवेम इवेति । अयमेततरोऽमुष्मात् । असावस्ततरोऽस्मात् । अमुथा यथासाविति व्याख्यातम् ।

वदिति सिद्धोपमा ।

---

१. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

२. RV. I. 41. 9.

३. चिद् is omitted by Kn. and Sāyana.

४. Cf. SRV. I. 41. 9. p. i. 217: चतुरोऽक्षान्धारयत...स्पृहयेत् ।

५. Fragment of RV. X. 11. 6; AV. 18. 1. 23.

६. Cf. PMbh. जरयन्तीति जाराः । जीर्यन्ति तैर्जाराः । vol. II. p. 147.

७. जार C 4, M 3.

८. RV. VI. 55. 5.

९. एवाभिप्रेतं W 2; ०प्रेत C 4, M 3.

१०. RV. VIII. 2. 40.

११. Cf. S'B. VI. 2. 1. 4: यदपश्यत्तस्मादेते पशवस्तेष्वेतमपश्यत्तस्माद्वेवैते पशवः । Weber's edition p. 507.

१२. RV. II. 35. 10.

१३. प्रलथा W 1.

१४. RV. V. 44. 1; VS. 7. 12.

१५. प्रल W 1.

ब्राह्मणवद्वृषलवत् ।

ब्राह्मणा इव वृषला इवेति । [वृषलो वृषशीलो भवति । वृषाशीलो वा] ॥ १६ ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥

प्रियमेधः । प्रिया अस्य मेधा । यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानम् । प्रस्कण्वः कण्वस्य पुत्रः । कण्वप्रभवः । यथा प्राग्रम् । अर्चिषि भृगुः संबभूव । भृगुर्भृज्यमानो न देहे । अङ्गारेष्वङ्गिराः । अङ्गारा अङ्कनाः [अञ्चनाः] । अत्रैव तृतीयमृच्छतेत्यूचुः । तस्मादत्रिः । न त्रय इति । विखननाद्वैखानसः । भरणाद्भारद्वाजः । विरूपो नानारूपः । महिव्रतो महाव्रत इति ॥ १७ ॥

अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते । सिंहो व्याघ्र इति पूजायाम् । श्वाकाक इति कुत्सायाम् । काक इति शब्दानुकृतिः । तदिदं शकुनिषु बहुलम् । न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः । काकोऽपकालयितव्यो भवति । तित्तिरिस्तरणात् । तिलमात्रचित्र इति वा । कपिञ्जलः कपिरिव जीर्णः । कपिरिव जवते । ईषत्पिङ्गलो वा । कमनीयं शब्दं पिञ्जयतीति वा । श्वा शुयायी । शवतेर्वास्याद्गतिकर्मणः । श्वसितेर्वा । सिंहः सहनात् । हिंसेर्वा स्याद् विपरीतस्य । संपूर्वस्य वा हन्तेः । संहाय हन्तीति वा व्याघ्रो व्याघ्राणात् । व्यादाय हन्तीति वा ॥ १८ ॥

अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशत् ।

मेधाविनामान्युत्तराणि चतुर्विंशतिः । मेधावी कस्मात् । मेधया तद्वान्भवति । मेधा मतौ धीयते ।

स्तोतृनामान्युत्तराणि त्रयोदश । स्तोता स्तवनात् ।

---

१. The quotation is untraced. Mss. of the longer recension do not accent the passage.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

३. RV. I. 45. 3.

४. Cf. SRV. I. 139. 9. p. i. 623.

५. Cf. SRV. I. 44. 6. p. i. 225.

६. Cf. SRV. I. 45. 3. p. i. 229; cf. BD. V. 99.

७. Cf. AB. iii. 34: येऽङ्गारा आसंस्ते ऽङ्गिरसोऽभवन् ।

Cf. SRV. I. 1. 6; 127. 2; X. 62. 5; 67. 2. pp. i. 27, 574; IV. 186, 206.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; and Durga.

९. Cf. SRV. I. 139. 9. p. i. 623.

१०. ०द्वैसानसः W 1.

११. Cf. SRV. I. 45. 3. p. i. 229.

१२. हिंसेर्वा…विपरीतस्य is omitted by … Cf. PMbh. हिंसेः सिंहः

यज्ञनामान्युत्तराणि पञ्चदश । यज्ञः कस्मात् । प्रख्यातं यजति कर्मेति नैरुक्ताः । याच्ञो भवतीति वा । यजुरुन्नो भवतीति वा । बहुकृष्णाजिन इत्यौपमन्यवः । यजूंष्येनं नयन्तीति वा ।

ऋत्विङ्नामान्युत्तराण्यष्टौ । ऋत्विक् कस्मात् । ईरणः । ऋग्यष्टा भवतीति शाकपूणिः । ऋतुयाजी भवतीति वा ।

याच्ञाकर्माण उत्तरे धातवः सप्तदश ।

दानकर्माण उत्तरे धातवो दश ।

अध्येषणाकर्माण उत्तरे धातवश्चत्वारः ।

स्वपितिसस्तीति द्वौ स्वपितिकर्माणौ ।

कूपनामान्युत्तराणि चतुर्दश[1] । कूपः कस्मात् । कु पानं भवति । कुप्यतेर्वा ।

स्तेननामान्युत्तराणि चतुर्दश । स्तेनः कस्मात् । संस्त्यानमस्मिन्पापकमिति नैरुक्ताः ।

निर्णीतान्तर्हितनामधेयान्युत्तराणि षट् । [निर्णीतं कस्मात् । निर्णिक्तं भवति[2]]

दूरनामान्युत्तराणि पञ्च । दूरं कस्मात् । द्रुतं भवति । दुरयं वा ।

पुराणनामान्युत्तराणि षट् । पुराणं कस्मात् । पुरा नवं भवति ।

नवनामान्युत्तराणि षळेव । नवं कस्मात् । आनीतं भवति ॥ १९. ॥

द्विश उत्तराणि नामानि षड्विंशतिः । प्रपित्वेऽभीक इत्यासन्नस्य[3] । प्रपित्वे प्राप्ते । अभीकेऽभ्यक्ते[4] ।

आपित्वे नः प्रपित्वे तूयसा गहि[5] ।

अभीके चिदुलोककृत्[6] ।

इत्यपि निगमौ भवतः ।

दभ्रमर्भकमित्यल्पस्य[7] । दभ्रं दभ्नोतेः[8] । सुदम्भं भवति । अर्भकमवहृतं भवति ।

उपोप मे परा मृश मा मे दभ्राणि मन्यथाः[9] ।

नमो महद्भ्यो नमो अर्भकेभ्यः[10] ।

---

1. चतुर्दशैव Roth's and S'ivadatta's edition.
2. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
3. Cf. SRV. I. 126. 3. p. i. 571.
4. Cf. SRV. I. 104. 1. p. i. 457.
5. RV. VIII. 4. 3; SV. 1. 252; 2. 1071.
6. RV. X. 133. 1; AV. 20. 95. 2; SV. 2. 1151.
7. Cf. SRV. I. 31. 6. p. i. 160.
8. दभ्नोतेः C 5, M 3, Mi.
9. RV. I. 126. 7; cf. BD. IV. 3.
10. RV. I. 27. 13; cf. VS. 16. 26.

इत्यपि निगमौ भवतः ।

तिरः सत इति प्राप्तस्य[1] । तिरस्तीर्णं भवति । सतः संसृतं भवति[2] ।

> तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या[3] ।
> पात्रेव भिन्दन्सत एति रक्षसः[4] ॥

इत्यपि निगमौ भवतः ।

त्वो नेम इत्यर्धस्य[5] । त्वोऽपततः । नेमोऽपनीतः । अर्धं हरतेर्विपरीतात् । धारयते र्वा स्यात् । उद्धृतं भवति । ऋध्नोते र्वा स्यात् । ऋद्धतमो[6] विभागः ।

> पीयति त्वो अनु त्वो गृणाति[7] ।

> नेमे देवा नेमेऽसुराः[8] ।

इत्यपि निगमौ[9] भवतः ।

ऋक्षाः स्तृभिरिति नक्षत्राणाम्[10] । नक्षत्राणि नक्षतेर्गतिकर्मणः[11] ।

> नेमानि क्षत्राणि[12]

इति च ब्राह्मणम्[13] । ऋक्षा उदीर्णानीव ख्यायन्ते । स्तृभिस्तीर्णानीव ख्यायन्ते ।

> अमी य ऋक्षा निहितास उच्चा[14] ।
> पश्यन्तो द्यामिव स्तृभिः[15] ।

इत्यपि निगमौ भवतः ।

वम्रीभिरुपजिह्विका इति सीमिकानाम् । वम्र्यो वमनात् । सीमिका स्यमनात् । उपजिह्विका उपजिघ्र्यः ।

---

१. अप्राप्तस्य is given as a variant by Durga.

२. Cf. SRV. VI. 75. 9; VII. 104. 21.

३. RV. V. 75. 7.

४. RV. VII. 104. 21; AV. 8. 4. 21.

५. Cf. SRV. I. 72. 4; 147. 2; V. 61. 8; VI. 38. 5. pp. i. 340, 648; ii. 639, 777.

६. ऋद्धमो S'ivadatta's edition.

७. RV. I. 147. 2; VS. 12. 42.

८. Cf. Ms. ii. 9:

देवाश्च वा असुराश्चास्पर्धन्त नेमे देवा आसन्नेमेऽसुराः ।

९. Cf. SRV. I. 24. 10. p. i. 132.

१०. Cf. SRV. I. 166. 11. p. i. 728.

११. Cf. Tait. B. I. 5. 2. 5, 6: अमुँ स लोकं नक्षते । तन्नक्षत्राणां नक्षत्रत्वम् । देवगृहा वै नक्षत्राणि ।......यानि वा इमानि पृथिव्याश्चित्राणि तानि नक्षत्राणि ।

१२. Quotation is untraced. Cf. Tait. Br. II. 7. 18. 3. न वा इमानि क्षत्राण्यभूवन्निति । तन्नक्षत्राणां नक्षत्रत्वम् ।

१३. Cf. SRV. I. 50. 2. p. i. 248.

१४. RV. I. 24. 10.

१५. RV. IV. 7. 3.

[व॒म्रीभिः॑ पु॒त्रम॒ग्रुवो॑ अदा॒नम्[1]]
यद॒त्त्युप॒जिह्वि॑का॒ यद्व॒म्रो अ॑ति॒सर्प॑ति[2] ।

इत्यपि निगमो भवति [निगमौ भवतः[3]]
ऊर्दरं कृदरमित्यावपनस्य । ऊर्दरमुद्दीर्णं भवति । ऊर्जं दीर्णं वा ।

तमू॒र्द॒रं न पृ॑णता॒ यवे॑न[4] ।

इत्यपि निगमो भवति । तमूर्दरमिव पूरयति यवेन । कृदरं कृतदरं भवति ।

समि॑द्धो अ॒ञ्जन् कृद॑रं मती॒नाम्[5] ।

इत्यपि निगमो भवति ॥ २० ॥
रम्भः पिनाकमिति दण्डस्य । रम्भ आरभन्त एनम् ।

आ त्वा॑ र॒म्भं न॒ जिव्र॑यो रर॒म्भ[6] ।

इत्यपि निगमो भवति । आरभामहे त्वा जीर्णा इव दण्डम्[7] ।
पिनाकं प्रतिपिनष्ट्येनेन ।

कृत्तिवासा॒ः पिना॑कह॒स्तोऽव॑ततध॒न्वा ।

इत्यपि निगमो भवति ।
मेना ग्ना इति स्त्रीणाम्[9] । स्त्रियः स्त्यायतेरपत्रपणकर्मणः[10] । मेना मानयन्त्येनाः[11] । ग्ना गच्छन्त्येनाः[12] ।

अ॒मे॒नाँश्चि॒ज्जनि॑वतश्चकर्थ[13] ।

ग्नास्त्वाकृन्तन्नपसोऽतन्वत[14] ।

इत्यपि निगमौ भवतः ।
शेपो वैतस इति पुंस्प्रजननस्य[15] । शेपः शपतेः स्पृशतिकर्मणः । वैतसो वितस्तं भवति ।

---

१. RV. IV. 19. 9. It is omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

२. RV. VIII. 102. 21; VS. 11. 24.

३. निगमौ भवतः is read by C 1, C 2, C 3, M 1, M 2, R 1, R 2, R 5, S. and Roth.

४. RV. II. 14. 11.

५. VS. 29. 1.

६. RV. VIII. 45. 20.

७. Cf. SRV. VIII. 45. 20. p. iii. 432.

८. KS. 9. 7; cf. VS. 3. 61.; S'B. 2. 6. 2. 7; TS. 1. 8. 6. 2.

९. Cf. SRV. I. 51. 13; I. 161. 4; IV. 34. 7; V. 43. 6. pp. i. 260, 679; ii. 445, 558.

१०. स्त्रियः...कर्मणः is omitted in the passage quoted by SRV. I. 15, 3. 62. 7. pp. i. 93, 308; cf. also I. I. 51. 13. p. i. 260. Cf. PMbh. स्त्यायतेरेव स्त्री......स्त्यायत्यस्यां गर्भ इति । Vol. I. p. 245, 246.

११. Quoted by SRV. I. 51. 13. p. i. 260.

१२. Quoted by SRV. I. 15. 3. p. i. 93.

१३. RV. V. 31. 2.

१४. MS. 1. 9. 4: 134. 8; KS. 9. 9.

१५. Cf. SRV. IX. 113. 4; X. 95. 4. pp. iii. 829; IV. 310.

यस्यामुशन्तः प्रहराम शेपम्[1] ।
त्रिःस्म माह्नः श्नथयो वैतसेन[2] ।

इत्यपि निगमौ भवतः ।

अयैनेत्युपदेशस्य ।

अया ते अग्ने समिधा विधेम[3] । इति स्त्रियाः ।
एना वो अग्निम्[4] । इति नपुंसकस्य ।
एना पत्या तन्वं संसृजस्व[5] । इति पुंसः ।

सिषक्तु[6] सचत इति सेवमानस्य[7] ।

स नः सिषक्तु यस्तुरः[8] । स नः सेवतां यस्तुरः ।
सचस्वा नः स्वस्तये[9] । सेवस्व नः स्वस्तये[10] ।

स्वस्तीत्यविनाशनाम[11] । अस्तिरभिपूजितः । सु[12] अस्तीति ।
भ्यसते रेजत इति भयवेपनयोः[13] ।

यस्य शुष्माद्रोदसी अभ्यसेताम्[14] ।
रेजते अग्ने पृथिवी मखेभ्यः[15] ।

इत्यपि निगमौ[16] भवतः ।

द्यावापृथिवीनामधेयान्युत्तराणि चतुर्विंशतिः ।

तयोरेषा भवति ॥ २१ ॥

---

१. RV. X. 85. 37; cf. AV. 14. 2. 38.

२. RV. X. 95. 5.

३. RV. IV. 4. 15.

४. RV. VII. 16. 1; SV. 1. 45; 2. 99; VS. 15. 32.

५. RV. X. 85. 27; cf. AV. 14. 1. 21.

६. सिषक्ति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. Cf. SRV. I. 18. 2; 38. 8. pp. i. 104, 205.

८. RV. I. 18. 2; VS. 3. 29.

९. RV. I. 1, 9; VS. 3. 24.

१०. Cf. SRV. VIII, 5. 2. p. iii. 255.

११. ०विनाशि. Roth's edition. Durga gives विनाश as a Variant.

१२. स्वस्तीति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; & Roth.
Cf. SRV. VIII. 1. 1. p. iii. 6; cf. also I. 35. 1; 89. 6.

१३. Cf. SRV. I. 31. 3; 87. 3; II. 12. 1; pp. i. 159, 390; ii. 32.

१४. RV II. 12. 1; AV. 20. 34. 1.

१५. RV. VI. 66. 9.

१६. निगमो Roth's edition.

कतरा पूर्वा कतरापरायोः कथाजाते कवयः को विवेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥[1]

कतरा पूर्वा कतरापरैनयोः[2]। कथं जाते। कवयः क एने विजानाति। सर्वमात्मना बिभृतो यद्ध। एनयोः कर्म। विवर्तेते चैनयोः। अहनी अहोरात्रे। चक्रियेव चक्रयुक्ते इवेति। द्यावापृथिव्योर्महिमानमाचष्ट आचष्टे ॥ २२ ॥

इति तृतीयोऽध्यायः ।

[कर्मनामानि[1] परिषद्यं[2] न हि ग्रभाय[3] शासद्वह्निः[4] अभ्रातेव[5] न जामये[6] मनुष्यनामानि[7] तद्द्य[8] दशावनिभ्यो[9][10]ऽभीदं त्वया वयं[11] यत्रा[12] सुपर्णा बहुनामानि[13] तनूत्यजेव[14] कुहस्विच्चतुर[15][16]श्चित्प्रियमेधवदर्थ[17][18] लुप्तोपमान्यर्चति[19] द्विषो[20] रम्भः[21] कतरा[22] पूर्वा द्वाविंशतिः ॥][3]

॥ इति निरुक्ते पूर्वषट्के तृतीयोऽध्यायः समाप्तः ॥

---

१. RV. I. 185. 1.
२. Cf. SRV. I, 185. 1. p. i. 772.
३. Small figure within brackets represents the corresponding section of the third chapter of the *Nirukta*.

॥ अथ चतुर्थोऽध्यायः ॥

एकार्थमनेकशब्दमित्येतदुक्तम् । अथ यान्यनेकार्थान्येकशब्दानि[1] तान्यतोऽनुक्रमिष्यामः । अनवगतसंस्कारांश्च निगमान् । तदैकपदिकमित्याचक्षते ।

जहा जघानेत्यर्थः ॥ १ ॥

को नु मर्या अमिथितः सखा सखायमब्रवीत् ।
जहा को अस्मदीषते[2] ॥

मर्या इति मनुष्यनाम । मर्यादाभिधानं वा स्यात् । [मर्यादा मर्यैरादीयते[3]] मर्यादा मर्यादिनोर्विभागः । मेथतिराक्रोशकर्मा । अपापकं जघान कमहं जातु । कोऽस्मद्भीतः पलायते[4] ।

निधा पाश्या भवति । यन्निधीयते । पाश्या पाशसमूहः । पाशः पाशयतेः । विपाशनात् ॥ २ ॥

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान्[5] ॥

वयो वेर्बहुवचनम् । [सुपर्णाः[3]] सुपतना आदित्यरश्मय उपसेदुरिन्द्रं याचमानाः[6] । अपोर्णुह्याध्वस्तं चक्षुः । चक्षुः ख्यातेर्वा । चष्टे वा । पूर्धि पूरय देहीति वा । मुञ्चास्मान् पाशैरिव बद्धान् ॥

पार्श्वतः श्रोणितः शितामतः[9] ।

पार्श्वं पर्शुमयमङ्गं भवति । पर्शुः स्पृशतेः । संस्पृष्टा पृष्ठदेशम् । पृष्ठं स्पृशतेः[10] । संस्पृष्टमङ्गैः । अङ्गमङ्गनात् । अञ्चनाद्वा । श्रोणिः श्रोणतेर्[11]गतिचलाकर्मणः । श्रोणि-

---

१. यान्यन्येका० M 3.
२. RV. VIII. 45. 37.
३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1 , W 2, W 3;
४. Quoted by SRV. VIII. 45. 37. p. iii. 435. cf. BD. ii. 109,
५. RV. X, 73. 11; SV. 1. 319.
६. याजमानाः C 3.
७. Cf. SRV. I. 164. 14. p. i. 701,
८. Cf. SRV. 1. 35. 12. p. i. 195.
९. Fragment of VS, 21. 43.
१०. Cf. SRV. I. 164. 1. p. 1. 696.
११. श्रोयते: C 5.

अलतीव गच्छतः। द्योः शिताम भवति[1]। दोर्द्रवतेः। योनिः शितामेति शाकपूणिः। विषितो भवति। श्यामतो यकृत्त इति तैटीकिः। श्यामं[2] श्यायतेः। यकृद् यथा कथा च[3] कृत्यते[4]। शितिमांसतो मेदस्त इति गालवः। शितिःश्यतेः[5]। मांसं माननं वा। मानसं वा। मनोऽस्मिन्त्सीदतीति वा। मेदो मेघतेः॥ ३॥

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः।
राधस्तन्नो विदद्वस उभयाहस्त्या भर[6]॥

यदिन्द्र [चित्रं[7]] चायनीयं मंहनीयं धनमस्ति। यन्म इह नास्तीति वा। त्रीणि मध्यमानि पदानि[8]। त्वया नस्तद् दातव्यम्। अद्रिवन्। अद्रिरादणात्येनेन। अपि वात्तेः स्यात्[9][10]।

ते सोमादो[11]। इति ह विज्ञायते।

राध इति धननाम। राध्नुवन्त्यनेन[12]। तन्नस्त्वं वित्तधनोभाभ्यां हस्ताभ्यामाहर।

उभौ समुद्धौ[13] भवतः।

दमूना दममना वा। दानमना वा। दान्तमना वा[14]। अपि वा दम इति गृहनाम। तन्मना स्यात्[15]। मनो मनोतेः॥ ४॥

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान्।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि[16]॥

अतिथिरभ्यतितो गृहान्भवति। अभ्येति तिथिषु परकुलानीति[17] वा। [परे[18]]

१. Cf. BD. ii. 114.

२. शामं M 2.

३. चिद् C 1.

४. कृचते C 4, C 5, M 3, Mi.

५. शतेः C 3, C 5, M 3, W 2.

६. RV. V. 39. 1; SV. 1. 345; 2. 522.

७. Omitted by, BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

८. Quoted by SRV. V. 39. 1. p. ii. 573.

९. Quoted by SRV. VIII. 4. 21. p. iii. 254.

१०. स्यात् is omitted by C 1. cf. SRV. I. 129. 10. p. i. 588.

११. RV. X. 94. 9. It looks as if Yāska did not think it to be a Vedic quotation otherwise he would have used the words, as he usually does:, इत्यपि निगमो भवति instead of इति ह विज्ञायते which are generally used with Brâhmaṇa quotations.

१२. Omitted by Durga.

१३. समुबद्धौ BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१४. Cf. SRV. I. 123. 3; VI. 71. 4. pp. i. 558, ii. 883.

१५. Cf. SRV. I. 60. 4; IV. 11. 5; pp. i. 295: ii. 381.

१६. RV. V. 4. 5; AV. 7. 73. 9.

१७. परगृहाणीति वा परकुलानीति वा M 1.

१८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

गृहाणीति वा । दुरोण इति गृहनाम । दुरवा भवन्ति दुस्तर्पाः । इमं नो यज्ञमुपयाहि विद्वान् । सर्वा अग्ने अभियुजो विहत्य शत्रूयतामाभर[2] भोजनानि । विहत्यान्येषां बलानि शत्रूणां भवनादाहर भोजनानीति वा । धनानीति वा ।

मूषो मूषिका इत्यर्थः । मूषिकाः पुनर्मुष्णातेः । मूषोऽप्येतस्मादेव[1] ॥ ५ ॥

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो
वित्तं मे अस्य रोदसी[7] ॥

सन्तपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवः । मूषिका इवास्नातानि सूत्राणि व्यदन्ति । स्वाङ्गाभिधानं वा स्यात् । शिश्नानि व्यदन्तीति वा । सन्तपन्ति माध्यः कामाः । स्तोतारं ते शतक्रतो [वित्तं मे अस्य रोदसी[11]] । जानीतं मेऽस्य द्यावापृथिव्याविति ।

त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिबभौ । तत्र ब्रह्मेतिहासमिश्रमृङ्मिश्रं गाथामिश्रं भवति । त्रितस्तीर्णतमो मेधया बभूव । अपि वा संख्यानामैवाभिप्रेतं स्यात् । एकतो द्वितस्त्रित इति त्रयो बभूवुः[12] ॥ ६ ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि[13] ॥

ईषणेन वैषणेन[14] वार्षणेन वा । ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव धनस्य । प्रवर्धय च न आयूंषि सोमराजन् । अहानीव सूर्यो वासराणि । वासराणि वेसराणि विवासनानि गमनानीति वा ।

कुरुतनेत्यनर्थका उपजना भवन्ति । कर्तनहन्तनयातनेति ।

जठरमुदरं भवति । जग्धमस्मिन्ध्रियते[15] धीयते वा ॥ ७ ॥

---

१. अयमपीतरोऽतिथिरेतस्मादेव is added after वा by Durga & S'ivadatta.

२. Cf. SRV. III. 25. 5. p. ii. 200.

३. ०आहर C 1, C 4, C 5, M 3.

४. निहत्य० C 1, C 2, C 3, M 1, M 2, R 1, R 2, R 5, S.

५. भवतामाहर BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. Cf. SRV. I. 105. 8. p. i. 464.

७. RV. I. 105. 8; X. 32. 2; cf. BD. VII. 34.

८. वदन्ति C 3, C 4, C 5, M 3.

९. Cf. SRV. I. 105. 8. p. i. 464.

१०. Cf. SRV. X. 33. 3; p. IV. 99.

११. Omitted by BK, C 4, C 5, Kn, M. 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. Cf. SRV. X. 1. 3. p. IV, 2. Durga cites the following passage: भार्यागारेणाभ्युपादयत् तत एकतोऽजायत । द्वितीयं ततो द्वितः । तृतीयं ततस्त्रितः ।

१३. RV. VIII. 48. 7.

१४. Cf. SRV. I. 128. 5. p. i. 581.

१५. Cf. SRV. I. 112. 17. p. i. 492.

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम्[1] ॥

मरुत्वानिन्द्र [मरुद्भिः[2]] तद्वान् । वृषभो वर्षितापाम्[3] । रणाय रमणीयाय संग्रामाय । पिब सोमम् । अनुष्वधमन्वन्नम् । मदाय मदनीयाय जैत्राय । आसिञ्चस्व जठरे मधुन ऊर्मिम् । मधु सोममित्यौपमिकं माद्यतेः । इदमपीतरन्मध्वेतस्मादेव । त्वं राजासि पूर्वेष्वप्यहःसु सुतानाम्[4] ॥ ८ ॥

तितउ परिपवनं भवति । ततवद्वा । तुन्नवद्वा । तिलमात्रतुन्नमिति वा[5] ॥ ९ ॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि[6] ॥

सक्तुमिव परिपवनेन पुनन्तः । सक्तुः सचतेः । दुर्धावो भवति । कसतेर्वा[7] स्याद्विपरीतस्य । विकसितो भवति । यत्र धीरा मनसा वाचमकृषत प्रज्ञानम् । धीराः प्रज्ञानवन्तो ध्यानवन्तः[8] । तत्र सखायः सख्यानि संजानते । भद्रैषां लक्ष्मीर्निहिताधिवाचि [इति[9]] । भद्रं भगेन व्याख्यातम् । भजनीयं[10] भूतानामभिद्रवणीयम् । भवद्रमयतीति वा । भाजनवद्वा । लक्ष्मीर्लाभाद्वा । लक्षणाद्वा । [लप्स्यनाद्वा[11]] । लाञ्छनाद्वा[12] । लषते र्वा स्यात्प्रेप्साकर्मणः । लग्यते र्वा स्यादाश्लेषकर्मणः । लज्जते र्वा स्यादश्लाघाकर्मणः[13] ।

शिप्रे इत्युपरिष्टाद्[14]व्याख्यास्यामः ॥ १० ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै[15] ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते । यदासावयुङ्क्त[16] हरणानादित्यरश्मीन् । हरितोऽश्वा[17]निति वा । अथ रात्री वासस्तनुते सिमस्मै ।

---

१. RV. III. 47. 1; VS. 7. 38.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. वा is added after अपाम् by C 3.

४. Quoted by SRV. III. 47. 1. p. ii. 284.

५. Quoted by SRV. X. 71. 2. p. iv. 220.

६. RV. X. 71. 2.

७. कपतेः C 4, M 3.

८. ज्ञानवन्तः W 2.

९. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१०. भन्दनीयं is added. after भजनीय by C 1.

११. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. लञ्छनाद्वा BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१३. Cf. PMbh. i. 1. 1. p. i. 4.

१४. See N. 6. 17.

१५. RV. I. 115. 4; AV. 20. 123. 1; VS. 33. 37.

१६. ॰युक्त BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; cf. SRV. I. 115. 4.

१७. अश्वानीति W 2.

वेसरमहरवयुवती सर्वस्मात् । अपि वोपमार्थे स्यात् । रात्रीव वासस्तनुत इति । तथापि निगमो भवति ।

पुनः समव्यद्विततं वयन्ती[२] । समनात्सीत ॥ ११ ॥

इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा[३] ॥

इन्द्रेण हि संदृश्यसे संगच्छमानोऽविभ्युषा गणेन । मन्दू मदिष्णू । युवां स्थः । अपि वा मन्दुना तेनेति स्यात् । समानवर्चसेत्येतेन व्याख्यातम्[४]॥ १२ ॥

ईर्मान्तासः सिलिकमध्यमासः संशूरणासो दिव्यासो अत्याः ।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः[५] ॥

ईर्मान्ताः समीरितान्ताः। [सुसमीरितान्ताः[६]] पृथ्वन्ता वा । सिलिकमध्यमाः संसृतमध्यमाः शीर्षमध्यमा वा । अपि वा शिर आदित्यो भवति । यदनुशेते सर्वाणि भूतानि । मध्ये चैषां तिष्ठति । इदमपीतरच्छिर एतस्मादेव । समाश्रितान्येतदिन्द्रियाणि भवन्ति । संशूरणास [दिव्यासो अत्याः[९]] शूरः शवतेर्गतिकर्मणः । दिव्या दिविजाः । अत्या अतनाः[७] । हंसा इव श्रेणिशो यतन्ते । हंसा हन्तेर्घ्नन्त्यध्वानम्[८] । [श्रेणिश इति] श्रेणिः श्रयतेः । समाश्रिता भवन्ति । यदाक्षिषुर्यदापन्[१०] । दिव्यमज्ममजनिमाजिमश्वाः[११] ।

अस्त्यादित्यस्तुतिरश्वस्य । आदित्यादश्वो निरतष्ट इति ।

सूरादश्वं वसवो निरतष्ट[१२] । इत्यपि निगमो भवति ॥ १३ ॥

कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः[१३] ॥

कायमानश्चायमानः कामयमान इति वा । वनानि । त्वं यन्मातॄरपोऽगम उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनम् । दूरे यत् सन्निह भवसि जायमानः[१४] ।

---

१. वासरम् SRV. I. 115. 4. p. i. 511.
२. RV. II. 38. 4.
३. RV, I. 6. 7; AV. 20. 40. 1; 70. 3; SV. 2. 200.
४. Cf. SRV. I. 6. 7. p. i. 52; cf. BD. ii. 141.
५. RV. I. 163. 10; VS. 29. 21.
६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
७. अथानुदात्तं is added often अतनाः by C 1.
८. P.Mbh. Vol. III. p. 21, हम्मतेर्हंसः । हन्तेर्हंसः । हन्त्यध्वानमिति ।
९. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
१०. यदापुः SRV. I. 163. 10. p. i. 694.
११. Cf. SRV. loc. cit.
१२. RV. I. 163. 2; VS. 29. 13.
१३. RV. III. 9. 2, SV. 1. 53.
१४. Cf. SRV. III. 9. 2. p. ii. 160

लो॒धं नय॑न्ति प॒शु मन्य॑मानाः ।

लुब्धमृषिं नयन्ति पशुं मन्यमानाः ।

शी॒रं पा॒व॒कशो॑चिषम्[2][3] । पावकदीप्तिम् । अनुशायिनमिति वा । आशिनमिति वा ॥ १४ ॥

क॒नी॒न॒केव॑ वि॒द्र॒धे नवे॑ द्रु॒प॒दे अ॒र्भ॒के[4] ।
ब॒भ्रू यामे॑षु शो॒भेते[5] ॥

कनीनके कन्यके । कन्या कमनीया भवति । केयं नेतव्येति[7] वा [कमनेनानीयत इति वा[6]] कनतेर्वा स्यात्कान्तिकर्मणः । कन्ययोरधिष्ठानप्रवचनानि । सप्तम्या एकवचनानीति शाकपूणिः । वृद्ध्योर्[8]दारुपाद्वोः । दारु दृणातेर्वा[9] । द्रूणातेर्वा । तस्मादेव द्रु । नवे नवजाते । अर्भके अवृद्धे[10] । ते यथा तदधिष्ठानेषु शोभेते एवं बभ्रू यामेषु शोभेते । बभ्र्वोरश्वयोः[11] संस्तवः[12]

इदं च मेऽदादिदं[13] च मेऽदादित्यृषिः प्रसंख्यायाह ।

सु॒वास्त्वा॒ अधि॑ तु॒ग्वनि[14] ।

सुवास्तुर्नदी । तुग्व तीर्थं भवति । तूर्णमेतदायन्ति ।

कु॒विन्नं॑सन्ते म॒रुतः॒ पुन॑र्नः[15] ।

पुनर्नो नमन्ते[16] मरुतः । नसन्त[17] इत्युपरिष्टाद्[18]व्याख्यास्यामः ।

---

१. RV. III. 53. 23; cf. BD. IV. 117–120. Durga Remarks: यस्मिन् निगमे एष शब्दः सा वसिष्ठद्वेषिणी ऋक् । अहं च कापिष्ठलो वासिष्ठः । अतस्तां न निर्ब्रवीमीति ।

२. RV. III. 9. 8; VIII. 43. 31; 102. 11.

३. Cf. SRV. VIII. 102. 11. p. iii. 596.

४. RV. IV. 32. 23.

५. Cf. SRV. I. 123. 10. p. i. 560.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. Cf. BD. IV. 44.

८. विद्धयोः C 1, M 1,

९. दृणातेः C 4, C 5, C 6, M 3, W 2.

१०. अवृद्धे C 5.

११. रश्मयोः C 4, C 5, M 3, Mi, W 2.

१२. Cf. BD. IV. 144.

१३. अदात् is omitted by M 3, W 2.

१४. RV. VIII. 19. 37.

१५. RV. VII. 58. 5.

१६. नवन्ते C 4, C 5, M 3, W 1, W 2.

१७. नसत BK, C 4, C 5, Kn, M 3, R 4, R 6, W 1, W 2, W 3.

१८. See. N. 7. 17.

ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम्[1] ।

ये ते मदा आहनवन्त वंचनवन्तस्तैरिन्द्रं चोदय दानाय मघम् ॥ १५ ॥[2]

उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम्[3] ॥

उपादर्शि शुन्ध्युवः । शुन्ध्युरादित्यो भवति । शोधनात् । तस्यैव वक्षो भास्साध्यूहम्[4] । इदमपीतरद्वक्ष एतस्मादेव । अध्यूहं[5] काये । शकुनिरपि शुन्ध्युरुच्यते । शोधनादेव । उदकचरो भवति । आपोऽपि शुन्ध्युव उच्यन्ते । शोधनादेव । नोधा ऋषिर्भवति । नवनं दधाति[6] । स यथा स्तुत्या कामानाविष्कुरुत एवमुषा[7] रूपाण्याविष्कुरुते । अद्मसत् । अद्मान्नं भवति । अद्मसादिनीति वा । अद्मसानिनीति[8] वा । ससतो बोधयन्ती । शश्वत्तमागात्पुनरेयुषीणाम् । [स्वपतो बोधयन्ती][9] शाश्वतिकतमागात्पुनरेयुषीणाम्[10] ।

ते वाशीमन्त इष्मिणः[11] ।

ईषणिन इति वैषणिन इति वार्षणिन इति वा । वाशीति वाङ्नाम । वाश्यत इति सत्याः ।

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम्[12] ।

अभिवहन[13]स्तुतिमभिषवण[14]प्रवादां[15] स्तुतिं[16] मन्यन्ते । ऐन्द्री त्वेव शस्यते ।

परितक्म्येत्युपरिष्टाद्[17] व्याख्यास्यामः ॥ १६ ॥

---

१. RV. IX. 75. 5.

२. Cf. SRV. IX. 75. 5. p. iii. 723.

३. RV. I. 124. 4.

४. भालोऽध्यूढम् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; भालोध्यूढम् S'ivadatta.

५. अध्यूढं C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

६. Cf. SRV. I. 61. 14. p. i. 302.

७. ०मुखा C 5.

८. अश्नसानिनीति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; cf. SRV. I. 124. 4.

९. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१०. आगामिनीनाम् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S & Roth. SRV. I. 124. 4–the entire passage being quoted.

११. RV. I. 87. 6.

१२. RV. III. 53. 3.

१३. अभिभवन० C 5.

१४. ०अधिषवणा० C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S & Durga.

१५. ०प्रवादा BK, C 4, C 5, Kn, Mi; R 4, R 6, W 1, W 2, W 3.

१६. स्तुति C 4, M 3, W 2.

१७. See N. 11. 25.

सुविते सु उते सूने । प्रजायामिति वा ।

सुविते मा धाः[1] । इत्यपि निगमो भवति ।

दयतिरनेककर्मा ।

नवेन पूर्वं दयमानाः स्याम[2] । इत्युपदयाकर्मा ।

य एक इद्विदयते वसु[3] । इति दानकर्मा वा विभागकर्मा वा ।

दुर्वर्तुर्भीमो दयते वनानि[4] । इति दहतिकर्मा । दुर्वर्तुर्दुर्वारः ।

विदद्वसुर्दयमानो वि शत्रून्[5] । इति हिंसाकर्मा ॥

इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबतमश्विना तान् ।
अहं[6] हि वामूतये वन्दनाय मां वायसो दोषा दयमानो अबूबुधत्[7] ॥

दयमान[8] इति ।

नू चिदिति निपातः । पुराणनवयोः[9] । नू चेति च ।

अद्या चिन्नू चित्तदपो नदीनाम्[10] ।

अद्य च पुरा च तदेव कर्म नदीनाम् ।

नू च पुरा च सदनं रयीणाम्[11][12] ।

अद्य च पुरा च सदनं रयीणाम् । रयिरिति धननाम । रातेर्दानकर्मणः ॥ १७॥

विद्याम तस्य ते वयमकूपारस्य दावने[13] ।

विद्याम तस्य ते वयमकूपरणस्य दानस्य । आदित्योऽप्यकूपार उच्यते । अकूपारो भवति दूरपारः[14] । समुद्रोऽप्यकूपार उच्यते । अकूपारो भवति महापारः । कच्छपोऽप्यकूपार उच्यते । अकूपारो न कूपमृच्छतीति । कच्छपः कच्छं पाति । कच्छेन पातीति वा । कच्छेन पिबतीति वा[15] । कच्छः खच्छः[16] खच्छदः । अयमपीतरो नदीकच्छ एतस्मादेव । कमुदकम् । तेन छाद्यते ।

शिशीते शृङ्गे रक्षसे विनिक्षे[17] ।

---

१. TS. i. 2. 10.2; KS. 2. 8.

२. KS. 19. 3; TB. 111. 5. 13. 1; N. 9. 43; cf. VS. 28. 16.

३. RV. I. 84. 7; AV. 20. 63. 4; SV. 1. 389; 2. 691.

४. RV. VI. 6. 5.

५. RV. III. 34. 1; AV. 20. 11. 1.

६. अयं C 1, C 2, C 3, M 1, R 1, R 2, R 5, S.

७. Quotation is untreced. Durga explains the 4th pāda only & remarks: मृग्योऽत्रशेषः ।

८. दीयमान C 1.

९. Cf. SRV. I. 136. p. i. 612.

१०. RV. VI. 30. 3.

११. रयीण्यम् C 4, M 3, W 2.

१२. RV. I. 96. 7.

१३. RV. V. 39. 2; SV. 2. 523.

१४. Quoted by SRV. X. 109. 1. p. IV. 364.

१५. cf. PMbh. Vol. II. p. 98. कच्छेन पिबति कच्छपः ।

१६. खच्छ: C 1.

१७. RV. V. 2. 9.

निश्यति शृङ्गं रक्षसो विनिक्षणाय[1] । रक्षो रक्षितव्यमस्मात् । रहसि क्षणोतीति वा । रात्रौ नक्षत इति वा ।

अग्निः सुतुकः सुतुकेभिरश्वैः[3] ।

सुतुकनः सुतुकनैरिति वा । सुप्रजाः सुप्रजोभिरिति वा ।

सुप्रायणा अस्मिन्यज्ञे वि श्रयन्ताम्[4] ।

सुप्रगमनाः[5] ॥ १८ ॥

देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे[6] ।

देवा नो यथा सदा वर्धनाय स्युः । अप्रायुवोऽप्रमाद्यन्तः । रक्षितारश्च । अहन्यहनि ।

च्यवन ऋषिर्भवति । च्यावयिता स्तोमानाम् । च्यवानमित्यप्यस्य निगमा भवन्ति ।

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः[8] ।

युवं[9] च्यवनम्[10] । सनयं पुराणम् । यथा रथं पुनर्युवानं चरणाय ततक्षथुः । युवा प्रयौति कर्माणि । तक्षतिः करोतिकर्मा[11] ।

रजो रजतेः । ज्योती रज उच्यते[12] । उदकं रज उच्यते[13] । लोका रजांस्युच्यन्ते । असृगहनी रजसी उच्येते[14] ।

[रजांसि चित्रा वि चरन्ति तान्यवः[16] । इत्यपि निगमो भवति ।][17]

---

१. Cf. SRV. V. 2. 9. p. ii. 502.

२. Cf. SRV. I. 35. 10; 129. 11; pp. i. 190, 588.

३. RV. X. 3. 7.

४. VS. 28. 5.

५. सुप्रगमाना: C 4, C 5, M 3, W 2.

६. RV. I. 89. 1; VS. 25. 14.

७. असन् is given as a variant by Durga who however attributes it to the carelessness of the Scribes': इत्येषः प्रमादपाठः ।

८. RV. X. 39. 4.

९. युवां M 1.

१०. च्यवानं M 2.

११. Quoted by SRV. X. 39. 4. p. IV. 117.

१२. Quoted by SRV. VI. 62. 2. p. ii. 859.

१३. Cf. SRV. I. 161. 1; 164. 14; II. 39. 7. pp. i. 676, 701; ii. 119.

१४. Cf. SRV. I. 33. 7; 35. 2; 50. 7; 90. 7; 110. 6; VI. 70. 5; X. 129. 1; pp. i. 176, 186, 250, 401, 482; ii. 879; IV. 423. cf. 'SB. VI. 3. 1. 18. इमे वै लोका रजाᳬंसि ।

१५. Cf. SRV. I. 124. 5. p. i. 564. The entire passage: रजो रजते उच्येते is quoted SRV. I. 19. 3. p. i. 107.

१६. RV. V. 63. 5.

१७. Omitted by BK, C 4, C 5, Kn, M 3, Mi 1, R 4, R 6, W 1, W 2, W 3; and Durga. It is struck out in C 1.

हरो हरतेः । ज्योतिर्हर[1] उच्यते । उदकं हर उच्यते । लोका हरांस्युच्यन्ते[2] । असृगहनी हरसी उच्येते ।

[प्रत्यग्ने हरसा हरः शृणीहि[3] । इत्यपि निगमो भवति ।][4]

जुहुरे वि चितयन्तः[5] । जुह्विरे विचेतयमानाः ।

व्यन्त इत्येषोऽनेककर्मा ।

पदं देवस्य नमसा व्यन्तः[6] । इति पश्यतिकर्मा ।

वीहि शूर पुरोळाशम्[7] । इति खादतिकर्मा ।

वीतं पातं पयस उस्रियायाः[8] । अश्नीतं पिबतं पयस उस्रियायाः । उस्रियेति गोनाम । उस्राविणो[9]ऽस्यां भोगाः । [उस्रेति च[10]]

त्वामिन्द्र मतिभिः सुते सुनीथासो वसूयवः[11] ।
गोभिः क्राणा अनूषत[12] ॥

गोभिः कुर्वाणा[13] अस्तोषत ।

आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः[14] ।

आसिञ्च हरिं द्रोरुपस्थे द्रुममयस्य । हरिः सोमो हरितवर्णः । अयमपीतरो हरिरेतस्मादेव । वाशीभिस्तक्षताश्मन्मयीभिः । वाशीभिरश्ममयीभिरिति वा । वाग्भि[15]रिति वा ।

स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः[16] ।

स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य । मा शिश्नदेवा अब्रह्मचर्याः । शिश्नं श्नथतेः[17] । अपि गुर्ऋतं नः । सत्यं वा यज्ञं वा[18] ॥ १९ ॥

---

१. Cf. SRV. X. 87. 25. p. IV. 278.

२. हरा उच्यन्ते BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. RV. X. 87. 25; SV. 1. 95.

४. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga. The line प्रत्यग्ने... भवति is struck out in C 1.

५. RV. V. 19. 2.

६. RV. VI. 1. 4.

७. RV. III. 41. 3; AV. 20. 23. 3.

८. RV. I. 153. 4; AV. 7. 73. 5.

९. उस्राविणो SRV. III. 31. 11. p. 231.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. The quotation is untraced.

१२. Cf. RV. I. 134. 2.

१३. Cf. SRV. I. 134. 2. p. i. 605: क्राणाः कुर्वाण इति यास्कः ।

१४. RV. X. 101. 10

१५. वाग्भिरिति C 4, C 5, M 3, Mi, W 2.

१६. RV. VII. 21. 5.

१७. Quoted by SRV. X. 27. 19. p. IV. 79.

१८. Cf. SRV. I. 2. 8; VII. 22. 5. pp. i. 33; iii. 50.

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत्[1] ॥

आगमिष्यन्ति तान्युत्तराणि युगानि । यत्र जामयः करिष्यन्त्यजामिकर्माणि । जाम्यतिरेकनाम । बालिशस्य वा । समानजातीयस्य[2] वोपजनः । उपधेहि वृषभाय बाहुम् । अन्यमिच्छस्व सुभगे पतिं मदिति व्याख्यातम् ॥ २० ॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात्[3] ॥

द्यौर्मे पिता पाता वा पालयिता[4] वा जनयिता । नाभिरत्र बन्धुर्मे माता पृथिवी महतीयम्[5] । बन्धुः संबन्धनात् । नाभिः संनहनात् ।

नाभ्या सन्नद्धा गर्भा जायन्ते[6] ।

इत्याहुः । एतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते[7] । सबन्धव इति च । ज्ञातिः संज्ञानात् । उत्तानयोश्चम्वो३र्योनिरन्तः । उत्तान उत्ततानः । ऊर्ध्वतानो[8] वा । तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः ।

[शंयुः सुखंयुः ।][9]

अथा नः शं योररपो[10] दधात[11] ।

रपो रिप्रमिति पापनामनी भवतः[12] । शमनं च रोगाणां यावनं[13] च भयानाम्[14] । अथापि शंयुर्बार्हस्पत्य उच्यते[15] ।

तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये[16] ।

इत्यपि निगमो भवति । गमनं यज्ञाय गमनं यज्ञपतये ॥ २१ ॥

---

१. RV. X. 10. 10; AV. 18. 1. 11.
२. असमानजाती॰. Durga.
३. RV. I. 164. 33; AV. 9. 10. 12.
४. Omitted by Durga.
५. महीयम् Durga.
६. Cf. TS. VI. 1. 7. 2.
७. ॰न्त्सनाभय M 1, M 2.
८. ऊर्धतानो C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.
९. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
१०. ॰ररयो M 3.
११. RV. X. 15. 4; VS. 19. 55; Cf. AV. 18. 1. 15.
१२. Cf. SRV. I. 157. 4; VIII. 67. 21; pp. i. 670; iii. 493; Cf. BD. VII. 95.
१३. पावनं C 3, M 3.
१४. Quoted by SRV. I. 93. 7. p. i. 419; Cf. also I. 106. 5. p. i. 470.
१५. Cf. 'SB. I. 9. 1. 24. शंयुर्ह वै बार्हस्पत्यः
१६. TS ii. ' 10. 2; S'B. i. 9. 1. 26.

अदितिरदीना देवमाता[1] ॥ २२ ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्[2] ॥

इत्यदितेर्विभूतिमाचष्टे[3] । एनान्यदीनानीति वा ।

यमेरिरे भृगवः[4] ।

एरिर इतीर्तिरुपसृष्टोऽभ्यस्तः ॥ २३ ॥

उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम्[5] ॥

अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनम्[6] । वस्त्रं वस्तेः । तायुरिति[7] स्तेननाम । संस्त्यानमस्मिन् पापकमिति नैरुक्ताः । तस्यतेर्वा स्यात् । अनुक्रोशन्ति क्षितयः संग्रामेषु । भर इति संग्रामनाम । भरतेर्वा[8] । हरतेर्वा[9] । नीचायमानं नीचैरयमानम् । नीचैर्निचितं[10] भवति । उच्चैरुच्चितं[11] भवति । जस्तमिव श्येनम् । श्येनः शंसनीयं गच्छति । श्रवश्चाच्छा पशुमच्च । यूथम् श्रवश्चापि पशुमच्च यूथम् । प्रशंसां च यूथं च । धनं च यूथं चेति वा । यूथं यौतेः । समायुतं भवति ।

इन्धान एनं जरते स्वाधीः[12] । गृणाति ।

मन्दी मन्दतेः स्तुतिकर्मणः[13] ।

प्र मन्दिने पितुमदर्चता वचः[14] । प्रार्चत मन्दिने पितुमद्वचः ।

गौर्व्याख्यातः[15] ॥ २४ ॥

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
इत्था चन्द्रमसो गृहे[16] ॥

---

१. Cf. BD. ii. 46.

२. RV. I. 89. 10; AV. 7. 6. 1; VS. 25. 23.

३. Cf. SRV. I. 89. 10. p. i. 399.

४. RV. I. 143. 4.

५. RV. IV. 38. 5.

६. Quoted by SRV. IV. 38 5. p. ii. 454.

७. स्तायुः M 3.

८. भारत C 5.

९. Cf. SRV. I. 132. 1. p. i. 598.

१०. निश्चितं Mi.

११. उचितं M 3; उच्चृतं C 3.

१२. RV. X. 45. 1; VS. 12. 18.

१३. Quoted by SRV. I. 101. 1. p. i. 446.

१४. RV. I. 101. 1; SV. 1. 380.

१५. See N. 2. 5.

१६. RV. I. 84. 15; AV. 20. 41. 3; SV. 1. 147; 2. 265.

अत्र ह गोः सममंसतादित्यरश्मयः स्वं नाम । अपीच्यमपचितम्[1] । अपगतम्[2] । अपिहितम् । अन्तर्हितं[3] वा । अमुत्र चन्द्रमसो गृहे ।

गातुर्गतेर्व्याख्यातः[4] ।

[गातुं कृणवन्नुषसो जनाय । इत्यपि निगमो भवति ।[5][6]]

दंसयः कर्माणि । दंसयन्त्येनानि ।

कुत्साय मन्मन्नह्यश्च दंसयः । इत्यपि निगमो भवति ।[7]

स तूताव नैनमश्नोत्यंहतिः ।[8]

स तुताव नैनमंहतिरश्नोति । अंहतिश्चांहश्चांहुश्च[9] हन्तेः । निरूढोपधात् । विपरीतात् ।

बृहस्पते चयसे इत्पियारुम्[10] ।[11]

बृहस्पते यश्चातयसि देवपीयुम् । पीयतिर्हिंसाकर्मा[12] । वियुते द्यावापृथिव्यौ । वियवनात्[13] ।

समान्या वियुते दूरअन्ते[14] ।

समानं संमानमात्रं भवति । मात्रा मानात् । दूरं व्याख्यातम्[15] । अन्तोऽततेः । ऋधगिति पृथग्भावस्य प्रवचनं भवति । अथाप्यृध्नोत्यर्थे दृश्यते[16] ।

ऋधगया ऋधगुताशमिष्ठाः[17] ।

---

१. Omitted by C 3.

२. अपचितम् is Omitted by C 3; is preceded by अपगतम् in C 1, C 6, M 1, M 2.

३. अनन्तिर्हितम् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. See N. 4. 21.

५. RV. IV. 51. 1.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. RV. X. 138. 1.

८. RV. I. 94. 2.

९. चांहः is omitted by C 5.

१०. RV. I. 190. 5.

११. Quoted by SRV. I. 190. 5. p. i. 788.

१२. पीयुतिः C 1, C 2, C 3, C 5, C 7, Mi, W 2, W 3.

१३. वियमनात् C 5, M 3, Mi, W 2; वियुमनात् C 4.

१४. RV. III. 54. 7.

१५. See N. 3. 19.

१६. Quoted by SRV. IX. 64. 30. p. iii. 683.

१७. VS. 8. 20.

ऋभुघन्नयाक्षीः । ऋभुवन्नशमिष्ठा इति च । अस्या इति चास्येति चोदात्तं प्रथमादेशे । अनुदात्तमन्वादेशे । तीव्रार्थतरमुदात्तम् । अल्पीयोऽर्थतरमनुदात्तम्[3] ।

अस्मा ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व ।

[श्रवस्यतामजाश्व ।]

अस्यै नः सातय उपभव । अहेळमानोऽक्रुध्यन् । ररिवान् । रातिरभ्यस्तः । अजाश्वेति पूषणमाह । अजाश्वा अजा अजनाः ।

अथानुदात्तम् ।

दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ।

दीर्घायुरस्या यः पतिर्जीवतु स शरदः शतम् । शरच्छृता अस्यामोषधयो भवन्ति । शीर्णा आप इति वा ।

अस्येत्यस्या इत्येतेन व्याख्यातम् ॥ २५ ॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।

तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥

अस्य वामस्य वननीयस्य । पलितस्य पालयितुः । होतुर्ह्वातव्यस्य । तस्य भ्राता मध्यमोऽस्त्यशनः । भ्राता भरतेर्हरतिकर्मणः । हरते भागं भर्तव्यो भवतीति वा । तृतीयो भ्राता घृतपृष्ठोऽस्यायमग्निः । तत्रापश्यं सर्वस्य पातारं वा पालयितारं वा । विश्पतिं सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्रमिति वा । सप्त सृप्ता संख्या । सप्तादित्यरश्मय इति वदन्ति ॥ २६ ॥

---

१. चास्या इति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

२. ०मनुधत्तम् C 3.

३. Quoted by SRV. VII. 34. 4. p. iii. 78.

४. RV. I. 138. 4.

५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. Quoted by SRV. I. 138. 4. p. i. 618.

७. आज्या C 5.

८. RV. X. 85. 39; AV. 14. 2. 2.

९. शरच्छ्रिता M 3.

१०. अस्या ओषधयो M 3.

११. RV. I. 164. 1; AV. 9. 9. 1.

१२. Cf. BD. IV. 33.

१३. Cf. SRV. I. 9. 4. p. i. 65.

१४. Durga remarks: सप्तमो ह्यसावादित्यः पुत्र इत्येवमैतिहासिका मन्यन्ते । ब्राह्मणोऽपि च । ......तस्मिन्नादित्यः सप्तम इन्द्रोऽष्टतम इति ह विज्ञायते । अथवा सप्तसंख्यायुक्ता अस्य रश्मयः पुत्रास्तेनासौ सप्तपुत्रः ।

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं[1] यत्रेमा विश्वा भुवनाधि तस्थुः[2] ॥

सप्त युञ्जन्ति रथम् । एकचक्रमेकचारिणम्[4] । चक्रं चकतेर्वा । चरतेर्वा । क्रामतेर्वा[3] । एकोऽश्वो वहति सप्तनामादित्यः । सप्तास्मै रश्मयो रसानभिसन्नामयन्ति । सप्तैनमृषयः स्तुवन्तीति वा । इदमपीतरन्नामैतस्मादेव । अभिसन्नामात् । संवत्सरप्रधान उत्तरोऽर्धर्चः । त्रिनाभि चक्रम् । त्र्यृतुः संवत्सरः । ग्रीष्मो वर्षा हेमन्त इति । संवत्सरः संवसन्तेऽस्मिन्भूतानि[5] । ग्रीष्मो ग्रस्यन्तेऽस्मिन्रसाः । वर्षा वर्षत्यासु पर्जन्यः । हेमन्तो हिमवान् । हिमं पुनर्हन्तेर्वा । हिनोतेर्वा । अजरमजरणधर्माणम् । अनर्वमप्रत्यृतमन्यस्मिन्[6] । यत्रेमानि सर्वाणि भूतान्यभिसन्तिष्ठन्ते । तं संवत्सरं सर्वमात्राभिः स्तौति[7] ।

पञ्चारे चक्रे परिवर्तमाने[8] ।

इति पञ्चर्तुतया[9] ।

पञ्चर्तवः संवत्सरस्य[10] ।

इति च ब्राह्मणम् । हेमन्तशिशिरयोः समासेन[11] ।

षळर आहुरर्पितम्[12] ।

इति षळृतुतया । अराः प्रत्यृता नाभौ । षट् पुनः सहतेः ।

द्वादशारं नहि तज्जराय[13] ।
द्वादश प्रधयश्चक्रमेकम्[14] ।

इति मासानाम् । मासा मानात्[15] । प्रधिः प्रहितो भवति ।

तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः[16][17] ।

षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्राः[18] ।

इति च ब्राह्मणं समासेन ।

---

१. RV. 1. 164. 2; AV. 9. 9. 2; 13. 3. 8.

२. Quoted by SRV. I. 164. 2. p. i. 697.

३. Cf. SRV. X. 101. 7. p. IV. 336.

४. Cf. GB. I. 5. 5.

५. संवसन्ति C 3.

६. अन्यस्मिन् is omitted by C 3.

७. ०मात्राभिष्टौति M 3.

८. RV. I. 164. 13; AV. 9. 9. 11.

९. ०र्तुतायाः C 4, M 3, W 2.

१०. Cf. AB. i. 1. 14: द्वादश मासाः पंचर्तवो हेमन्तशिशिरयोः समासेन तावान्संवत्सरः । Cf. S'B. i. 7. 2. 8; XII. 3. 2. 1; Tāṇḍ B. XVIII. 2. 14; 4. 11.

११. ०शिशिरनमासेन BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. RV. I. 164. 12; AV. 9. 9. 12.

१३. RV. I. 164. 11; AV. 9. 9. 3.

१४. RV. I. 164. 48; AV. 10. 8. 4.

१५. Quoted by SRV. I. 164. 48. p. i. 718.

१६. चलाचः M 3.

१७. RV. I. 164. 48; AV. 10. 8. 4.

१८. Cf. GB. I. 5. 5. त्रीणि च ह वै शतानि षष्टिश्च संवत्सरस्याहोरात्राणि । Cf. AB. II. 17. 2: त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि । Cf. S'B. XII. 3. 2. 3. त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि । Cf. KB. iii. 2.

सप्त शतानि विंशतिश्च तस्थुः ।[१]

सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ।[२]

इति च ब्राह्मणं विभागेन विभागेन ॥ २७ ॥

इति चतुर्थोऽध्यायः ।

[[१]एकार्थं [२]कोनु वयः [३]सुपर्णा [४]यदिन्द्र [५]जुष्टो दमूनाः [६]सं मा तपन्तीषिरे[७]णं [८]मरुत्वांस्ति[९]तेउ [१०]सक्तुमिव [११]तत्सूर्यस्येन्द्रे[१२]णै समीर्मान्[१३]तासः [१४]कायमानः [१५]कनीनकेवोपो [१६]अदर्शि [१७]सुविते [१८]विद्याम [१९]देवानो [२०]आघा [२१]द्यौर्मे [२२]ऽदितिर[२३]दिति[२४]रुतस्मात्[२५]राहोस्य [२६]वामस्य [२७]सप्त युञ्जन्ति सप्तविंशतिः ॥][३]

॥ इति निरुक्ते पूर्वपक्षे चतुर्थोऽध्यायः समाप्तः ॥

---

१. RV. I. 164 11; AV. 9. 9. 13.

२. Cf. GB. I. 5. 5; AB. II. 17. 4; S'B. XII. 3. 2. 4; AA. III. 2. 1.

३. Small figure within brackets represents the corresponding section of the fourth chapter of the *Nirukta.*

अथ पञ्चमोऽध्यायः ।

सस्निमविन्दुच्चरणे नदीनाम्[1] । सस्निं संस्नातं मेघम् ।

वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा[2] ।

वोढृतमो ह्वानानां स्तोमो दूतो हुवन्नरौ । नरा मनुष्या नृत्यन्ति कर्मसु[3] । दूतो जवतेर्वा । द्रवतेर्वा । वारयतेर्वा ।

[दूतो देवानामसि मर्त्यानाम्[4] । इत्यपि निगमो भवति][5]

वावशानो वष्टेर्वा । वाश्यतेर्वा ।

सप्त स्वसॄररुषीर्वावशानः[6] । इत्यपि निगमो भवति ।

वार्यं वृणोतेः । अथापि वरतमम् ।

तद्वार्यं[7] वृणीमहे वरिष्ठं गोपयत्यम्[8] ।

तद्वार्यं वृणीमहे । वर्षिष्ठं गोपायितव्यम् । गोपायितारो यूयं स्थ । युष्मभ्यमिति वा ।

अन्ध इत्यन्ननाम । आध्यानीयं भवति ।

आमत्रेभिः सिञ्चता मद्यमन्धः[9] ।

आसिञ्चताऽमत्रैर्मदनीयमन्धः[10] । अमत्रं पात्रम् । अमा अस्मिन्नदन्ति[11] । अमा पुनरनिर्मितं भवति । पात्रं पानात् ।

तमोऽप्यन्ध उच्यते । नास्मिन्ध्यानं भवति[12] । न दर्शनम् । अन्धन्तम इत्यभिभाषन्ते । अयमपीतरोऽन्ध एतस्मादेव ।

---

१. RV. X. 139. 6.

२. RV. VIII. 26. 16.

३. Quoted by SRV. I. 149. 2. p. i. 652.

४. RV. X. 4. 2.

५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. RV. X. 5. 5.

७. तद्वीर्यं C 5.

८. RV. VIII. 25. 13.

९. RV. II. 14. 1.

१०. मद्यमन्धः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3

११. नदन्ति C 4, C 5, M 3. Quoted by SRV. II. 14. 1. p. ii. 41.

१२. Quoted by SRV. I. 62. 5. p. i. 307.

पश्यदक्षण्वान्न वि चेतदन्धः । इत्यपि निगमो भवति ॥ १ ॥[1]

असश्चन्ती भूरिधारे पयस्वती ।[2]

असज्यमाने इति वा । अव्युदस्यन्त्याविति वा । बहुधारे उदकवत्यौ ।[3]

वनुष्यतिर्हन्तिकर्मा । अनवगतसंस्कारो भवति ।[4]

वनुयाम वनुष्यतः । इत्यपि निगमो भवति ।[5]

दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ।[6]

दीर्घप्रततयज्ञमभिजिघांसति यो वयं तं जयेम पृतनासु । दूढ्यं दुर्धियं पापधियम् । पापः पाताऽपेयानाम् । पापत्यमानोऽवाङेव पततीति वा । पापत्यतेर्वा स्यात् ।[7]

तरुष्यतिरप्येवंकर्मा ।

इन्द्रेण युजा तरुषेम वृत्रम् । इत्यपि निगमो भवति ।[8]

भन्दना भन्दतेः स्तुतिकर्मणः ।

पुरुप्रियो भन्दते धामभिः कविः । इत्यपि निगमो भवति ।[9]

स भन्दना उदियर्ति प्रजावतीः । इति च ।[10]

अन्येन मदाहनो याहि तूयम् ।[11]

अन्येन मदहनो गच्छ क्षिप्रम् । आहंसीव भाषमाणेत्यसंभ्यभाषणादाहना इव भवति ।[12] एतस्मादाहनः स्यात् ।[13]

ऋषिर्नदो भवति । नदतेः स्तुतिकर्मणः ।

नदस्य मा रुधतः काम आगन् ।[14]

नदनस्य मा रुधतः काम आगमत् । संरुद्धप्रजननस्य ब्रह्मचारिणः । इत्यृषिपुत्र्या विलपितं वेदयन्ते ॥ २ ॥[15]

---

१. RV. I. 164. 16; AV. 9. 9. 15.
२. RV. VI. 70. 2.
३. Quoted by SRV. VI. 70. 2. p. ii. 880.
४. Quoted by SRV. I. 73. 9; 121. 10. pp. i. 347, 547.
५. RV. I. 132. 1; VIII. 40. 7.
६. RV. VII. 82. 1.
७. पापत्यतेर्वा स्यात् is omitted by Durga.
८. RV. VII. 48. 2.
९. RV. III. 3. 4.
१०. RV. IX. 86. 41.
११. RV. X. 10. 8; AV. 18. 1. 9.
१२. ०णेत्यभ्य०. C 3.
१३. स्याः C 5, M 3.
१४. RV. I. 179. 4; Cf. BD. i. 53: विलापः स्यान्नदस्य मा । Macdonell translates नदस्य 'as of the reed'.
१५. Quoted by SRV. I. 179. 4. p. i. 758.

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः[1] ।

अक्ष्णोतेरित्येवमेके ।

अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः[2] ।

लोपाशः सिंहं प्रत्यञ्चमत्साः[3] ।

क्षियतिनिगमः पूर्वः क्षरतिनिगम उत्तर इत्येके । अनूपे गोमान् गोभिर्यदा क्षियत्यथ सोमो दुग्धाभ्यः क्षरति । सर्वे क्षियतिनिगमा इति शाकपूणिः ।

श्वात्रमिति क्षिप्रनाम । आशु अतनं भवति ।

स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः[4] ।

स पतत्रि चेत्वरं स्थावरं जङ्गमं च यत्तत् क्षिप्रमग्निरकरोज्जातवेदाः[5] ।

ऊतिरवनात् ।

आ त्वा रथं यथोतये[6] । इत्यपि निगमो भवति ।

हासमाने इत्युपरिष्टाद् व्याख्यास्यामः[7] ।

वम्रकः पड्भिरुप सर्पदिन्द्रम्[8] ।

पानैरिति वा । स्पाशनैरिति वा । [स्पर्शनैरिति वा][9]

ससं न पक्वमविदच्छुचन्तम्[10] ।

स्वप्नमेतन्माध्यमिकं[11] ज्योतिरनित्यदर्शनम्[12] । तदिवाविदज्जाज्वल्यमानम् ।

द्विता च सत्ता स्वधया च शंभुः[13] ।

द्वैधं[14] सत्ता मध्यमे च स्थान उत्तमे च । शंभुः सुखभूः[15] ।

---

१. RV. X. 89. 6.

२. RV. IX. 107. 9; SV. 2. 348.

३. RV. X. 28. 4; Omitted by Durga.

४. RV. X. 88. 4.

५. Quoted by SRV. X. 88. 4. p. IV. 279.

६. RV. VIII. 68. 1; SV 1. 354; 2. 1121.

७. See N. 9. 39.

८. RV. X. 99. 12.

९. Omitted by Bk, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

१०. RV. X. 79. 3.

११. मध्यमं BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. Cf. SRV. VIII. 72. 4. p. iii 509: अत्र यास्कः । स्वप्नमेतन्मध्यमं ज्योतिरनित्यदर्शनम्.

१३. RV. III. 17. 5.

१४. द्विधं C 3, M 3.

१५. Quoted by SRV. III. 17. 5. p. ii. 184.

मृगं न व्रा मृगयन्ते[1]।

मृगमिव व्रात्याः प्रैषाः॥ ३॥

वराहो मेघो भवति। वराहारः।

वरमाहारमाहार्षीः[2]। इति च ब्राह्मणम्।

विध्यद्वराहं तिरो अद्रिमस्ता[3]। इत्यपि निगमो भवति।

अयमपीतरो वराह एतस्मादेव। वृहति मूलानि। वरं वरं मूलं बृहतीति वा।

वराहमिन्द्र एमुषम्[4]। इत्यपि निगमो भवति।

अङ्गिरसोऽपि वराहा उच्यन्ते।

ब्रह्मणस्पतिर्वृषभिर्वराहैः[5]।

अथाप्येते माध्यमका देवगणा वराहव उच्यन्ते[6]।

पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून्[7]।

स्वसराण्यहानि भवन्ति। स्वयं सारीण्यपि वा। स्वरादित्यो भवति। स एनानि सारयति।

उस्रा इव स्वसराणि[8]। इत्यपि निगमो भवति।[9]

शर्या अंगुलयो भवन्ति। [सृजन्ति कर्माणि][10] शर्या इषवः शरमय्यः[11]। शरः शृणातेः।

शर्याभिर्न भरमाणो गभस्त्योः[12]।

इत्यपि निगमो भवति।

---

१. RV. VIII. 2.6.

२. The quotation is untraced. It is inserted after एतस्मादेव further-down by C 1, C 2, C 3, C 6, M 1, M 1, M 2, R 1, R 2, R 5, S; Cf. SRV. I. 61. 7. p. i. 299.

३. RV. I. 61. 7; AV. 20. 35. 7.

४. RV. VIII. 77. 10.

५. RV. X. 67. 7. AV. 20. 91. 7.

६. Quoted by SRV. I. 88. 5. p. i. 394.

७. RV. I. 88. 5.

८. RV. I. 3. 8.

९. Cf. SRV. I. 3. 9; VIII. 88. 1; pp. i. 39; iii. 543.

१०. Omitted by BK, C 4. C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

११. Quoted by SRV. I. 148. 4. p. i.651.

१२. RV. IX. 110. 5; SV. 2. 857.

अर्को देवो भवति । यदेनमर्चन्ति[1] । अर्को मन्त्रो भवति । यदनेनार्चन्ति । अर्कमन्नं भवति । अर्चति भूतानि । अर्को वृक्षो भवति । संवृत्तः कटुकिम्ना[2] ॥ ४ ॥

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे[3] ॥

गायन्ति त्वा गायत्रिणः । प्रार्चन्ति तेऽर्कमर्किणः । ब्रह्माणस्त्वा[4] शतक्रत उद्येमिरे वंशमिव । वंशो वनशयो भवति । वननाच्छ्रूयत इति वा[5] ।

पवी रथनेमिर्भवति । यद्विपुनाति भूमिम्[6] ।

उत पव्या रथानामद्रिं भिन्दन्त्योजसा[7] ।

तं मरुतः क्षुरपविना व्ययुः[8][9] ।

इत्यपि निगमौ भवतः । वक्षो व्याख्यातम्[10] ।

धन्वान्तरिक्षम् । धन्वन्त्यस्मादापः[11] ।

तिरो धन्वाति रोचते[12] । इत्यपि निगमो भवति ।

सिनमन्नं भवति । सिनाति भूतानि[13] ।

येन स्मा सिनं भरथः सखिभ्यः[14] । इत्यपि निगमो भवति ।

इत्थामुथेत्येतेन व्याख्यातम्[15] ।

सचा सहेत्यर्थः[16] ।

वसुभिः सचा भुवा[17] । वसुभिः सह भुवौ[18] ।

---

१. अर्चयन्ति C 4, C 5, M 3.

२. Quoted by SRV. I. 10. 1. p. i. 68. Sāyana reads सवृत: for संवृत्तः ।

३. RV. I. 10. 1; SV. I. 342; 2. 694.

४. ब्राह्मणा: C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S, & Roth.

५. Quoted by SRV. I. 10. 1. p. i. 68.

६. Cf. SRV. I. 138. 3; V. 62. 2; also I. 88. 2. pp. i. 620; ii. 642; i. 393.

७. RV. V. 52. 9.

८. भ्ययु: C 4, C 5, M 3, Mi, W 1.

९. According to Durga, the quotation is from Some Brāhmaṇa, the passage in full being. देवा वै वृत्रस्य मर्म नाविदन् । तं मरुतः क्षुरपविना व्ययुः । सान्तपनं समतपंस्तस्मात् सान्तपनाः । इत्येतस्मिन्नपि च ब्राह्मणे etc.

१०. See N. 4. 16.

११. Quoted by SRV. I. 95. 10. p. i. 431.

१२. RV. X. 187. 2; AV. 6. 34. 3.

१३. Quoted by SRV. I. 61. 4. p. i. 297.

१४. RV. III. 62. 1.

१५. See. N. 3. 16.

१६. Quoted by SRV. I. 7. 2; 34. 11; pp. i. 55, 185.

१७. Fragment of RV. II. 31. 1; VIII. 35. 1.

१८. भूवौ M 3.

चिदिति निपातोऽनुदात्तः पुरस्तादेव व्याख्यातः। अथापि पशुनामेह भवत्युदात्तः।[1]

चिदसि मनासि[2]। चितास्त्वयि भोगाः। चेतयसे इति वा।

आ इत्याकार उपसर्गः पुरस्तादेव व्याख्यातः।[3] अथाप्यध्यर्थे दृश्यते।

अभ्र आँ अपः[4]। अभ्रा आ अपोऽभ्रे ध्यय इति। [अभ्रे आ अपोऽपोऽभ्रेऽधीति][5]

द्युम्नं द्योततेः। यशो वान्नं वा।

अस्मे द्युम्नमधि रत्नं च धेहि[6]। अस्मासु द्युम्नं च रत्नं च धेहि[7]॥ ५॥

पवित्रं पुनातेः। मन्त्रः पवित्रमुच्यते।

येन देवाः पवित्रेणात्मानं पुनते सदा[9]। इत्यपि निगमो भवति।

रश्मयः पवित्रमुच्यन्ते।

गभस्तिपूतः [नृभिरद्रिभिः सुतः।][10] इत्यपि निगमो भवति।

आपः पवित्रमुच्यन्ते।

शतपवित्राः स्वधया मदन्तीः[12]। बहूदकाः[13]।

अग्निः पवित्रमुच्यते। वायुः पवित्रमुच्यते। सोमः पवित्रमुच्यते। सूर्यः पवित्रमुच्यते[14]। इन्द्रः पवित्रमुच्यते।

अग्निः पवित्रं स मा पुनातु वायुः सोमः[15] सूर्य इन्द्रः[16]।

---

१. See N. 1. 4.

२. VS. 4. 19; 12. 53.

३. See N. 1. 4.

४. Fragment of RV. V. 48. 1.

५. This is the text of C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S, and Roth.

६. Quoted by SRV. I. 37. 4. p. i. 200.

७. RV. VII. 25. 3.

८. Quoted by SRV. VII. 25. 3. p. iii. 57.

९. SV. 2. 652.

१०. Fragment of VS. 7. 1. Read together with what follows in square brackets it is: RV. IX. 86. 34. Śivadatta gives 2 quotations, one from VS. 7. 1, the other form RV. IX. 86. 34. and reads: इत्यपि निगमौ भवतः।

११. Omitted by BK, C 4, C 5, Ku, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. RV. VII. 47. 3.

१३. बहुदकाः M 3, W 1.

१४. सूर्यः पवित्रमुच्यते is omitted here but is added in the beginning of the following section in C 1

१५. सोमा C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R. 5; Mi.

१६. The quotation is not traced.

पवित्रं ते मां पुनन्तु । इत्यपि निगमो भवति ।

तोदस्तुद्यतेः ॥ ६ ॥

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा ।

तोदस्येव शरण आ महस्य ॥

बहु दाश्वांस्त्वामेवाभिह्वयामि । अरिरमित्र ऋच्छतेः । ईश्वरोऽप्यरिरेतस्मादेव । यदन्यदेवत्या अग्नावाहुतयो ह्रयन्त इत्येतद् दृष्ट्वैवमवक्ष्यत । तोदस्येव शरण आ महस्य । तुदस्येव शरणेऽधिमहतः ।

स्वश्वाः सु अश्वनः ।

आ जुह्वानो घृतपृष्ठः स्वश्वाः । इत्यपि निगमो भवति ।

शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः । कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः ॥ ७ ॥

किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।

मा वर्पो अस्मदप गूह एतद् यदन्यरूपः समिथे बभूथ ॥

किं ते विष्णोऽप्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिः । अपि वा प्रशंसानामैवाभिप्रेतं स्यात् । किं ते विष्णो प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः । शिपयोऽत्र रश्मय उच्यन्ते । तैराविष्टो भवति । मा वर्पो अस्मदप गूह एतत् । वर्प इति रूपनाम । वृणोतीति सतः । यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिः ।

तस्योत्तरा भूयसे निर्वचनाय ॥ ८ ॥

---

१. Omitted by C 3.

२. RV. I. 150. 1; SV. 1. 97.

३. °मवक्षत BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. Quoted by SRV. I. 150. 1. p. i. 653.

५. RV. V. 37. 1.

६. RV. VII. 100. 6.

७. विष्णोः प्रख्यनाम° SRV. VII. 100. 6. p. iii. 208.

८. अस्मीति प्रतिपन्नरश्मिः S'ivadatta. It is evidently a mistake. The editor seems to have ignored the reading of Durga whose commentary he has edited with the text of the *Nirukta*.

९. वर्प इति…सतः is placed at the beginning of the 2nd pāda of the following stanza by C 3.

१०. The passage: शिपिविष्टो विष्णुरिति… संयतरश्मिः is quoted by SRV. VII. 100. 6. p. iii. 208.

प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके[१] ॥

तत्तेऽद्य शिपिविष्ट नामार्यः प्रशंसामि । अर्योऽहमस्मीश्वरः[२] स्तोमानाम् । अर्यस्त्वमसीति वा । तं त्वा[३] स्तौमि तवसमतव्यान् । तवस इति महतो नामधेयम । उदितो भवति । निवसन्तमस्य रजसः । पराके पराक्रान्ते ।

आघृणिरागतहृणिः ।

आ घृणे सं सचावहै[४] । आगत[५]हृणे संसेवावहै ।

पृथुज्रयाः पृथुजवः ।

पृथुज्रया अमिना[६]दायुर्दस्योः[७] । प्रामापयदायुर्दस्योः ॥ ९ ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं[८] गृहपतिमथर्युम्[९] ॥

दीधितयोऽङ्गुलयो भवन्ति । धीयन्ते कर्मसु । अरणी प्रत्यृत एने अग्निः । समरणाज्जायत इति वा । हस्तच्युती हस्तप्रच्युत्या । जनयन्त प्रशस्तं दूरे दर्शनं गृहपतिमतनवन्तम्[१०] ॥ १० ॥

एकया प्रतिधा पिबत्साकं सरांसि त्रिंशतम् ।
इन्द्रः सोमस्य काणुका[११] ॥

एकेन प्रतिधानेनापिबत् । साकं सहेत्यर्थः । इन्द्रः सोमस्य काणुका । कान्तकानीति वा । क्रान्तकानीति वा[१२] । कृतकानीति वा । इन्द्रः सोमस्य कान्त इति वा । कणेघात इति वा[१२] । कणेहतः । कान्तिहतः ।

तत्रैतद् याज्ञिका वेदयन्ते । त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि । तान्येतस्मिन् काल एकेन प्रतिधानेन पिबन्ति । तान्यत्र सरांस्युच्यन्ते । त्रिंशदपरपक्षस्याहोरात्राः । त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः । तद् या एताश्चान्द्रमसय आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति । तथापि निगमो भवति ।

---

१. RV. VII. 100. 5.
२. अर्योऽहमीश्वरः is omitted by C 3.
३. तन्वा S'ivadatta.
४. RV. VI. 55. 1.
५. Cf. BD. iii. 95 B, 96 B, घृणि is explained by हृति.
६. अमिनीदा०. M 3; W 1.
७. RV. III. 49. 2.
८. Cf. SRV. III. 49. 2. p. ii. 288.
९. RV. VII. 1. 1; SV. 1. 72; 2. 723.
१०. Cf. SRV. VII. 1. 1; VIII. 77. 4.
११. RV. VIII. 77. 4.
१२. Cf. Kumāria, Tantra Vārtika, Benares ed. p. 66 or I. 2. 49. अथवा कान्तकानीत्यादयो निरुक्तोक्ताः काणुकाशब्दविकल्पा योजनीयाः

यमक्षितिमक्षितयः पिबन्ति । इति ।

तं पूर्वपक्ष आप्याययन्ति । तथापि निगमो भवति ।

यथा देवा अंशुमाप्याययन्ति । इति ।

अध्रिगुर्मन्त्रो भवति । गव्यधिकृतत्वात् । अपि वा प्रशासनमेवाभिप्रेतं स्यात् । शब्दवत्त्वात् ।

अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगविति ।

अग्निरप्यध्रिगुरुच्यते ।

तुभ्यं श्चोतन्त्यध्रिगो शचीवः । अधृतगमनकर्मवन् ।

इन्द्रोऽप्यध्रिगुरुच्यते ।

अध्रिगव ओहमिन्द्राय । इत्यपि निगमो भवति ।

आङ्गूषः स्तोम आघोषः ।

एनाङ्गूषेण वयमिन्द्रवन्तः ।

अनेन स्तोमेन वयमिन्द्रवन्तः ॥ ११ ॥

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥

आपातितमन्युः । तृप्रप्रहारी । [क्षिप्रप्रहारी सृप्रप्रहारी[१६]] सोमो वेन्द्रो वा । धुनिर्धूनोतेः । शिमीति कर्मनाम । । शमयतेर्वा । शक्नोतेर्वा । ऋजीषी सोमः । यत्सोमस्य पूयमानस्यातिरिच्यते तदृजीषमपार्जितं भवति । तेनर्जीषी सोमः । अथाप्यैन्द्रो निगमो भवति ।

ऋजीषी वज्री । इति ।

---

१. According to Durga, some read अक्षितम्.

२. VS. 5. 7; cf AV. 7. 81. 6; TS. ii. 4. 14. 1.

३. ०पक्षाप्याययन्ति C 1, C 4, M 1, M 2. M 3.

४. आंशुम् C 4, M 3.

५. VS. 5. 7.

६. प्रशंसानामैवा० BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. सु C 5.

८. AB. ii. 7. 11.

९. RV. III. 21. 4.

१०. Quoted by SRV. I. 61. 1. p. i. 296.

११. RV. I. 61. 1; AV. 20. 35. 1.

१२. Quoted by SRV. I. 61. 2; 62. 1; pp. i. 297, 304.

१३. RV. I. 105. 19.

१४. Quoted by SRV. I. 105. 19. p. i. 468.

१५. RV. X. 89. 5.

१६. Omitted by BK, C 4, C 5, Kn, M 2, Mi, R 4, R 6, W 1, W 2, W 3. क्षिप्रप्रहारी is omitted by C 3. and सृप्रप्रहारी by Durga. It is however quoted by SRV. IX. 97. 8. p. iii. 778.

१७. RV. V. 40 4; AV. 20. 12. 7.

हर्योरस्य स भागो धानाश्चेति । धाना भ्राष्ट्रे हिता भवन्ति । फले हिता भवन्तीति वा ।

व॒ब्धां ते॒ हरी॑ धा॒ना उप॑ ऋजीषं॒ जिघ्र॑ताम् ।

इत्यपि निगमो भवति । आदिनाभ्यासेनोपहितेनोपधामादत्ते । बभस्तिरत्तिकर्मा । सोमः सर्वाण्यतसानि वनानि । नार्वागिन्द्रं प्रतिमानानि दभ्नुवन्ति । यैरेनं प्रतिमिमते नैनं तानि दभ्नुवन्ति । अर्वागेवैनमप्राप्य विनश्यन्तीति । इन्द्रप्रधानेत्येके । नैघण्टुकं सोमकर्म । उभयप्रधानेत्यपरम् ।

श्मशा शु अश्नुत इति वा । श्माश्नुत इति वा ।

अव॑ श्म॒शा रु॑ध॒द्वाः ।

अवारुधच्छ्मशा वारिति ॥ १२ ॥

उर्वश्यप्सरा । उर्वभ्यश्नुते । ऊरुभ्यामश्नुते । उरुर्वा वशोऽस्याः । अप्सरा अप्सारिणी । अपि वाप्स इति रूपनाम । अप्सातेः । अप्सानीयं भवति । आदर्शनीयम् । व्यापनीयं वा । स्पष्टं दर्शनायेति शाकपूणिः ।

यद॒प्स॑ः । इत्यभक्षस्य ।

अप्सो॒ नाम॑ ।

इति व्यापिनः । तद्रा भवति रूपवती । तदनयात्तमिति वा । तदस्यै दत्तमिति वा । तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द । तदभिवादिन्येषर्ग्भवति ॥ १३ ॥

---

१. The quotation is untraced.

२. बभस्तिरत्ति॰. C 4, M 3, W 2.

३. दभ्नुवन्ति C 3.

४. The passage आपातितमन्यु...दभ्नुवन्ति is quoted by SRV. X. 89. 5. p. IV. 284 where the lines हर्योरस्य... ...बभस्तिरत्तिकर्म do not occur.

५. अर्वाङ्गेवै॰ C 4, M 3, W 1.

६. RV. X. 105. 1; SV. 1. 228.

७. Cf. BD. VII. 153.

८. उरुभ्याम् S'ivadatta. उरु is evidently a mistake for ऊरु. ऊरु occuring in Durga's commentary is correctly printed in the same edition.

९. Quoted by SRV. IV. 2. 18. p. ii. 353.

१०. Cf. BD. ii. 59.

११. Quoted by SRV. VII. 4. 6. p. iii. 14.

१२. KS. IX. 4. MS. I. 10. 2. Cf. VS. 20. 17. According to Durga, the quotation is the following.

यद् ग्रामे॒ यदर॑ण्ये॒ यत्स॒भायां॒ यदि॑न्द्रिये । यदेन॑श्चकृ॒मा व॒यं यदप्स॑श्चकृ॒मा व॒यं यदेक॒स्यापि॒ धर्म॑णि॒ एन॒स्ततोऽव॒यज॑नमसि॒ स्वाहा॑ ॥

VS. 20. 17 is the following:

यद् ग्रामे॒ यदर॑ण्ये॒ यत्स॒भायां॒ यदि॑न्द्रिये । यच्छूद्रे यद॒र्ये॒ यदेन॑श्चकृ॒मा व॒यं यदेक॒स्याधि॒ धर्म॑णि॒ तस्या॒व॒यज॑नमसि ॥

१३. VS. 14. 4.

१४. Cf. BD. V. 149.

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददन्त ॥[1]

अप्यसि मैत्रावरुणो वसिष्ठः । उर्वश्या ब्रह्मन् मनसोऽधिजातः । द्रप्सं स्कन्नम् । ब्रह्मणा दैव्येन । द्रप्सः संभृतः[2] । प्सानीयो[3] भवति । सर्वे देवाः पुष्करे त्वाधारयन्त[4] । पुष्करमन्तरिक्षम् । पोषति[5] भूतानि । उदकं[6] पुष्करम् । पूजाकरम् । पूजयितव्यम्[7] । इदमपीतरत्पुष्करमेतस्मादेव । पुष्करं वपुष्करं वा । पुष्पं[8] पुष्पतेः ।

वयुनं वेतेः । कान्तिर्वा । प्रज्ञा वा ॥ १४ ॥

स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।[9]

स तमोऽप्रज्ञानं ततन्वत् । स तं सूर्येण[10] प्रज्ञानवच्चकार ।

वाजपस्त्यं[11] वाजपतनम् ।

सनेम वाजपस्त्यं[12] । इत्यपि निगमो भवति ।

वाजगन्ध्यं गध्यत्युत्तरपदम्[13] ।

अश्याम वाजगन्ध्यम्[14] । इत्यपि निगमो भवति ।

गध्यं[15] गृह्णातेः ।

ऋज्रा वाजं न गध्यं युयूषन्[16] । इत्यपि निगमो भवति[17] ।

गध्यतिर्मिश्रीभावकर्मा[18] ।

आ गधिता परि गधिता[19] । इत्यपि निगमो भवति ।

कौरयाणः कृतयानः ।

---

१. RV. VII. 33. 11.

२. संभृत C 1, C 2. C 3, C 4, C 6, M 1, M 2.

३. प्सानीयो भवति भक्षणीयो भरणीयश्च । Durga.

४. Cf. BD. V. 155.

५. पोषधि C 5, M 3, W 1, W 2.

६. उकम् S'ivadatta.

७. वा is added after पूजयितव्यम् by C 1, C 3, M 1.

८. =पद्मम् Durga.

९. RV. VI. 21. 3.

१०. सूतं S'ivadatta.

११. वाजपस्त्यं is omitted by C 5.

१२. RV. IX. 98. 12; SV. 2. 1030.

१३. गध्यमित्युत्तर॰ Mi.

१४. RV. IX. 98. 12; SV. 2. 1030.

१५. Quoted by SRV. I. 126. 6. p. i. 572.

१६. RV. IV. 16. 11.

१७. Cf. SRV. IV. 16. 11. p. ii. 391.

१८. Cf. SRV. I. 126. 6; IV. 38. 4; pp. i. 572; ii. 454.

१९. RV. I. 126. 6.

पार्कस्थामा कौरयाणः । इत्यपि निगमो भवति ।[1]

तौरयाणस्तूर्णयानः ।

स तौरयाण उप याहि यज्ञं मरुद्भिरिन्द्र सखिभिः सजोषाः ।[2]

इत्यपि निगमो भवति ।

अह्रयाणोऽह्रीतयानः ।

अनुष्टुया कृणुह्यह्रयाणः । इत्यपि निगमो भवति ।[3]

हरयाणो हरमाणयानः ।

रजतं हरयाणे । इत्यपि निगमो भवति ।[4]

य आरितः कर्मणिकर्मणि स्थिरः । प्रत्यृतः स्तोमान् ।[5]

व्रन्दी व्रन्दतेर्मृदूभावकर्मणः ॥ १६ ॥[6]

नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना ।[7]

निवृणक्षि यच्छ्वसनस्य मूर्धनि शब्दकारिणः । शुष्णस्यादित्यस्य [च[8]] शोषयितृ । रोरूयमाणो वनानीति वा । वधेनेति वा ।[9][10]

अव्रन्दत वीळिता । इत्यपि निगमो भवति ।[11]

वीळयतिश्च व्रीळयतिश्च संस्तम्भकर्माणौ[12] । पूर्वेण संप्रयुज्येते ।

निष्षपी[13] स्त्रीकामो भवति । विनिर्गतसपः । सपः[14] सपतेः[15] स्पृशतिकर्मणः ।[16]

मा नो मघेव निष्षपी परा दाः ।[17]

---

१. RV. VIII. 3. 21.

२. The quotation is untraced. See Roth, p. 65.

३. RV. IV. 4. 14.

४. RV. VIII. 25. 23.

५. RV. I. 101. 4.

६. Cf. SRV. VIII. 33. 5. p. iii. 392.

७. RV. I. 54. 5.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

९. Omitted by C 3.

१०. Cf. SRV. I. 54. 5. p. i. 275,...वस्तनीति वा धनानीति वा ।

११. Fragment of RV. II. 24. 3.

१२. Cf. SRV. II. 24. 3. p. ii. 70.

१३. निष्पपी C 6, M 3, Mi, W 1, W 2.

१४. स्पशः M 3, Mi; स्पसः C 4, W 1; स्पसं W 2. It is omitted altogether in C 5.

१५. स्पशतेः M 3, Mi, स्पसते ल; स्पंसतेः W 2.

१६. Cf. SRV. IX. 97. 37. p. iii. 786. सपतिः स्पृशतिकर्मेति नैरुक्ताः ।

१७. RV. I. 104. 5.

स यथा धनानि विनाशयेति मा नस्त्वं तथा परादाः।[1]

तूर्णाशमुदकं भवति। तूर्णमश्नुते।[2]

तूर्णाशं न गिरेरधि[3]। इत्यपि निगमो भवति।

क्षुम्पमहिच्छत्रकं भवति। यत् क्षुभ्यते ॥ १६ ॥

कुदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्।
कुदा नः शुश्रवुद्गिर इन्द्रो अङ्ग[4] ॥

कदा मर्तमनाराधयन्तं पादेन क्षुम्पमिवावस्फुरिष्यति।[5] कदा नः श्रोष्यति[6] च गिर इन्द्रो अङ्ग। अङ्गेति क्षिप्रनाम[7]। अङ्कितमेवाञ्चितं[8] भवति।[9]

निचुम्पुणः सोमः। निचान्तपृणः। निचमनेन प्रीणाति ॥ १७ ॥

पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये।
अपां जग्मिर्निचुम्पुणः[10][11] ॥

पत्नीवन्तः सुता इमेऽद्भिः सोमाः कामयमाना यन्ति वीतये पानायापाम्। गन्ता निचुम्पुणः।

समुद्रोऽपि निचुंपुण उच्यते। निचमनेन पूर्यते। अवभृथोऽपि[12] निचुंपुण उच्यते। नीचैरस्मिन् क्वणन्ति। नीचैर्दधतीति वा।

अवभृथ निचुम्पुणः[13]। इत्यपि निगमो भवति।

निचुंपुण निचुंकुणेति च।

पदिर्गन्तुर्भवति। यत्पद्यते ॥ १८ ॥

सुगुरसत्सुहिरुण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति।
यस्त्वा यन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति[14][15] ॥

---

१. विभजति SRV. I. 104. 5. p. i, 459.

२. अश्नुते: BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; Quoted by SRV. VIII. 32. 4. p. iii. 387.

३. RV. VIII. 32. 4.

४. RV. I. 84. 8.

५. अवस्फुरसि BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

६. शृणोति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

७. The passage: क्षुम्पमहिच्छत्रकं...क्षिप्रनाम is quoted by SRV. I. 84. 8. p. i. 376.

८. अंचितमेवांकितम् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

९. The passage: अङ्गेति...भवति is omitted by Durga.

१०. Cf. SRV. VIII. 93. 22. p. iii. 563.

११. RV. VIII. 93. 22.

१२. निभृथो M 1.

१३. VS. 3. 48; 8. 27; 20. 18.

१४. Cf. SRV. I. 125. 2. p. i. 568.

१५. RV. I. 125. 2.

सुगुर्भवति। सुहिरण्यः। स्वश्वः। महद्यास्मै वय इन्द्रो दधाति यस्त्वा यन्तमन्नेन। प्रातरागामिन्नतिथे। मुक्षीजयेव[1] पदिमुत्सिनाति कुमारः। मुक्षीजा मोचनाच्च। शयनाच्च[2]। ततनाच्च।

पादुः पद्यतेः।

आ॒विः स्वः॑ कृणु॒ते गूह॑ते बु॒सं स पा॒दुर॑स्य नि॒र्णिजो॒ न मु॑च्यते[3]।

आविष्कुरुते भासमादित्यः। गूहते बुसम्। बुसमित्युदकनाम। ब्रवीतेः शब्दकर्मणः। भ्रंशतेर्वा। यद्वर्षन्पातयत्युदकं रश्मिभिस्तत्प्रत्यादत्ते॥ १९॥

वृकश्चन्द्रमा भवति। विवृतज्योतिष्को वा। विकृतज्योतिष्को वा। विक्रान्तज्योतिष्को वा॥ २०॥

अ॒रु॒णो मा॑स॒कृद्वृकः[4] प॒था यन्तं॑ द॒दर्श॒ हि।
उज्जि॑हीते नि॒चाय्या॒ तष्टे॑व पृष्ट्याम॒यी वि॒त्तं मे॑ अ॒स्य रो॑दसी[5]॥

अरुण आरोचनः। मासकृन्मासानां चार्धमासानां च कर्ता [भवति][6] चन्द्रमाः। वृकः पथा यन्तं ददर्श नक्षत्रगणम्। अभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चन्द्रमाः। तक्ष्णुवन्निव पृष्ठरोगी। जानीतं मेऽस्य द्यावापृथिव्याविति[7]।

आदित्योऽपि वृक उच्यते[8]। यदा वृङ्क्ते।

अजो॑हवीदश्विना॒ वर्तिका॑ वामा॒स्नो यत्सी॒ममु॑ञ्चतं॒ वृक॑स्य[9]।

आह्वयदुषा[10] अश्विनावादित्येनाभिग्रस्ता। तामश्विनौ प्रमुमुचतुः[11]। इत्याख्यानम्[12]। श्वापि वृक उच्यते। विकर्तनात्।

वृक॑श्चिदस्य वार॒ण उ॑राम॒थिः[13]। उरणमथिः।

उरण ऊर्णावान्भवति। ऊर्णा पुनर्वृणोतेः। ऊर्णोतेर्वा।

वृद्धवाशिन्यपि वृक्युच्यते।

---

1. मक्षीजयेव C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.
2. सयनाच्च C 1, C 3, C 6, M 2, W 2.
3. RV. X. 27. 24.
4. मा सकृत् is attributed to a different recension by Durga who paraphrases as follows: सकृत् मां ददर्श।
5. RV. I. 105. 18; cf. BD. ii. 112.
6. Cf. BD. ii. 112.
7. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
8. Cf. I. SRV. I. 105. 18. p. i. 463.
9. RV. I. 117. 16.
10. अजह्वयत् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
11. प्रमुमुंचतुः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
12. Quoted by SRV. I. 117. 16. p. i. 528.
13. RV. VIII. 66. 8; AV. 20. 97. 2; SV. 2. 1042.

शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार[1] ।

इत्यपि निगमो भवति ।

जोष[वाकं][2] इत्यविज्ञातनामधेयम् । जोषयितव्यं भवति ॥ २१ ॥

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।

जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन[3] ॥

य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति तस्याश्नीथः । अथ योऽयं जोषवाकं वदति विजंजपः प्रार्जितहोषिणौ न देवौ तस्याश्नीथः[4] ।

कृत्तिः कृन्ततेः । यशो वा । अन्नं वा ।

महीव कृत्तिः शरणा त इन्द्र[5] ।

सुमहत्त इन्द्र शरणमन्तरिक्षे[6] कृत्तिरिवेति[7] । इयमपीतरा कृत्तिरेतस्मादेव । सूत्रमयी । उपमार्थे वा ।

कृत्तिवासाः पिनाकहस्तो अवततधन्वा[8] ।

[कृत्तिं वसान आचर पिनाकं बिभ्रदागहि[9] ।]

इत्यपि निगमो भवति ।

श्वघ्नी कितवो भवति । स्वं हन्ति[10] । स्वं पुनराश्रितं भवति ।

कृतं न श्वघ्नी वि चिनोति देवने[11] ।

कृतमिव श्वघ्नी विचिनोति देवने । कितवः किं तवास्तीति शब्दानुकृतिः । कृतवान्वा[12] । आशीर्नामकः ।

सममिति परिग्रहार्थीयम् । सर्वनामानुदात्तम् ॥ २२ ॥

मा नः समस्य दूढ्यः परिद्वेषसो अंहृतिः ।

ऊर्मिर्न नावमा वधीत्[13] ॥

---

१. RV. I. 116. 16.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. RV. VI. 59. 4.

४. Cf. SRV. VI. 59. 4. p. ii. 849.

५. RV. VIII. 90. 6; SV. 2. 762.

६. अन्तरिक्षम् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. Cf. SRV. VIII. 90. 6. p. iii. 549.

८. KS. 9. 7; Cf. अवततधन्वा पिनाकावसः etc. VS. 3. 61; S'B. ii. 6. 2. 17; अवततधन्वाकृत्तिवासाः पिनाकहस्तः TS. i. 8. 6. 2. Omitted by Durga and C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

९. VS. 16. 51. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; C 1, and Roth.

१०. Cf. SRV. VIII. 45. 38. p. iii. 435.

११. RV. X. 43. 5; AV. 20. 17. 5; Cf. RV. X. 42. 9; AV. 7. 50. 6; 20. 89. 9.

१२. कितवान्वा C 3, C 4, C 5, Mi, W 1, W 2.

१३. RV. VIII. 75. 9.

मा नः सर्वस्य दुर्धियः पापधित्रः सर्वतो द्वेपसो अंहतिः ।

ऊर्मिरिव नावमावधीत् । ऊर्मिरूर्णोतेः । नौः प्रणोत्तव्या भवति । नमतेर्वा । तत्कथमनुदात्तप्रकृतिनाम स्यात् । दृष्टव्ययं तु भवति ।

उतो संमस्मिन्ना शिशीहि नो वसो ।

इति सप्तम्याम् । शिशीतिर्दानकर्मा ।

उरुष्या णो अघायतः संमस्मात्[3] ।

इति पञ्चम्याम् । उरुष्यतिरकर्मकः । अथापि प्रथमा बहुवचने ।

नभन्तामन्यके संमे[4] ॥ २३ ॥

हविषां जारो अपां पिपर्ति पपुरिर्नरा ।

पिता कुटस्य चर्षणिः[6] ॥

हविषापां जरयिता[7] । पिपर्ति पपुरिरिति पृणातिनिगमौ[8] वा । प्रीणातिनिगमौ वा । पिता कृतस्य कर्मणश्चायितादित्यः[9] ।

शम्ब इति वज्रनाम । शमयतेर्वा । शातयतेर्वा[10] ।

उग्रो यः शम्बः पुरुहूत तेन[11] । इत्यपि निगमो भवति ।

केपयः कपूया भवन्ति । कपूयमिति । पुनाति कर्मकुत्सितम् । दुष्पूयं भवति ॥ २४ ॥

पृथक्प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।

न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः[12] ॥

पृथक्प्रायन् । पृथक् प्रथतेः । प्रथमा देवहूतयः । ये देवानाह्वयन्त । अकुर्वत श्रवणीयानि यशांसि । दुरनुकराण्यन्यैः । येऽशक्नुवन् यज्ञियां नावमारोढुम् ।

अथ ये नाशक्नुवन् यज्ञियां नावमारोढुम् । ईर्मैव ते न्यविशन्त । इहैव ते न्यविशन्त । ऋणे हैव[13] ते न्यविशन्त ।

---

१. Cf. SRV. VIII. 75. 9. p. iii. 519.

२. RV. VIII. 21. 8.

३. RV. V. 24. 3; VS. 3. 26.

४. उरुष्यती रक्षाकर्मा C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S and Roth. Cf. SRV. I. 58. 8; 19. 15; 119. 6.

५. RV. VIII. 39. 1—10. The passage उरुष्यति...समे is omitted by Durga; नभन्तामन्यके समे is omitted by C 1.

६. RV. I. 46. 4.

७. जारयिता C 3.

८. ०निगमो C 5.

९. Cf. SRV. I. 46. 4. p. i. 232.

१०. Cf. SRV. X. 42. 7. p. IV. 127.

११. RV. X. 42. 7; AV. 20. 89. 7.

१२. RV. X. 44. 6; AV. 20. 94. 6.

१३. नैव BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

अस्मिन्नेव लोक इति वा[5]। ईर्म इति बाहुनाम। समीरिततरो भवति ।

एता विश्वा सवना तूतुमाकृषे स्वयं सूनो सहसो यानि दधिषे[2] ।

एतानि सर्वाणि स्थानानि तूर्णमुपाकुरुषे । स्वयं बलस्य पुत्र यानि धत्स्व ।

अंसत्रमंहसस्त्राणम् । धनुर्वा । कवचं वा । कवचं कु अंचितं भवति । कांचितं भवति । कायेऽञ्चितं भवतीति वा ॥ २५ ॥

प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम् ।
द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम्[3] ॥

प्रीणीताश्वान्त्सुहितं जयथ। जयनं वो हितमस्तु। स्वस्तिवाहनं[4] रथं कुरुध्वम् । द्रोणाहावम् । द्रोणं द्रुममयं भवति । आहाव आह्वानात् । आवह आवहनात् । अवतोऽवातितो महान्भवति । अश्मचक्रमशनचक्रमसनचक्रमिति वा । अंसत्रकोशम् । अंसत्राणि वः कोशस्थानीयानि सन्तु । कोशः कुष्णातेः। विकुषितो भवति। अयमपीतरः कोश एतस्मादेव । सञ्चय आचितमात्रो महान्भवति । सिंचत नृपाणं नरपाणम् । कूपकर्मणा संग्राममुपमिमीते ।

काकुदं ताल्वित्याचक्षते। जिह्वा कोकुवा। साऽस्मिन्धीयते। जिह्वा कोकुवा। कोकूयमाना वर्णान्[6]नुदतीति वा[7]। [कोकूयतेर्वा स्याच्छब्दकर्मणः।][8] जिह्वा जोहुवा। तालु तरतेः[9]। तीर्णतममङ्गम्[10] । लततेर्वा स्याद् [लंबकर्मणः[11]] विपरीतात् । यथा तलम् । लतेत्यविपर्ययः ॥ २६ ॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव[12] ॥

सुदेवस्त्वं कल्याणदानः। यस्य तव देव सप्त सिन्धवः प्राणायानुक्षरन्ति काकुदम्[13]। सूर्म्यं सुषिरामिवेति। अपि निगमो भवति[14] ॥ २७ ॥

---

१. Cf. SRV. X. 45. 6. p. IV. 132.

२. RV. X. 50. 6.

३. RV. X. 101. 7.

४. स्वस्तिवान् C 3.

५. वा BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. एनान्नुदतीति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. Cf. PMbh. i. 1. 1. p. i. 4.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

९. तलतेः C 1, C 3.

१०. अङ्गैः C 3.

११. Omitted by C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

१२. RV. VIII. 69. 12; AV. 20. 92. 9.

१३. Cf. PMbh. i. 1. 1. p. i. 4.

१४. This is the text of BK, C 4, C 5, Kn, M 3, R 4, R 6, W 1, W 2, W 3.

[सुदेवस्त्वं कल्याणदेवः । कमनीयदेवो वा भवसि वरुण । यस्य ते सप्त सिंधवः । सिंधुः स्रवणात् । यस्य ते सप्त स्रोतांसि । तानि ते काकुदमनुक्षरन्ति । सूर्मिः कल्याणोर्मिः । स्रोतः सुषिरमनु यथा । वीरिटं तैटीकिरन्तरिक्षमेवमाह पूर्वं वयतेः । उत्तरमिरतेः । वयांसीरन्त्यस्मिन् । भांसि वा । तदेनस्यामृच्युदाहरन्ति । अपि निगमो भवति ॥ २७ ॥][1]

प्र वा॑वृजे सुप्र॒या ब॒र्हिरे॑षा॒मा वि॒श्पती॑व॒ वीरि॑ट इयाते ।
वि॒शाम॒क्तोरु॒षसः॑ पू॒र्वहू॑तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न् ॥[2]

प्रवृज्यते सुप्रायणं बर्हिरेषाम् । एयाते सर्वस्य पातारौ वा पालयितारौ वा । वीरिटमन्तरिक्षम् । भियो वा भासो वा ततिः । अपि वोपमार्थे स्यात् । सर्वपती इव राजानौ । वीरिटे गणे मनुष्याणाम् । रात्र्या विवासे पूर्वस्यामभिहूतौ । वायुश्च नियुत्वान् । पूषा च स्वस्त्ययनाय । नियुत्वान्नियुतोऽस्याश्वाः । नियुतो नियमनाद्वा । नियोजनाद्वा ।

अच्छाभेराप्तुमिति शाकपूणिः ।

परीं सीमिति व्याख्यातम्[3] ।

एनमेनामस्या अस्येत्येतेन व्याख्यातम्[4] ।

सृणिरङ्कुशो भवति सरणात् । अङ्कुशोऽञ्चतेः । आकुञ्चितो[5] भवतीति वा ।

नेदी॑य इत्सृ॒ण्यः॑ प॒क्वमेया॑त्[6] । इत्यपि निगमो भवति ।

अन्तिकतममंकुशादायात् । पक्वमौषधमागच्छत्विति । आगच्छत्विति ॥ २८ ॥

इति पञ्चमोऽध्यायः ।

[सस्निमसश्चन्[2]तीन यस्[3]यै [4]वराहो गायन्ति [5]त्वा [6]पवित्रं पुरु [7]त्वाँ [8]किमित्ते [9]प्रतेत्तेऽ-[10]ग्निश्चैर [11]एकया पान्तमन्[12]युरुर्वश्यप्[13]सरा [14]उतासि [15]स इ[16]न्नियत्कदा[17]मर्त [18]पत्नीवन्तः [19]सुगुर-[20]सँहृकश्चन्द्रमा [21]अरुणो मा [22]यँ इन्द्राग्नी [23]मा नः समस्य हवि[24]षा जारः पृ[25]थक्प्रायन्प्रीणी[26]ता-[27]श्वान्सुदेवः [28]प्रवावृजेऽष्टाविंशतिः ॥][7]

॥ इति निरुक्ते पूर्वषट्के पञ्चमोऽध्यायः समाप्तः ॥

---

१. This is the text of C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S. The entire passage is added after the shorter version in Mi.

२. RV. VII. 39. 2; VS. 33. 44.

३. व्याख्याताः C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S. See N. 1. 7.

४. See N. 4. 25.

५. आकुसितो C 1, C 6, M 3.

६. RV. X. 101. 3; VS. 12. 68; S'B. VII. 2. 2. 5.

७. Small figure within brackets represents the corresponding section of the fifth chapter of the *Nirukta*.

अथ षष्ठोऽध्यायः ।

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः[1] ॥

त्वमग्ने द्युभिरहोभिः[2] । त्वमाशुशुक्षणिः । आशु इति च शु इति च क्षिप्रनामनी भवतः[3] । क्षणिरुत्तरः[4] । क्षणोतेः । आशु शुचा क्षणोतीति वा । सनोतीति वा । शुक् शोचतेः । पञ्चम्यर्थे वा प्रथमा । तथा हि वाक्यसंयोगः । आ इत्याकार उपसर्गः पुरस्तात् । चिकीर्षितज उत्तरः । आशुशोचयिषुरिति । शुचिः शोचतेः । ज्वलतिकर्मणः । अयमपीतरः शुचिरेतस्मादेव । निःषिक्तमस्मात्पापकमिति नैरुक्ताः ।

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्[5] ।

आशा दिशो भवन्ति । आसदनात् । आशा उपदिशो भवन्ति । अभ्यशनात् । काशिर्मुष्टिः[6] प्रकाशनात् । मुष्टिर्मोचनाद्वा । मोषणाद्वा । मोहनाद्वा ।

इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते[7] ।

इमे चिदिन्द्र रोदसी रोधसी द्यावापृथिव्यौ । विरोधनात् । रोधः कूलं निरुणद्धि स्रोतः[8] । कूलं रुजतेः । विपरीतात् । लोष्टोऽविपर्ययेण । अपारे दूरपारे । यत्संगृभ्णासि मघवन् । काशिस्ते महान्[9] ।

अहस्तमिन्द्र सं पिणक्कुणारुम्[10] ।

अहस्तमिन्द्र कृत्वा संपिपिण्ढि[11] परिक्वणनं मेघम्[12] ॥ १ ॥

अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो[13] व्यार ।
सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं[14] धमन्तीः[15] ॥

---

१. RV. II. 1. 1; VS. 11. 27.
२. Cf. SRV. II. 1. 1. p. ii. 1.
३. Cf. SRV. IV. 58. 7. p. ii. 493.
४. उत्तरम् M 3.
५. RV. II. 41. 12; AV. 20. 20. 7; 57. 10.
६. SRV. III. 30. 5. p. ii. 219.
७. RV. III. 30. 5.
८. SRV. I. 38. 11. p. i. 206.
९. Cf. S'abara on Mīmānsā sūtra IX. 1. 9.
१०. RV. III. 30. 8; VS. 18. 69.
११. संपिड्ढि BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W, 3; संपिढि C 3.
१२. SRV. III. 30. 8. p. ii. 220.
१३. हतो० C 1, C 3, M 2.
१४. पुरुहूत C 3, C 5, M 1, M 2.
१५. RV. III. 30. 10.

अलातृणोऽलमातर्दनो मेघः । वलो वृणोतेः । व्रजो व्रजत्यन्तरिक्षे । गोरेतस्या[1] माध्यमिकाया वाचः । पुरा हननाद्धूयमानो व्यार । सुगान्पथो अकृणोन्निरजे गाः । सुगमनान्पथो अकरोत्[2] । निरजनार्थं[3] गवाम् । प्रावन्वाणीः पुरुहूतं धमन्तीः[4] । आपो वा वहनात् । वाचो वा वदनात् । बहुभिराहूतमुदकं भवति । धमतिर्गतिकर्मा ॥ २ ॥

उद्वृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।

आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं[5] हेतिमस्य[6] ॥

उद्धर रक्षः सहमूलमिन्द्र । मूलं मोचनाद्वा । मोषणाद्वा । मोहनाद्वा[7] । वृश्च मध्यम् । प्रति शृणीह्यग्रम् । अग्रमागतं भवति । आ कियतो[8] देशात् । सललूकं संलुब्धं भवति । पापकमिति नैरुक्ताः । सररुकं[9] वा स्यात् । सर्तेरभ्यस्तात्[10] । तपुषिस्तपतेः । हेतिर्हन्तेः[11] ।

त्यं चिदित्था कत्पयं शयानम्[12] ।

सुखपयसम् । सुखमस्य पयः ।

विस्रुह आपो भवन्ति । विस्रवणात् ।

वया इव रुरुहुः सप्त विस्रुहः[13] । इत्यपि निगमो भवति ।

वीरुध ओषधयो भवन्ति । विरोहणात् ।

वीरुधः पारयिष्णवः[14] । इत्यपि निगमो भवति ।

नक्षद्दाभम् । अश्नुवानदाभम् । अश्यशनेन दभ्नोतीति वा ।

नक्षद्दाभं ततुरिं पर्वतेष्ठाम्[15] । इत्यपि निगमो भवति ।

अस्कृधोयुरकृध्वायुः । कृध्विति ह्रस्वनाम । निकृत्तं भवति[16] ।

यो अस्कृधोयुरजरः स्ववान्[17] । इत्यपि निगमो भवति ।

---

१. घोरेतस्या M 3.

२. ऽकरोत् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth and S'iva.

३. निर्गमनाय C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth and S'iva; Cf. SRV. III. 30. 10.

४. SRV. III. 30. 10; Cf. I. 33. 9; 51. 5. pp. i. 177. 255.

५. तपूर्षि C 1, C 3, C 5, M 1, M 2, M 3, Mi, W 2.

६. RV. III. 30. 17.

७. मूलं...मोहनाद्वा is omitted by Durga.

८. कीयतो C 5, M 3, Mi, W 1, W 2.

९. सरल्लूकं C 5; सररूकं C 6.

१०. अभ्यस्तात् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. SRV. III. 30. 17. p. ii. 224.

१२. RV. V. 32. 6.

१३. RV. VI. 7. 6.

१४. RV. X. 97. 3; VS. 12. 77.

१५. RV. VI. 22. 2; AV. 20. 36. 2.

१६. SRV. VI. 67. 11. p. ii. 874.

१७. RV. VI. 22. 3; AV. 20. 36. 3.

[निशृंभा निश्रथ्यहारिणः][2] ॥ ३ ॥

आजासः पूषणं रथे निशृंभास्ते जनश्रियम्।
देवं वहन्तु बिभ्रतः[3] ॥

आवहन्त्वजाः पूषणं रथे। निश्रथ्यहारिणस्ते। जनश्रियं जातश्रियम्।

वृबदुक्थो महदुक्थः। वक्तव्यमस्मा उक्थमिति। वृबदुक्थो वा।[4]

वृबदुक्थं हवामहे[5]। इत्यपि निगमो भवति।

ऋदूदरः सोमः। मृदूदरः[6]। मृदूदरेष्विति[7] वा।

ऋदूदरेण सख्या सचेय[8]। इत्यपि निगमो भवति।

ऋदूपे इत्युपरिष्टाद् व्याख्यास्यामः[9]।

पुलुकामः पुरुकामः।

पुलुकामो हि मर्त्यः[10]। इत्यपि निगमो भवति।

असिन्वती असंखादन्त्यौ।

असिन्वती बप्सती भूर्यत्तः[11]। इत्यपि निगमो भवति।

कपनाः कंपनाः क्रिमयो भवन्ति।

मोषथा वृक्षं कपनेव वेधसः[12]। इत्यपि निगमो भवति।

भार्ऋजीकः प्रसिद्धभाः[13]।

धूमकेतुः समिधा भार्ऋजीकः[14]। इत्यपि निगमो भवति।

रुजाना नद्यो भवन्ति। रुजन्ति कूलानि[15]।

सं रुजानाः पिपिष इन्द्रशत्रुः[16]। इत्यपि निगमो भवति।

---

१. निश्रथ्यहारिणः C 6.
२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
३. RV. VI. 55. 6.
४. SRV. VIII. 32. 10. p. iii. 388.
५. RV. VIII. 32. 10; SV. 1. 217.
६. Cf. SRV. II. 33. 5. p. ii. 98.
७. मृदुरुदरेष्विति C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth, S'iva°.
८. RV. VIII. 48. 10.
९. See N. 6. 33.
१०. RV. I. 179. Cf. Kālidāsa: मनोरथानामगतिर्न विद्यते। Kumāra-Sambhava. IV.
११. RV. X. 79. 1.
१२. RV. V. 54. 6.
१३. SRV. I. 44. 3. p. i. 224.
१४. RV. X. 12. 2; AV. 18. 1. 30.
१५. कुलानि C 1. Quoted by SRV. I. 32. 6. p. i. 168.
१६. RV. I. 32. 6.

जूर्णिर्जवतेर्वा। द्रवतेर्वा। दूनोतेर्वा[1]।

क्षिप्रा जूर्णिर्न वक्षति[2]। इत्यपि निगमो भवति।

परि घ्रंसमोमना वां वयो गात्[3]।

पर्यगाद्वां घ्रंसमहरवनायान्नम्[6] ॥ ४ ॥

उपलप्रक्षिणी। उपलेषु प्रक्षिणाति। उपलप्रक्षेपिणी वा।

[इन्द्र ऋषीन् पप्रच्छ। दुर्भिक्षे केन जीवतीति। तेषामेकः प्रत्युवाच।

शकटं शाकिनी गावो जालमस्यन्दनं वनम्।

उदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तयः॥

इति सा निगदव्याख्याता][9] ॥ ५ ॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना।

नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव[10] ॥

कारुरहमस्मि। कर्ता स्तोमानाम्। ततो भिषक्। तत इति सन्ताननाम। पितुर्वा। पुत्रस्य वा। उपलप्रक्षिणी सक्तुकारिका। नना[11] नमतेः। माता वा। दुहिता वा। नानाधियो नानाकर्माणः। वसूयवो वसुकामाः। अन्वास्थिताः स्मो गाव इव लोकम्[12]। इन्द्रायेन्दो परिस्रव। इत्यध्येषणा।

आसीन ऊर्ध्वामुपसि क्षिणाति[13]। उपस्थे।

प्रकलविद्वणिग्भवति। कलाश्च वेद प्रकलाश्च।

दुर्मित्रासः प्रकलविन्मिमानाः[14]। इत्यपि निगमो भवति।

अभ्यर्धयज्वा। अभ्यर्धयन्यजति[15]।

---

१. जूनोतेः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; वारयतेः C 3.

२. Quoted by SRV. I. 129. 8. p. i. 587.

३. RV. I. 129. 8.

४. RV. VII. 69. 4.

५. वा M 3, Mi, W 1, W 2.

६. अवनोन्नम् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; Durga gives अवनेनान्नम् and अनेनान्नम् as variants.

७. Sāyaṇa adds इति after ०प्रक्षिणी. See SRV. IX. 113. 3. p. iii. 829.

८. The quotation is not traced. Cf. BD. VI. 137—138.

९. The passage within square brackets is omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१०. RV. IX. 112. 3.

११. मना C 3.

१२. The passage उपलप्रक्षिणी...लोकं is cited SRV. IX. 113. 3. p. iii. 829. The story of Indra and the seers does not occur in this quotation of Sāyaṇa.

१३. RV. X. 27. 13.

१४. RV. VII. 18. 15.

१५. Quoted by SRV. VI. 50. 5. p. ii. 829.

सिषक्ति पूषा अभ्यर्धयज्वा[1] । इत्यपि निगमो भवति ।

ईक्ष ईशिषे ।

ईक्षे हि वस्व उभयस्य राजन्[2] । इत्यपि निगमो भवति ।

[क्षोणस्य[3] क्षयणस्य ।

महः क्षोणस्याश्विना कण्वाय[4] । इत्यपि निगमो भवति][6] ॥ ६ ॥

अस्मे ते बन्धुः[7] । वयमित्यर्थः ।

अस्मे यातं नासत्या सजोषाः[8] । अस्मानित्यर्थः ।

अस्मे समानेभिर्वृषभ पौंस्येभिः[9] । अस्माभिरित्यर्थः ।

अस्मे प्र यन्धि मघवन्नृजीषिन्[10] । अस्मभ्यमित्यर्थः ।

अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु[11] । अस्मदित्यर्थः ।

ऊर्व इव पप्रथे कामो अस्मे[12] । अस्माकमित्यर्थः ।

अस्मे धत्त वसवो वसूनि[13] । अस्मास्वित्यर्थः ।

पाथोऽन्तरिक्षम् । पथा व्याख्यातम्[14] ।

श्येनो न दीयन्नन्वेति पाथः[15] । इत्यपि निगमो भवति ।

उदकमपि पाथ उच्यते पानात् ।

आ चष्ट आसां पाथो नदीनाम्[16] । इत्यपि निगमो भवति ।

अन्नमपि पाथ उच्यते पानादेव ।

देवानां पाथ उप वक्षि विद्वान्[17] । इत्यपि निगमो भवति ।

---

१. RV. VI. 50. 5.

२. RV. VI. 19. 10.

३. क्षीणस्य is given as a variant by Durga.

४. Quoted by SRV. I. 117. 8. p. i. 525.

५. RV. I. 117. 8.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. VS. 4. 22.

८. RV. I. 118. 11.

९. RV. I. 165. 7.

१०. RV. III. 36. 10.

११. RV. VI. 47. 13.

१२. RV. III. 30. 19. The reference of RV. III. 30. 19. is wrongly given in VC. as IV. 30. 19.

१३. VS. 8. 18.

१४. SRV. I. 113. 8; 154. 5. pp. i, 499, 663.

१५. RV. VII. 63. 5; its reference in VC. is wrongly given as IX, 63. 5.

१६. RV. VII. 34. 10.

१७. RV. X. 70. 10.

सवीमनि प्रसवे ।

देवस्य वयं सवितुः सवीमनि[1] । इत्यपि निगमो भवति ।

सप्रथाः सर्वतः पृथुः[2] ।

त्वमग्ने सप्रथा असि[3] । इत्यपि निगमो भवति ।

विदथानि वेदनानि ।

विदथानि प्र चोदयन्[4] । इत्यपि निगमो भवति ॥ ७ ॥

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।

वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम[6] ॥

समाश्रिताः सूर्यमुपतिष्ठन्ते । अपि वोपमार्थे स्यात् । सूर्यमिवेन्द्रमुपतिष्ठन्त इति । सर्वाणीन्द्रस्य धनानि विभक्षमाणाः । स यथा धनानि विभजति जाते च जनिष्यमाणे च । तं वयं भागमनुध्यायाम् । ओजसा बलेन । ओज ओजतेर्वा । उब्जतेर्वा ।

आशीराश्रयणाद्वा । आश्रपणाद्वा । अथेयमितराशीराशास्तेः ।

इन्द्राय गाव आशिरम्[8] । इत्यपि निगमो भवति ।

सा मे सत्याशीर्देवेषु[9] । इति च ।

यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः[10] ।

यदा ते मर्तो भोगमन्वापदथ ग्रसितृतम ओषधीरगारीः । जिगर्तिर्गिरतिकर्मा वा । [गृणातिकर्मा वा ।] गृह्णातिकर्मा वा ।

१. Quoted by SRV. VI. 72. 2. p. ii. 882.

२. RV. VI. 71. 2.

३. Quoted by SRV. V. 13. 4; VI. 68. 9. pp. ii. 529, 876.

४. RV. V. 13. 4; SV. 2. 757.

५. RV. III. 27. 7; SV. 2. 827.

६. RV. VIII. 99. 3; AV. 20. 58. 1; SV. 1. 267; 2. 660; VS. 33. 41.

७. Quoted by SRV. VIII. 99. 3. p. iii. 585.

८. RV. VIII. 69. 6; AV. 20. 22. 6; 92. 3; SV. 2. 841.

९. TS. iii. 2. 7. 2.

१०. RV. I. 163. 7; X. 7. 2; VS. 29. 18.

११. भागम् C 3.

१२. जीगार्त्ति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१३. Quoted by SRV. VI. 65. 1. p. ii. 867.

१४. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga. It is added however on the marginal space, probably by a later scribe in C 4.

१५. गृह्णातिकर्मा वा is repeated in Mi. Cf. SRV. X. 29. 1. p. IV. 35.

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से[१] ।

मूढा वयं स्मः । अमूढस्त्वमसि[२] । न वयं विद्मो महित्वमग्ने[३] । त्वं तु वेत्थ ।

शशमानः शंसमानः[४] ।

यो वां यज्ञैः शशमानो ह दाशति[५] । इत्यपि निगमो भवति ।

देवो देवाच्यां कृपा[६] ।

देवो देवान्प्रत्यक्तया कृपा[७] । [कृप् कृपतेर्वा । कल्पतेर्वा ।][८] ॥ ८ ॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्[९] ।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥

अश्रौषं हि बहुदातृतरौ[१०] वाम् । विजामातुः । असुसमाप्ताज्जामातुः[११] । विजामातेति शश्वद्दाक्षिणाजाः[१२] क्रीतापतिमाचक्षते । असुसमाप्त इव वरोऽभिप्रेतः । जामाता । जा अपत्यम् । तन्निर्माता । उत वा घा स्यालात् । अपि च स्यालात् । स्याल आसन्नः संयोगेनेति नैदानाः । स्याल्लाजानावपतीति वा । लाजा[१३] लाजतेः[१४] । स्यं शूर्पं स्यतेः । शूर्पमशनपवनम् । शृणातेर्वा[१५] । अथ सोमस्य प्रदानेन युवाभ्यामिन्द्राग्नी स्तोमं जनयामि [नव्यं][१६] नवतरम्[१७] ।

ओमास इत्युपरिष्टाद्[१८] व्याख्यास्यामः ॥ ९ ॥

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ।
कक्षीवन्तं य औशिजः[१९] ॥

---

१. RV. X. 4. 4.

२. Cf. SRV. I. 68. 8. p. i. 329.

३. महत्त्वम् C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth and S'iva.

४. Cf. SRV. I. 141. 10. p. i. 633.

५. RV. I. 151. 7.

६. RV. I. 127. 1; AV. 20. 67. 3; SV. 1. 465; 2. 1163; VS. 15. 47.

७. कृपा कृमुतेर्वा कल्पतेर्वा is added by C 5, M 3. Durga reads: कृपा कल्पितया । Cf. SRV. I. 127. 1. p. i. 573.

८. Omitted by C 5, M 3, and Durga. C 1 strikes it out.

९. RV. I. 109. 2.

१०. बहुदायितरौ BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. असमाप्तात् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. दाक्षिणात्याः is the proposed emendation by S'ivadatta.

१३. राजा राजतेः C 5, M 3.

१४. लाजा लाजतेः is omitted by Durga.

१५. शृणातेः शम्नातेर्वा SRV. I. 109. 2.

१६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१७. Cf. SRV. loc. cit.

१८. See N. 12. 40.

१९. RV. I. 18. 1; VS. 3. 28; Cf. सोमानां SV. 1. 139; 2. 813.

सोमानां सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः। कक्षीवान् कक्ष्यावान्[2]। औशिज उशिजः पुत्रः। उशिग्वष्टेः कान्तिकर्मणः। अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्। तं सोमानां[1] सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते[3] ॥ १० ॥

इन्द्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने[4] ॥

इन्द्रासोमावघस्य शंसितारम्। अघं हन्तेः। निर्ह्रसितोपसर्गः। आहन्तीति। तपुस्तपतेः। चरुर्मृच्चयो भवति। चरतेर्वा। समुच्चरन्त्यस्मादापः। ब्रह्मद्विषे [ब्राह्मणद्वेष्ट्रे। क्रव्यादे][5] क्रव्यमदते। [घोरचक्षसे][5] घोरख्यानाय। क्रव्यं विकृत्ताज्जायत[6] इति नैरुक्ताः। द्वेषो धत्तम्। अनवायमनवयवम्। यदन्ये न व्यवेयुः[7]। अद्वेषस इति वा। किमीदिने। किमिदानीमिति चरते। किमिदं किमिदमिति वा। पिशुनाय चरते। पिशुनः पिंशतेः। विपिंशतीति ॥ ११ ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः[9] ॥

कुरुष्व पाजः। पाजः पालनात्[10]। प्रसितिमिव पृथ्वीम्। प्रसितिः प्रसयनात्[11]। तंतुर्वा। जालं वा[12]। याहि राजेव। अमात्यवान्। अभ्यमनवान्। स्ववान्वा। इरा[13]भृता गणेन गतभयेन। हस्तिनेति वा। तृष्व्यानु प्रसित्या द्रूणानः। तृष्वीति क्षिप्रनाम। तरतेर्वा। त्वरतेर्वा। असितासि। विध्य रक्षसः। तपिष्ठैः। तप्ततमैः[14]। तृप्ततमैः[15]। प्रपिष्ठतमैरिति वा।

यस्ते गर्भममीवा दुर्णामा योनिमाशये[16] ।

अमीवाभ्यमनेन व्याख्यातः। दुर्णामा[17] क्रिमिर्भवति पापनामा। क्रिमिः क्रव्ये मेद्यति। क्रमतेर्वा स्यात्सरणकर्मणः। क्रामतेर्वा।

अति क्रामन्तो दुरितानि विश्वा[18] ।

---

१. सोमानं Roth.
२. Cf. SRV. I. 51. 13. p. i. 260.
३. Cf. SRV. I. 18. 1. p. i. 103. Also Cf. PMbh. Vol. III. p. 33.
४. RV. VII. 104. 2; AV. 8. 4. 2.
५. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
६. विकृत्ताज्जायत C 4, C 5, M 3.
७. व्येयुः C 3, C 5, M 3.
८. Quoted by SRV. X. 87. 24. p. IV. 277.
९. RV. IV. 4. 1; VS. 13. 9.
१०. पानात् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
११. प्रसहनात् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
१२. SRV. X. 87. 15. p. IV. 275.
१३. इरावता SRV. IV. 4. 1.
१४. तप्ततमैस्तपिष्ठतमैरिति वा SRV. loc. cit.
१५. SRV. loc. cit.
१६. RV. X. 162. 2; AV. 20. 96. 12.
१७. दुर्नामा C 4, C 5, M 3, Mi.
१८. Cf. AV. 12. 2. 28.

अतिक्रममाणा दुर्गतिगमनानि सर्वाणि।

अप्वा यदेनया विद्धोऽपवीयते। व्याधिर्वा। भयं वा।

अप्वे॒ परे॑हि[1]। इत्यपि निगमो भवति।

अमतिरमामयी। मतिरात्ममयी।

ऊ॒र्ध्वा यस्या॒मति॒र्भा अदि॑द्युत॒त्[2] [सवी॑मनि][3]।

इत्यपि निगमो भवति।

श्रुष्टीति क्षिप्रनाम। आशु अष्टीति[4] ॥ १२ ॥

ताँ अ॑ध्व॒र उ॑श॒तो य॑क्ष्यग्ने श्रु॒ष्टी भग॒ं नास॑त्या॒ पुर॑न्धिम्[5]।

तानध्वरे यज्ञे। उशतः कामयमानान्। यजाग्ने। श्रुष्टी भगम्। नासत्यौ चाश्विनौ। सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य प्रणेताराविल्याग्रायणः। नासिकाप्रभवौ बभूवतुरिति वा[6]।

पुरन्धिर्बहुधीः[7]। तत्कः पुरन्धिः। भगः पुरस्तात्तस्यान्वादेश इत्येकम्। इन्द्र इत्यपरम्। स बहुकर्मतमः। पुरां च दारयितृतमः। वरुण इत्यपरम्। तं प्रज्ञया स्तौति।

इ॒माम् नु क॒विर्त॑मस्य मा॒याम्[8]। इत्यपि निगमो भवति।

रुशदिति वर्णनाम। रोचतेर्ज्वलतिकर्मणः।

समि॑द्धस्य॒ रुश॑दद॒र्शि पाज॑ः[9]। इत्यपि निगमो भवति ॥ १३ ॥

अस्ति॒ हि वः॑ सजा॒त्यं॑ रिशादसो॒ देवा॑सो॒ अस्त्याप्य॑म्[10]।

अस्ति हि वः। समानजातिता रेशयदारिणो[11] देवाः। अस्त्याप्यम्। आप्यमाप्नोतेः।

सुदत्रः कल्याणदानः[12]।

---

१. Fragment of RV. X. 103. 12; AV. 3. 2. 5; VS. 7. 44; N. 9. 33; Cf. SV. 2. 1211.

२. AV. 7. 14. 2; SV. 1. 464; VS. 4. 25. The word अ॒मति॑: occurs in RV. I. 64. 9; 73. 2. but Yāska has not quoted from the RV.

३. Omitted by Bk, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. Quoted by SRV. I. 67. 2; VI. 68. 1. pp. i. 326; ii. 874.

५. RV. VII. 39. 4.

६. Cf. SRV. VIII. 5. 23; 42. 4; also I. 3. 3; 34. 7.

७. बहुवि: C 5, M 3; बहुभि: Mi, W 1; बहुधि: C 4, W 2. Cf. SRV. I. 5. 3; 116. 7; 134. 3; VII. 9. 6. pp. i. 46, 515, 605; iii. 24.

८. RV. V. 85. 6.

९. RV. V. 1. 2; SV. 2. 1097.

१०. RV. VIII. 27. 10.

११. Durga reads रेशयदासिनः & gives रेशयदारिणः as a variant.

१२. Quoted by SRV. I. 164. 49. p. i, 719.

त्वष्टा सुदत्रो विदधातु रायः[1] । इत्यपि निगमो भवति ।

सुविदत्रः कल्याणविद्यः ।

आग्ने याहि सुविदत्रेभिरर्वाङ्[2] । इत्यपि निगमो भवति ।

आनुषगिति नामानुपूर्वस्य[3] । अनुषक्तं भवति ।

स्तृणन्ति बर्हिरानुषक्[4] । इत्यपि निगमो भवति ।

तुर्वणिस्तूर्णवनिः[5] ।

स तुर्वणिर्महाँ अरेणु पौंस्ये[6] । इत्यपि निगमो भवति ।

गिर्वणा देवो भवति । गीर्भिरेनं वनयन्ति[7] ।

जुष्टं गिर्वणसे बृहत्[8] । इत्यपि निगमो भवति ॥ १४ ॥

अमूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि[9] ।

असुसमीरिताः सुसमीरिते वातसमीरिताः[10] । माध्यमका देवगणाः । ते[11] रसेन पृथिवीं तर्पयन्तः । भूतानि च कुर्वन्ति । त आयजन्त । इत्यतिक्रान्तं प्रतिवचनम् ।

अभ्यक्सा त इन्द्र ऋष्टिः[12] । अमाक्तेति वा । अभ्यक्तेति ।

यादृश्मिन्धायि तमपस्यया विदत्[13] ।

यादृशेऽधायि तमपस्ययाविदत् ।

उस्रः पितेव जारयायि यज्ञैः[14] ।

उस्र इव गोपिताजायि यज्ञैः ॥ १५ ॥

प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः[15] ।

प्रास्थुर्वो[16] जोषयमाणा अभवत सर्वे । अग्रगमनेनेति वा । [अग्रगरणेनेति वा ।][17] अग्रसंपादिन इति वा ।

---

१. RV. VII. 34. 22; VS. 2. 24; 8. 14.

२. RV. X. 15. 9; AV. 18. 3. 48.

३. Quoted by SRV. VIII. 12. 11. p. iii. 297.

४. RV. VIII. 45. 1; SV. 1. 133; 2. 688; VS. 7. 32.

५. Quoted by SRV. I. 56. 3. p. i. 283.

६. RV. I. 56. 3.

७. SRV. I. 62. 1. p. i. 304.

८. RV. VIII. 89. 7; SV. 2. 781.

९. RV. X. 82. 4; VS. 17. 28.

१०. वाजसमीरिताः BK, C 4, C 5. Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. ये C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

१२. RV. I. 169. 3.

१३. RV. V. 44. 8; Cf. N. 1. 15.

१४. RV. V. 12. 4.

१५. RV. IV. 34. 3.

१६. प्रणस्थुः M 2.

१७. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

अपि वाग्रमित्येतदनर्थकमुपबंधमाददीत ।

अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम्[१] ।

अद्धीन्द्र प्रस्थितानीमानि हवींषि चनो दधिष्व । चन इत्यन्ननाम । पचतिर्नामीभूतः ।

तं मेदस्तः प्रति पचताग्रभीष्टाम्[२] ।

इत्यपि निगमो भवति ।

अपि वा मेदसश्च पशोश्च[३] । सात्त्वं द्विवचनं स्यात् । यत्र ह्येकवचनार्थः प्रसिद्धं[४] तद्भवति ।

पुरोळा अग्ने पचतः[५] । इति यथा ।

शुरुध आपो भवन्ति । शुचं संरुन्धन्ति ।

ऋतस्य हि शुरुधः सन्ति पूर्वीः[६] । इत्यपि निगमो भवति ।

अमिनो[७]ऽमितमात्रो महान्भवति । अभ्यमितो वा ।

अमिनः सहोभिः[८] । इत्यपि निगमो भवति ।

जज्झतीरापो भवन्ति । शब्दकारिण्यः[९] ।

मरुतो जज्झतीरिव[१०] । इत्यपि निगमो भवति ।

अप्रतिष्कुतः । अप्रतिस्कृतः । अप्रतिस्खलितो वा[११] ।

असभ्यमप्रतिष्कुतः[१२] । इत्यपि निगमो भवति ।

शाशदानः शाशाद्यमानः[१३] ।

प्र स्वां मतिमतिरच्छाशदानः[१४] । इत्यपि निगमो भवति ॥ १६ ॥

---

१. RV. X. 116. 8.

२. MS. IV. 13. 9. Cf. मेदस्तः प्रति पचत VS. 21. 60; 28. 23, 46.

३. वशोश्च C 4, C 5, M 3.

४. प्रसिद्धिम् C 4, C 5, M 3.

५. RV. III. 28. 2.

६. RV. IV. 23. 8; Cf. N. 10. 41.

७. अमीनो W 1.

८. Fragment of RV. VI. 19. 1; VS. 7. 39; Cf. N. 6. 17.

९. Quoted SRV. V. 52. 6. p. ii. 613

१०. RV. V. 52. 6.

११. Quoted SRV. I. 7. 6. p. i. 56.

१२. RV. I. 7. 6; AV. 20. 17. 12; SV. 2. 971.

१३. शाशाद्यदानः C 3. Quoted SRV. I. 123. 10; 124. 6. pp. i. 560, 564.

१४. RV. I. 33. 13.

सृप्रः सर्पणात् । इदमपीतरत् सृप्रमेतस्मादेव । सर्पिर्वा । तैलं वा ।

सृप्रकरस्नमूतये[1] । इत्यपि निगमो भवति ।

करस्नौ बाहू । कर्मणां प्रस्नातारौ[2] ।

सुशिप्रमेतेन व्याख्यातम् ।

वाजे सुशिप्र गोमति[3] । इत्यपि निगमो भवति ।

शिप्रे हनू नासिके वा । हनुर्हन्तेः । नासिका नसतेः ।

विष्यस्व शिप्रे वि सृजस्व धेने[4] । इत्यपि निगमो भवति ।

धेना दधातेः ।

रंसु[6] रमणात् ।

स चित्रेण चिकिते रंसु भासा[7] । इत्यपि निगमो भवति ।

द्विबर्हा द्वयोः स्थानयोः परिवृढः । मध्यमे च स्थान उत्तमे च ।

उत द्विबर्हा अमिनः सहोभिः[9] । इत्यपि निगमो भवति ।

अक्र आक्रमणात् ।

अक्रो न बभ्रिः समिथे महीनाम्[10] । इत्यपि निगमो भवति ।

उराण ऊरु कुर्वाणः[11] ।

दूत ईयसे प्रदिव उराणः[12] । इत्यपि निगमो भवति ।

स्त्रिया आपो भवन्ति । स्त्यायनात्[13] ।

वृषा सिन्धूनां वृषभः स्त्रियानाम्[14][15] । इत्यपि निगमो भवति ।

स्त्रिपा स्त्रियापालनः[16] । उपस्थितान् पालयतीति[17] ।

---

१. RV. VIII. 32. 10; SV. 1. 217.

२. Quoted SRV. III. 18. 5; VIII. 32. 10. pp. ii. 186; iii. 388.

३. RV. VIII. 21. 8.

४. Quoted SRV. I. 9. 3; 29. 2; III. 30. 3. pp. i. 65, 150; ii. 218.

५. RV. I. 101. 10.

६. रमणीयेषु is added after रंसु by Durga.

७. RV. II. 4. 5.

८. Quoted SRV. VII. 8. 6. p. iii. 23.

९. RV. VI. 19. 1; VS. 7. 39; Cf. N. 6. 16.

१०. RV. III. 1. 12.

११. Quoted SRV. III. 19. 2; IX. 109. 9. pp. ii. 187; iii. 822.

१२. RV. IV. 7. 8.

१३. Quoted SRV. VII. 5. 2. p. iii. 16.

१४. स्त्रियानम् C 3.

१५. RV. VI. 44. 21.

१६. स्तृषापालनः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१७. वा is added by Roth.

स न॑ स्ति॒पा उ॒त भ॑वा तनू॒पाः[१] । इत्यपि निगमो भवति ।

जवारु जवमानरोहि । जरमाण[२]रोहि । गरमाणरोहीति वा ।

अग्ने॑ रु॒प आरु॑पितं॒ जवा॑रु[३] । इत्यपि निगमो भवति ।

जरूथं गरूथं गृणातेः ।

जरू॑थं ह॒न्यक्षि रा॒ये पुर॑न्धिम्[४] । इत्यपि निगमो भवति ।

कुलिश इति वज्रनाम । कूलशातनो भवति ।

स्कन्धां॑सीव॒ कुलि॑शेना॒ विवृ॑क्णाहिः शयत उप॒पृक्पृ॑थि॒व्याः[५] ।

स्कन्धो वृक्षस्य समा[६]स्कन्नो भवति । अयम[७]पीतरस्कन्ध एतस्मादेव । आस्कन्नं का[८]ये । अहिः शयत उपपर्चनः पृथिव्याः ।

तुंजस्तुंजतेर्दानकर्मणः ॥ १७ ॥

तु॒ञ्जेतु॑ञ्जे य उत्त॑रे॒ स्तोमा॒ इन्द्र॑स्य व॒ज्रिणः॑ ।
न वि॑न्धे अस्य सुष्टुतिम्[९] ॥

दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेः[१०] ।
बर्हणा परिबर्हणा ।

बृ॒हच्छ्र॑वा॒ असु॑रो ब॒र्हणा॑ कृ॒तः[११] । इत्यपि निगमो भवति ॥ १८ ॥

यो अ॑स्मै घ्रं॒स उ॒त वा॒ य ऊध॑नि॒ सोम॑ सु॒नोति॒ भव॑ति द्यु॒माँ अह॑ ।
अपा॑प श॒क्रस्त॑त॒नुष्टि॑मूहति त॒नूशु॑भ्रं म॒घवा॒ यः क॑वास॒खः[१२] ॥

घ्रंस इत्यहर्नाम । ग्रस्यन्तेऽस्मिन्रसाः ।

गोरूध उद्धततरं भवति । उपोनद्धमिति वा । स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते । स योऽसौ[१३] अहन्यपि[१३] वा रात्रौ सोमं सुनोति भवत्यह[१४] द्योतनवान् ।

---

१. RV. X. 69. 4.

२. Cf. SRV. IV. 5. 7. p. ii. 367: जवारु जरमाणरोहीति वा जवमानरोहीति वेति यास्कः ।

३. RV. IV. 5. 7.

४. RV. VII. 9. 6.

५. RV. I. 32. 5.

६. समास्कन्धो M 3.

७. इदम् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

८. स्कन्धो वृक्षस्य...काये is omitted by Durga.

९. RV. I. 7. 7; AV. 20. 70. 13.

१०. स्तुवे C 6. Quoted SRV. I. 7. 7. p. i. 57.

११. RV. I. 54. 3.

१२. RV. V. 34. 3.

१३. ऽस्माहनन्यपि M 3; ऽस्मा अहन्नपि C 5, W 1, W 2.

१४. भवति ह BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

अपोहत्यपोहति शक्रः। तितनिषुं[1] धर्मसन्तानादपेतमलंकरिष्णुमयज्वानम्। तनूशुभ्रं तनूशोभयितारम्। मघवा यः। कवासखो यस्य कपूयाः सखायः।

न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः[2]।

निरविध्यदिलाविलशयस्य[3] दृढानि। व्यभिनच्छृङ्गिणं शुष्णमिन्द्रः ॥ १९ ॥

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै[4] ॥

अस्मै प्रहर। तूर्णं त्वरमाणः। वृत्राय वज्रमीशानः। कियेधाः कियद्धा इति वा। क्रममाणधा इति वा[5]। गोरिव पर्वाणि विरद मेघस्य। इष्यन्नर्णांसि। अपां चरणाय[6]।

भूमिर्भ्राम्यतेः।

भूमिरस्यृषिकृन्मर्त्यानाम्[7]। इत्यपि निगमो भवति।

विष्पितो विप्राप्तः[8]।

पारं नो अस्य विष्पितस्य पर्षन्[9]। इत्यपि निगमो भवति ॥ २० ॥

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः[10] ॥

तन्नः। तूर्णापि। महत्। संभृतम्। आत्मना। त्वष्टा धनस्य पोषाय विष्यतु। इत्यस्मयुः। अस्मान् कामयमानः।

रास्पिनो रास्पी। रपतेर्वा। रसतेर्वा।

रास्पिनस्यायोः[11]। इत्यपि निगमो भवति।

ऋञ्जतिः प्रसाधनकर्मा[12]।

---

१. ततनिषुं BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
२. RV. I. 33. 12.
३. Quoted SRV. I. 33. 12. p. i. 178.
४. RV. I. 61. 12; AV. 20. 35. 12.
५. Quoted SRV. I. 61. 6. p. i. 299.
६. Cf. SRV. I. 61. 12. p. i. 302. Sāyaṇa reads: ०र्णांस्यां चरणाय.
७. RV. I. 31. 16.
८. विप्प्राप्तः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
९. RV. VII. 60. 7.
१०. RV. I. 142. 10; AV. 5. 27. 10; VS. 27. 20.
११. Fragment of RV. I. 22. 4.
१२. Quoted SRV. I. 6. 9; 37. 3; 54. 2; IV. 21. 5; pp. i. 53, 200, 273; ii. 411.

[आ वं ऋञ्जस ऊर्जां व्युष्टिषु । इत्यपि निगमो भवति ।][1]

ऋजुरित्यप्यस्य भवति ।

ऋजुनीती नो वरुणः । इत्यपि निगमो भवति ।[3]

प्रतद्वसू प्रात्तवसू ।

हरीं इन्द्र प्रतद्वसू अभि स्वर । इत्यपि निगमो भवति ॥ २१ ॥[4]

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।

ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥[5]

प्रहिणुत नोऽध्वरं देवयज्यायै । प्रहिणुत ब्रह्म धनस्य सननाय[6] । ऋतस्य योगे । यज्ञस्य योगे । याज्ञे शकट इति वा । शकटं शकृदितं[8] भवति । शनकैस्तकतीति वा । शब्देन तकतीति वा । सुखवतीः [श्रुष्टीवरी]भूतनास्मभ्यमापः । [सुखवत्यो भवतास्मभ्यमापः ।][10]

चोष्कूयमाण इन्द्र भूरि वामम् ।[11]

ददिन्द्र बहुवननीयम् ।[12][13]

एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ।[14]

व्युदस्यति[15] । एधमानानहद्वेष्ट्यसुन्वतः । सुन्वतोऽभ्यादधाति । उभयस्य राजा । दिव्यस्य च पार्थिवस्य च । चोष्कूयमाण इति चोष्कूयतेश्चर्करीतवृत्तम् ।

सुमत्स्वयमित्यर्थः[16] ।

---

१. RV. X. 76. 1.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga. The commentator says Yāska did not cite any quotation to illustrate the meaning of ऋञ्जतिः ।

३. RV. I. 90. 1; SV. 1. 218.

४. RV. VIII. 13. 27.

५. RV. X. 30. 11.

६. सननाय C 3, C 4, Mi & Roth; सवनाय S'ivadatta.

७. Cf. SRV. X. 30. 11. p. IV. 90.

८. शकृद्दतं C 5, M 3, W 1, W 2.

९. Omitted by C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

११. RV. I. 33. 3.

१२. बहुवदतीयम् C 3.

१३. Quoted SRV. VIII. 7. 41. p. iii. 270.

१४. RV. VI. 47. 16.

१५. विदस्यति W 2.

१६. Quoted SRV. I. 100. 16; 156. 2; 162. 7. pp. i. 444, 667, 685.

उप प्रागात्सुमन्मेऽधायि मन्म[1]।

उपप्रैतु मां [स्वयं[2]] यन्मे मनोऽध्यायि यज्ञेन। इत्याश्वमेधिको मन्त्रः।

दिविष्टिषु दिव एषणेषु।

स्थूरं राधः शताश्वं कुरुङ्गस्य[3] दिविष्टिषु[4]।

स्थूरः। समाश्रितमात्रो महान्भवति। अणुरनु स्थवीयांसम्। उपसर्गो लुप्तनामक[5]रणः। यथा संप्रति। कुरुङ्गो[6] राजा बभूव। कुरुगमनाद्वा। कुलगमनाद्वा। कुरुः कृन्ततेः। क्रूरमित्यप्यस्य भवति। कुलं कुष्णातेः। विकुषितं भवति।

दूतो व्याख्यातः[7]।

जिन्वतिः प्रीतिकर्मा।

भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः[8]।

इत्यपि निगमो भवति ॥ २२ ॥

अमत्रोऽमात्रो महान्भवति। अभ्यमितो वा[9]।

महाँ अमत्रो वृजने विरप्शी[10]। इत्यपि निगमो भवति।

स्तवै वज्र्यृचीषमः[11]। स्तूयते वज्रयृचा समः[12]।

अनर्शरातिमनश्लीलदानम्। अश्लीलं पापकम्।

अश्रिमत्[13]। विषमम्।

अनर्शरातिं वसुदामुप स्तुहि[14]। इत्यपि निगमो भवति।

अनर्वा अप्रत्यृतोऽन्यस्मिन्।

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः[15]।

---

१. RV. I. 162. 7; VS. 25. 30.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. कुरङ्गस्य. C 3, M 3, W 1.

४. RV. VIII. 4. 19; cf. VIII. 24. 29; cf. BD. VI. 44.

५. उपसर्गलुप्तः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

६. कुरङ्गो C 5, W 1.

७. See. N. 5. 1.

८. अग्नयः is omitted by C 3. RV. I. 164. 51; cf. N. 7. 23.

९. Quoted SRV. I. 61. 9. p. i. 300.

१०. RV. III. 36. 4.

११. RV. RV. X. 22. 2.

१२. Quoted SRV. I. 61. 1. p. i. 296.

१३. अश्लिमत् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3. Cf. SRV. VIII. 99. 4. p. iii. 586.

१४. RV. VIII. 99. 4; AV. 20. 58. 2; Cf. SV. 2. 670.

१५. RV. I. 190. 1; Cf. BD. IV. 63.

अनर्वमप्रत्यृतमन्यस्मिन् । वृषभम् । मन्द्रजिह्वं मन्दनजिह्वं । मोदनजिह्वमिति वा[३] । बृहस्पतिं वर्धय नव्यमर्कैः । अर्चनीयैः स्तोमैः ॥

असामि सामिप्रतिषिद्धम् । सामि स्यतेः ।

असाम्योजो बिभृथा सुदानवः[४] ।

असुसमाप्तं बलं बिभृत[५] कल्याणदानाः ॥ २३ ॥

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।

भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्[६] ॥

मा चुक्रुधं त्वां सोमस्य गालनेन सदा याचन्नहम् । गिरा गीत्या स्तुत्या । भूर्णिमिव मृगम् । न सवनेषु चुक्रुधम् । क ईशानं न याचिष्यत[७] इति । [गल्दा धमनयो भवन्ति । गलनमासु धीयते ।][८]

आ त्वा विशन्त्विन्दव आ गल्दा धमनीनाम्[९] ।

नानाविभक्तीत्येते भवतः । आगलना धमनीनामित्यत्रार्थः ॥ २४ ॥

न पापासो मनामहे नारायासो न जल्हवः[१०] ।

न पापा मन्यामहे[११] । नाधनाः । न ज्वलनेन हीनाः । अस्त्यस्मासु ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरवोचत् ।

बकुरो भास्करः । भयंकरः । भासमानो द्रवतीति वा ॥ २५ ॥

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।

अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय[१२] ॥

[यवमिव वृकेणाश्विनौ निवपन्तौ ।][१३] वृको लाङ्गलं भवति । विकर्तनात्[१४] ।

---

१. Cf. SRV. I. 190. 1. p. i. 787.

२. Omitted by M 3, W 2.

३. Quoted by SRV. V. 25. 2. p. ii. 541.

४. RV. I. 39. 10.

५. बिभृथम् Mi; बिभृथ C 4, C 5, M 3, W 1, W 2, and Sāyaṇa on RV. I. 39. 10. p. i. 211.

६. RV. VIII. 1. 20; SV. 1. 307.

७. याचिष्यति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3. गलनमासु धीयते is omitted by Durga.

९. आ त्वा विशन्त्विन्दवः RV. I. 15. 1[b]; VIII. 92. 22[a].

१०. RV. VIII. 61. 11.

११. Quoted SRV. VIII. 61. 17. p. iii. 474.

१२. RV. I. 117. 21.

१३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१४. Quoted SRV. VIII. 22. 6. p. iii. 344.

लाङ्गलं लगतेः[१] । लाङ्गूलवद्वा । लाङ्गूलं लगतेः । लंगतेः । लंबतेर्वा[२] । अन्नं दुहन्तौ[३] मनुष्याय दर्शनीयौ । अभिधमन्तौ । दस्युं बकुरेण ज्योतिषा[४] वोदकेन वा । अयं ईश्वरपुत्रः ।

वेकनाटाः खलु कुसीदिनो भवन्ति । द्विगुणकारिणो वा । द्विगुणदायिनो वा । द्विगुणं कामयन्त इति वा ।

इन्द्रो विश्वान्बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि[५] ।

इन्द्रो [यः[६]] सर्वान् बेकनाटान् । अहर्दृशः सूर्यदृशः । य इमान्यहानि पश्यन्ति न पराणीति वा । अभिभवति[७] कर्मणा । पणींश्च वणिजः ॥ २६ ॥

जीवान्नो अभि धेतनादित्यासः पुरा हथात् ।
कद्ध स्थ हवनश्रुतः[८] ॥

जीवतो नोऽभिधावतादित्याः पुरा हननात् । क नु स्थ ह्वानश्रुत इति ।

मत्स्यानां जालमापन्नानामेतदार्षं वेदयन्ते । मत्स्या मधा उदके स्यन्दन्ते । माद्यन्तेऽन्योन्यं भक्षणायेति वा । जालं जलचरं भवति । जलेभवं वा । जलेशयं वा ।

अंहुरोऽहस्वान्[९] । अंहूरणमित्यप्यस्य भवति ।

कृण्वन्नंहूरणादुरु[१०] । इत्यपि निगमो भवति ।

सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्[११] ।

सप्तमर्यादाः[१२] कवयश्चक्रुः । तासामेकामप्यभिगच्छन्[१३]नंहस्वान्भवति । स्तेयं तल्पारोहणं ब्रह्महत्यां भ्रूणहत्यां सुरापानं दुष्कृतस्य[१४] कर्मणः पुनः पुनः सेवां पातकेऽनृतोद्यमिति[१५] ।

वत इति निपातः । खेदानुकम्पयोः ॥ २७ ॥

---

१. लङ्गते: Roth.
२. The passage वृको लाङ्गलं...लंबते वा is omitted by Durga.
३. दुहन्तो C 5, W 1, W 2.
४. ज्योतिषो BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
५. RV. VIII. 66. 10.
६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
७. अभिभवन्ति C 5.
८. RV. VIII. 67. 5.
९. अहूस्वाणं BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; अहस्वानं M 1, M 2.
१०. RV. I. 105. 17.
११. RV. X. 5. 6; AV. 5. 1. 6.
१२. सप्तैव मर्यादाः C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth and S'iva.
१३. अधिगच्छन् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.
१४. दुष्कृतकर्मणः C 4, C 5, M 3, W 1.
१५. Quoted by SRV. X. 5. 6. p. IV 11. The word भ्रूणहत्यां is missing in the passage cited by Sāyaṇa, consequently the number of boundaries is only six.

व्रतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परिष्वजाते लिबुजेव वृक्षम्[1] ॥

यतो बलाद्[2]तीतो भवति । दुर्बलो बतासि यम । नैव ते मनो हृदयं च विजानामि[3] । अन्या किल त्वां परिष्वंक्ष्यते कक्ष्येव युक्तं लिबुजेव वृक्षम् । लिबुजा व्रततिर्[5]भवति । लीयते विभजन्तीति । व्रततिर्वरणाच्च । सयना[4]च्च । ततनाच्च[5] ।

वाताप्यमुदकं भवति । वात एतदाप्याययति ।

पुनानो वाताप्यं विश्वश्चन्द्रम्[6] । इत्यपि निगमो भवति ।

वने न वायो न्यधायि चाकन्[7] ।

वन इव । वायो वेः पुत्रः । चायन्निति वा । कामयमान इति वा । वेति च य इति च चकार शाकल्यः । उदात्तं त्वेवम्[9]आख्यातमभविष्यत् । असुसमाप्तश्चार्थः ।

र[10]थर्यतीति सिद्धस्तत्प्रेप्सुः । रथं कामये[11]त इति वा ।

एष देवो र[12]थर्यति । इत्यपि निगमो भवति ॥ २८ ॥

धेनुं न इषं पिन्वतमसंक्राम्[13] । असंक्रमणीम्[14] ।

आधव आधवनात् ।

मतीनां च साधनं विप्राणां चाधवम्[15] । इत्यपि निगमो भवति ।

अनवब्रवोऽनवक्षिप्त[16]वचनः ।

विजेषकृदिन्द्र इवानवब्रवः[17] । इत्यपि निगमो भवति ॥ २९ ॥

---

१. RV. X. 10 13; AV. 18. 1. 15.

२. बलादतितो BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

३. विजानीमः C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S; Roth and S'iva.

४. शयनाच्च C 4, C 5, M 3, Mi, W 1.

५. The passage लिबुजा व्रतति...ततनाच्च is omitted by Durga.

६. RV. IX. 35. 5.

७. RV. X. 29. 1; AV. 20. 76. 1.

८. Cf. BD. ii. 114.

९. त्वेतत् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१०. रथं हर्यति is added after रथर्यतीति by Durga.

११. कामयन्त BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; C 6, M 1, M 2.

१२. RV. IX. 3. 5; SV. 2. 609.

१३. RV. VI. 63. 8.

१४. Quoted by SRV. VI. 63. 8. p. ii. 864.

१५. RV. X. 26. 4.

१६. ऽनवक्षिप्रवचनः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3. Quoted by SRV. X. 84. 5. p. IV. 252.

१७. RV. X. 84. 5; AV. 4. 31. 5.

अरा॑यि का॒णे विक॑टे गि॒रिं ग॑च्छ सदान्वे ।
शि॒रिम्बि॑ठस्य॒ सत्त्व॑भि॒स्तेभि॑ष्ट्वा चातयाम॑सि ॥

अदायिनि काणे विकटे । काणो[2] विक्रान्तदर्शन इत्यौपमन्यवः । कणतेर्वा स्यादणूभावकर्मणः । कणतिः शब्दाणूभावे भाष्यते । अनुकणतीति । मात्राणूभावात्कणः । दर्शनाणूभावात्काणः । विकटो विक्रान्तगतिरित्यौपमन्यवः । कुटतेर्वा स्यात् [विपरीत[3]स्य] विकुटितो भवति । गिरिं गच्छ । सदानोनुवे शब्दकारिके । शिरिम्बिठस्य सत्त्वभिः । शिरिम्बिठो मेघः । शीर्यते बिठे । [बिठमन्तरिक्षं[4]] बिठं वीरिटेन व्याख्यातम्[5] । तस्य सत्त्वैरुदकैरिति स्यात् । तैष्ट्वा चातयामः । अपि वा शिरिम्बिठो भारद्वाजः कालकर्णोपेतः । अलक्ष्मीर्निर्णाशयाञ्चकार[6] । तस्य सत्त्वैः कर्मभिरिति स्यात्[7] । तैष्ट्वा चातयामः । चातयतिर्नाशने ।

पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे ।

प॒रा॒श॒रः श॒तया॑तु॒र्वसि॑ष्ठः[8] । इत्यपि निगमो भवति ।

इन्द्रोऽपि पराशर उच्यते । [परा] शातयिता यातूनाम् ।

इन्द्रो॑ यातू॒नाम॑भवत्पराश॒रः[9] । इत्यपि निगमो भवति ।

क्रिविर्दती विकर्तनदन्ती ।

यत्रा॑ वो दि॒द्युद्रद॑ति॒ क्रिवि॑र्दती[10] । इत्यपि निगमो भवति ।

करूळती कृत्तदती । [अपि वा देवं कश्चित्कृत्तदन्तं दृष्ट्वैवमवक्ष्यत][11] ॥ ३० ॥

वा॒मं वा॑मं त आदुरे दे॒वो द॑दात्वर्य॒मा ।
वा॒मं पू॒षा वा॒मं भगो॑ वा॒मं दे॒वः करू॑ळती[12] ॥

वामं वननीयं भवति[13] । आदुरिरादरणात् । तत्कः करूळती । भगः पुरस्तात्तस्यान्वादेश इत्येकम् । पूषेत्यपरम् । सोऽदन्तकः[14] ।

अदन्तकः पूषा[15] । इति च ब्राह्मणम् ।

---

१. RV. X. 155. 1.

२. काणे Roth.

३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

४. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

५. बिठं...व्याख्यातम् is omitted by C 6.

६. निर्णाशयांचकार. C 1, C 2, C 3, C 6, M 1, M 2, R 1, R 2, R 5, S.

७. नामभिः C 1 and Durga.

८. RV. VII. 18. 21.

९. RV. VII. 104. 21; AV. 8. 4. 21.

१०. RV. I. 166. 6.

११. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

१२. RV. IV. 30. 24.

१३. Quoted by SRV. IV. 30 24; VI. 71. 4; VII. 18. 1. pp. ii. 434, 883; iii. 36.

१४. Cf. BD. IV. 139 B.

१५. Cf. KB. VI. 13. S'B. I. 7. 4. 6.

दनो॒ विशं इन्द्र मृध्रवाचः[1]।

दानमनसो नो मनुष्यानिन्द्र मृदुवाचः कुरु[2]।

अ॒वीरा॑मिव॒ माम॒यं श॒रारु॑र॒भि म॑न्यते[3]।

अबलामिव मामयं बालोऽभिमन्यते संशिशरिषुः।

इदंयुरिदं कामयमानः। अथापि तद्वदर्थे भाष्यते। वसूयुरिन्द्रो वसुमानित्यत्रार्थः[5]।

अ॒श्व॒युर्ग॒व्यू रथ॒युर्व॑सू॒युः [इन्द्र[7]ः।] इत्यपि निगमो भवति[8] ॥ ३१ ॥

किं ते॑ कृण्वन्ति॒ कीक॑टेषु॒ गावो॒ नाशिरं॑ दु॒हे न त॑पन्ति घ॒र्मम्।

आ नो॑ भर॒ प्रम॑गन्दस्य॒ वेदो॑ नैचाशा॒खं म॑घवन्रन्धया नः[9] ॥

किं ते कुर्वन्ति कीकटेषु गावः। कीकटा नाम देशोऽनार्यनिवासः[10]। कीकटाः किंकृताः। किं क्रियाभिरिति प्रेप्सा [वा[11]]। नैव चाशिरं दुह्रे। न तपन्ति घर्मं हर्म्यम्[12]। आहर नः[13] प्रमगन्दस्य धनानि। मगन्दः कुसीदी। माङ्गदो मामागमिष्यतीति[14] च ददाति। तदपत्यं प्रमगन्दः। अत्यन्त[15]कुसीदि[16]कुलीनः। प्रमदको वा योऽयमेवास्ति लोको न पर इति प्रेप्सुः। पण्डको वा। पण्डकः पण्डगः प्रार्दको वा प्रार्दयत्याण्डौ। आण्डावाणी इव व्रीडयति। तत् त्वं[17] नैचाशाखं नीचाशाखो नीचैः[18] शाखः। शाखाः शक्नोतेः। आणिररणात्। तन्नो मघवन्रन्धयेति। रध्यतिर्वशगमने[19]।

१. RV. I. 174. 2.

२. Quoted by SRV. I. 174. 2. p. i. 748.

३. RV. X. 86. 9; AV. 20. 126. 9; Cf. BD. i. 53. Macdonell translates अवीरा as 'without a husband'.

४. Quoted by SRV. VIII. 92. 30. p. iii. 557.

५. Cf. SRV. I. 51. 14. p. i. 260. वसुमानित्यर्थः।

६. RV. I. 51. 14.

७. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

८. Cf. SRV. I. 51. 14. p. i. 260.

९. RV. III. 53. 14.

१०. Cf. SRV. III. 53. 14. p. ii. 302, कीकटो etc.

११. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१२. Cf. SRV. III. 53. 14. p. ii. 302 घरणं.

१३. Omitted by C 5, M 3, Mi.

१४. मां गमिष्यतीति BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१५. अत्यन्तः W 1.

१६. ०कुसीदः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१७. तत् त्वं BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; तस्तस्मै Roth, S'ivadatta.

१८. नैचैः BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3. Cf. SRV. III. 53. 14. p. ii. 302.

१९. The passage नैचाशाखं...वशगमने is omitted by Durga. Quoted by SRV. loc. cit.

बुन्द इषुर्भवति[1] । [बिन्दो वा[2] ।] भिन्दो वा । भयदो वा । भासमानो द्रवतीति वा ॥ ३२ ॥

> तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः ।
> उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा[3] ॥

तुविक्षं बहु[4]विक्षेपं महाविक्षेपं वा ते सुकृतं सूमयं सुसुखं धनुः । साधयिता ते बुन्दो हिरण्मयः[5] । उभौ ते बाहू [रण्यौ[6]] रमणीयौ सांग्राम्यौ [वा[6]] । ऋदूपे[7] अर्दनपातिनौ । गमनपातिनौ [शब्दपातिनौ दूरपातिनौ][8] वा । मर्मण्यर्दनवेधिनौ । गमनवेधिनौ[9] [शब्दवेधिनौ दूरवेधिनौ][10] वा ॥ ३३ ॥

> निराविध्यद्गिरिभ्य आ धारयत्पक्वमोदनम् ।
> इन्द्रो बुन्दं स्वाततम्[11] ॥

निरविध्यद्गिरिभ्य आधारयत्पक्वम् । ओदनमुदकदानं मेघम् । इन्द्रो बुन्दं स्वाततम् ।

वृन्दं बुन्देन व्याख्यातम् । वृन्दारकश्च ॥ ३४ ॥

> अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः ।
> अहरहर्जायते मासि मास्यथा देवा दधिरे हव्यवाहम्[12] ॥

अयं यो होता कर्ता स यमस्य । कमप्य् [ऊहे[13]] अन्नमभिवहति यत्समश्नुवन्ति देवाः । अहरहर्जायते । मासे मासे । अर्धमासेऽर्धमासे वा । अथ देवा निदधिरे हव्यवाहम्[14] ।

---

१. Quoted by SRV. VIII. 45. 4. p. iii. 430.

२. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; & Durga. C 3 reads बुन्दो वा.

३. RV. VIII. 77. 11.

४. बहुविक्षम् BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3; M 1; बहुविक्षपम् C 3.

५. हिरण्यय: Roth and S'ivadatta.

६. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

७. Cf. N. 6. 4.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3, and Durga.

९. Quoted by SRV. VIII. 77. ii. p. iii. 525.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 3, and Durga, who remarks: भाष्यमत्र न सम्यगिव लक्ष्यते तस्य सम्यक् पाठोऽन्वेष्यस्ततो योज्यम् । Omitted also by SRV. VIII. 77. 11. p. iii. 525.

११. RV. VIII. 77. 6.

१२. RV. X. 52. 3.

१३. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 4, R 6, W 1, W 2, W 3.

१४. अथ देवा...हव्यवाहम् is omitted by C 3.

उल्बमूर्णोतेः । वृणोतेर्वा ।

महत्तदुल्बं स्थविरं तदासीत्[1] । इत्यपि निगमो भवति ।

ऋबीसमपगतभासम् । अपहृतभासम् । अन्तर्हितभासम् । गतभासं वा ॥३५॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥[2]

हिमेनोदकेन[3] ग्रीष्मान्तेऽग्निं घ्रंसमहरवारयेथाम् । अन्नवतीं चास्मा ऊर्जमधत्तमग्नये । योऽयमृबीसे पृथिव्यामग्निरन्तरोषधिवनस्पतिष्वप्सु तमुन्निन्यथुः । सर्वगणं सर्वनामानं । गणो गणनात् । गुणश्च । यद्वृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपं तेनैनौ स्तौति स्तौति ॥ ३६ ॥

इति षष्ठोऽध्यायः ।

[[1]त्वमग्ने [2]ऽलातृण [3]उद्वृहा [4]जारं [5]उपलप्रक्षिणी [6]कारु[7]रहं [8]मंस्से ते श्रार्यन्त इवाश्वं हि सोमानं स्वरण[11]मिन्द्रा सोमा [12]कृणुष्वपाजस्तां [13]अध्वरे[14]ऽस्ति हिवो[15]ऽसूर्त [16]प्रवोच्छा [17]संप्रस्तु[18]ञ्जे तुञ्जे [19]यो अस्मा [20]अंसा इदु [21]तन्नस्तुरीपं [22]हिनोता[23]नोमंत्रो [24]मात्वा [25]नं पापासो [26]यवं वृकेण [27]जीवाग्नो [28]व्रतो व्रतासि [29]धेनु[30]र्नोऽरायि काणे [31]वामं वामं [32]किं ते [33]तुविक्षं ते [34]निरा[35]विध्यदयं यो होता [36]हिमेनाग्नि षट्त्रिंशत् ॥]

॥ इति निरुक्ते पूर्वषट्के षष्ठोऽध्यायः समाप्तः ॥

॥ इति नैगमं काण्डं पूर्वार्धश्च समाप्तम् ॥

---

१. RV. X. 51. 1. Cf. BD. VII. 80.

२. RV. I. 116. 8. Cf. BD. ii. 110.

३. Quoted by SRV. I. 116. 8. p. i. 516.

४. Small figure within brackets represents the corresponding section of the sixth chapter of the *Nirukta.*

अथोत्तरषट्कं प्रारभ्यते ।

अथ सप्तमोऽध्यायः ।

ॐ ॥ अथातो दैवतम् । तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते । सैषा देवतोपपरीक्षा । यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छ[१]न्स्तुतिं[२] प्रयुङ्क्ते[३] तद्दैवतः स मन्त्रो[४] भवति[५] । तास्त्रिविधा ऋचः[६] । परोक्षकृताः । प्रत्यक्षकृताः । आध्यात्मिक्यश्च । तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते । प्रथमपुरुषैश्चाख्यातस्य[७] ॥ १ ॥

इन्द्रो दिव इन्द्र ईशे पृथिव्याः[८] ।

इन्द्रमिद् गाथिनो बृहत्[९] ।

इन्द्रेणैते तृत्सवो वेविषाणाः[१०] ।

इन्द्राय साम गायत[११] ।

नेन्द्रादृते पवते धाम किं चन[१२] ।

इन्द्रस्य नु वीर्याणि प्र वोचम्[१३] ।

इन्द्रे कामा अयंसत[१४] । इति ।

अथ प्रत्यक्षकृता मध्यमपुरुषयोगाः । त्वमिति चैतेन सर्वनाम्ना[१५] ।

---

१. ०मर्थ० 'च', 'छ'.

२. ०मिच्छन्स्तुतिं M 1; ०मिछंस्तुतिं C 1, C 2; ०मिछँस्तुतिं C 6.

३. प्रयुंक्ते C 1, C 2, C 6, M 1, M 3.

४. मंत्रो C 1, C 2, C 6, M 1, M 3.

५. Cf. BD. i. 6; *Bṛhatsarvānukramaṇikā*, p. 1. यत्काम ऋषि र्मन्त्रद्रष्टा वा भवति यस्यां देवतायामार्थपत्यमिच्छता स्तुतिः प्रयुज्यते सा देवता तस्य मन्त्रस्य भवति ।

६. Cf. BD. i. 34: मन्त्रा नानाप्रकाराः स्युर्दृष्टा ये मन्त्रदर्शिभिः ।

७. The passage: तास्त्रिविधा...... चाख्यातस्य is quoted by SRV. I. 6. 9. p. i. 53.

८. RV. X. 89. 10.

९. RV. I. 7. 1; AV. 20. 38. 4; 20 47. 4; 20. 70. 7; SV. 1. 198; 2. 146.

१०. RV. VII. 18. 15.

११. RV. VIII. 98. 1; AV. 20. 62. 5; SV. 1. 388; 2. 375.

१२. RV. IX. 68. 6; SV. 2. 720.

१३. RV. I. 32. 1; Cf. AV. 2. 5. 5.

१४. The quotation is untraced.

१५. Cf. BD. i. 11.

त्वमिन्द्र बलादधि [1]।

वि न इन्द्र मृधो जहि [2]। इति

अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति। परोक्षकृतानि स्तोतव्यानि।

मा चि[3]दन्यद्वि शंसत [4]।

कण्वा अभि प्र गायत [5]।

उप प्रेत कुशिकाश्चेतयध्वम् [6]। इति।

अथाध्यात्मिक्य उत्तमपुरुषयोगाः। अहमिति चैतेन सर्वनाम्ना। यथैतदिन्द्रो वैकुण्ठः [8]। लवसूक्तम् [9]। वागाम्भृणीयमिति [10] ॥ २ ॥

परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठाः। अल्पश आध्यात्मिकाः।

अथापि स्तुतिरेव भवति नाशीर्वादः [11]।

इन्द्रस्य नु वीर्याणि प्र वोचम् [12]। इति। यथैतस्मिन्त्सूक्ते।

अथाप्याशीरेव न स्तुतिः।

सुचक्षा अहमक्षीभ्यां भूयासम्। सुवर्चा मुखेन। सुश्रुत्कर्णाभ्यां भूयासम् [13]। इति।

तदेतद्बहुलमाध्वर्यवे याज्ञेषु च मन्त्रेषु।

अथापि शपथाभिशापौ।

अद्या मुरीय यदि यातुधानो अस्मि [14]।

अधा स वीरैर्दशभिर्वि यूयाः [15]। इति।

अथापि कस्यचिद्भावस्याचिख्यासा [16]।

न मृत्युरासीदमृतं न तर्हि [17]।

तम आसीत्तमसा गूळ्हमग्रे [18]।

---

१. RV. X. 153. 2; AV. 20. 93. 5; SV. 1. 120.

२. RV. X. 152. 4; AV. 1. 21. 2; SV. 2. 1218; VS. 8. 44; 18. 70.

३. खिद्° M 1.

४. RV. VIII. 1. 1; AV. 20. 85. 1; SV. 1. 242; 2. 710.

५. RV. I. 37. 1.

६. RV. III. 53. 11; cf. BD. IV. 115.

७. The second section ends here in BK, C 4, C 5, Kn, M 3, Mi, W 1, W 2, W 3, R 7, R 8.

८. RV. X. 48—49.

९. RV. X. 119.

१०. RV. X. 125.

११. Cf. BD. i. 35.

१२. RV. I. 32. 1; cf. AV. 2. 5. 5.

१३. Cf. Pāraskara gṛ. sū. II 6. 19; Ās'va. gṛ. sū. III. 6. 7.

१४. RV. VII. 104. 15; AV. 8. 4. 15.

१५. RV. VII. 104. 15; AV. 8. 4. 15.

१६. Cf. BD. i. 36.

१७. RV. X. 129. 2; cf. BD. i. 58: न मृत्युरासीदित्येतामाचिख्यासां प्रचक्षते।

१८. RV. X. 129. 3.

अथापि परिदेवना कस्माच्चिद्भावात्[1]।

सुदेवो अद्य प्रपतेदनावृत्[2]।
न वि जानामि यदि वेदमस्मि[3]। इति।

अथापि निन्दाप्रशंसे[4]।

केवलाघो भवति केवलादी[5]।
भोजस्येदं पुष्करिणीव वेश्म[6]।

एवमक्षसूक्ते[7] द्यूतनिन्दा च कृषिप्रशंसा च। एवमुच्चावचैरभिप्रायैर्ऋषीणां[8] मन्त्रदृष्टयो भवन्ति ॥ ३ ॥

तद्येऽनादिष्टदेवता[9] मन्त्रास्तेषु देवतोपपरीक्षा[10]। यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति[11]। अथान्यत्र यज्ञात्प्राजापत्या इति याज्ञिकाः[12]। नाराशंसा इति नैरुक्ताः। अपि वा सा कामदेवता स्यात्। प्रायोदेवता वा। अस्ति ह्याचारो बहुलं लोके। देवदेवत्यमतिथिदेवत्यं पितृदेवत्यम्।

याज्ञदैवतो मन्त्र इति। अपि ह्यदेवता देवतावत् स्तूयन्ते। यथाश्वप्रभृतीन्योषधिपर्यन्तानि[13]। अथाप्यष्टौ द्वन्द्वानि[14]। स न मन्येतागन्तूनिवार्थान्[15] देवतानाम्। प्रत्यक्षदृश्यमेतद्भवति। माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते[16]। एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति। अपि च सत्त्वानां प्रकृतिभूमभिर्ऋषयः स्तुवन्तीत्याहुः। प्रकृतिसार्वनाम्याच्च[17]। इतरेतरजन्मानो भवन्ति[18]। इतरेतरप्रकृतयः। कर्मजन्मानः।

---

१. Cf. BD. i. 35.

२. RV. X. 95. 14. Cf. BD. i. 53: सुदेव इति तु स्पृहा। Quoted as an example of desire.

३. RV. I. 164. 37; AV. 9. 10. 15; cf. BD. i. 56: न वि जानामि संज्वरः quoted as an example of agitation. The passage: अथापि परिदेवना......वेदमस्मि is cited by SRV. I. 164. 37. p. i. 713.

४. Cf. BD. i. 35.

५. RV. X. 117. 6; TB. ii. 8. 8. 3; cf. Manu. III. 118.

६. RV. X. 107. 10.

७. RV. X. 34.

८. Cf. BD. i. 3.

९. तद्ये नादिष्ट॰ C 1, C 2, C 6, M 1.

१०. Cf. BD. i. 20.

११. भवति C 2; cf. BD. VII. 16.

१२. Cf. BD. VII. 17.

१३. The 4th section ends here in BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3. See Ngh. V. 3. 1—22.

१४. अथाप्यष्टौ द्वन्द्वानि is omitted by Durga. See Ngh. V. 3. 29—36; N. 9. 35—43.

१५. ॰वार्थानां क. ख. ग.

१६. Cf. BD. IV. 143.

१७. ॰सार्वनाम्याच्च C 1; ॰सार्वनाम्नयाच्च. Lahore edition of Rājārāma.

१८. Cf. BD. i. 71.

आत्मजन्मानः । आत्मैवैषां[1] रथो भवति । आत्माश्वः[2] । आत्मायुधम्[3] । आत्मेषवः । आत्मा सर्वं[4] देवस्य[5] ॥ ४ ॥

तिस्र एव देवता इति नैरुक्ताः[6] । अग्निः पृथिवीस्थानः । वायुर्वेन्द्रो[7] वान्तरिक्षस्थानः । सूर्यो[8] द्युस्थानः । तासां माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति । अपि वा कर्मपृथक्त्वात्[9] । यथा होताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्य सतः । अपि वा पृथगेव स्युः । पृथग्घि स्तुतयो भवन्ति । तथाभिधानानि[10] । यथो एतत्कर्मपृथक्त्वादिति बहवोऽपि विभज्य कर्माणि कुर्युः । तत्र संस्थानैकत्वं[11] संभोगैकत्वं चोपेक्षितव्यम् । यथा पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वम्[12] । संभोगैकत्वं च दृश्यते । यथा पृथिव्याः पर्जन्येन च वाय्वादित्याभ्यां च संभोगः[13] । अग्निना चेतरस्य लोकस्य । तत्रैतन्[14]नरराष्ट्रमिव ॥ ५ ॥

अथाकारचिन्तनं देवतानाम् । पुरुषविधाः स्युरित्येकम् । चेतनावद्धि स्तुतयो भवन्ति । तथाभिधानानि[15] ।

अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते ।

ऋष्वा त इन्द्र स्थविरस्य बाहू[16] ।
यत्सं गृभ्णा मघवन्काशिरित्ते[17] ।

अथापि पौरुषविधिकैर्द्रव्यसंयोगैः ।

आ द्वाभ्यां हरिभ्यामिन्द्र याहि[18] ।
कल्याणीर्जाया सुरणं गृहे ते[19] ।

अथापि पौरुषविधिकैः कर्मभिः ।

---

१. Cf. BD. i. 74: तेजस्त्वेवायुधं प्राहुर्वाहनं चैव यस्य तत् । iii. 85: विश्वेषां ते ततश्चक्रुर्वाहनान्यायुधानि तु । IV. 143: आयुधं वाहनं चापि स्तुतौ यस्येह दृश्यते । तमेव तु स्तुतं विद्यात् तस्यात्मा बहुधा हि सः ॥

२. आत्माश्वाः C 1, C 6, Roth.

३. अत्मा०. Roth.

४. Cf. BD. i. 73: तेषामात्मैव तत्सर्वम् ।

५. देवस्य देवस्य ॥ ५ ॥ प्रथमः पादः BK, C 4, C 5, C 7, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

६. Cf. AB. ii. 17. 17; V. 32. 1; KB. VIII. 8; S'B. XI. 2. 3. 1.

७. Cf. AB. V. 32. 1; S'B XI. 2. 3. 1; BD. i. 69.

८. Cf. BD. i. 70—71.

९. पृथक्त्कात् C 6, M 1.

१०. तथापिधानानि M 3.

११. सस्थानैकत्वं M 1.

१२. च is added after स्थानैकत्वम् in Bib. Ind. ed. of N. Cf. KB. 1. 1: अस्मिन् वै लोके उभये देवमनुष्याः आसुः ।

१३. संभोगो अग्निना क.

१४. तत्रैतं नरराष्ट्रम् क.

१५. तथापिधानानि M 3.

१६. RV. VI. 47. 8; cf. AV. 19. 15. 4.

१७. RV. III. 30. 5.

१८. RV. II. 18. 4.

१९. RV. III. 53. 6.

अद्धीन्द्र पिब च प्रस्थितस्य[1] ।
आश्रुत्कर्ण श्रुधी हवम्[2] ॥ ६ ॥

अपुरुषविधाः स्युरित्यपरम् । अपि तु यद् दृश्यते[3]ऽपुरुषविधं तत् । यथाग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति । यथो एतच्चेतनावद्वद्धि स्तुतयो भवन्तीत्यचेतनान्यप्येवं स्तूयन्ते । यथाक्षप्रभृतीन्योषधिपर्यन्तानि । यथो एतत्पौरुषविधिकैरङ्गैः संस्तूयन्त इत्यचेतनेष्वप्येतद्भवति ।

अभि क्रन्दन्ति हरितेभिरासभिः[4] । इति ग्रावस्तुतिः ।

यथो एतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्येतदपि तादृशमेव ।

सुखं रथं युयुजे सिन्धुरश्विनम्[5] । इति नदीस्तुतिः ।

यथो एतत्पौरुषविधिकैः कर्मभिरित्येतदपि तादृशमेव ।

होतुश्चित्पूर्वे हविरद्यमाशत[6] । इति ग्रावस्तुतिरेव ।

अपि वोभयविधाः स्युः । अपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युः । यथा यज्ञो यजमानस्य । एष चाख्यानसमयः ॥ ७ ॥

तिस्र एव देवता इत्युक्तं पुरस्तात् । तासां भक्तिसाहचर्यं[7] व्याख्यास्यामः । अथैतान्यग्निभक्तीनि । अयं लोकः । प्रातः सवनं । वसन्तः । गायत्री । त्रिवृत्स्तोमः । रथंतरं साम । ये च देवगणाः समाम्नाताः प्रथमे स्थाने[8] । अग्नायी पृथिवीळेति स्त्रियः । अथास्य कर्म । वहनं[9] च हविषामावाहनं च देवतानाम् । यच्च [किञ्चिद्][10] दार्ष्टिविषयिकमग्निकर्मैव तत्[11] । अथास्य[12] संस्तविका देवाः । इन्द्रः । सोमः । वरुणः । पर्जन्यः । ऋतवः । आग्नावैष्णवं हविर्न त्वृक्संस्तविकी दशतयीषु विद्यते । अथाप्याग्नापौष्णं हविर्न तु संस्तवः[13] । तत्रैतां विभक्तस्तुतिमृचमुदाहरन्ति[14][15] ॥ ८ ॥

---

१. RV. X. 116. 7.

२. RV. I. 10. 9.

३. यद्दृश्यते M 1. The last section ends after दृश्यते in C 1, C 2, C 6, M 1, M 4, S.

४. RV. X. 94. 2.

५. RV. X. 75. 9.

६. RV. X. 94. 2.

७. Cf. AB. ii. 32. 1; iii. 13. 1; IV. 29. 1; VIII. 12. 4; KB. VIII. 9; XII. 4; XIV. 1; 3, 5; XXII. 1; GB. I. 1. 17, 29; 2. 24; II. 3. 10, 12, 16; BD. i. 115.

८. ०वीलेति C 1, C 2, C 6, M 1, M 4, S.

९. हवनं C 2.

१०. Omitted by BK, C. 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

११. ०कर्मैतत् Roth; cf. BD. i. 119, 120.

१२. यथास्य. Mi.

१३. Cf. BD. i. 117—119.

१४. विभक्ति C 1, C 2, C 6, M 1, M 4.

१५. Cf. BD. iii. 41.

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः॥[1]

पूषा त्वेतः प्रच्यावयतु। विद्वान्। अनष्टपशुः। भुवनस्य गोपा इत्येष हि सर्वेषां भूतानां गोपायिता [आदित्यः][2]। स त्वैतेभ्यः परिददत्[3]पितृभ्य इति सांशयिकस्तृतीयः पादः। पूषा पुरस्तात्तस्यान्वादेश इत्येकम्। अग्निरुपरिष्टात्तस्य प्रकीर्तनेत्यपरम्। अग्निर्देवेभ्यः सुविदत्रियेभ्यः। सुविदत्रं धनं भवति। विन्दतेर्वैकोपसर्गात्। ददातेर्वा[4] स्याद् द्युपसर्गात्॥ ९॥

अथैतानीन्द्रभक्तीनि। अन्तरिक्षलोकः। माध्यंदिनं सवनम्। ग्रीष्मः। त्रिष्टुप्। पञ्चदशस्तोमः। बृहत्साम[5]। ये च देवगणाः समाम्नाता मध्यमे स्थाने[6] याश्च स्त्रियः। अथास्य कर्म रसानुप्रदानं वृत्रवधः। या च का च[7] बलकृतिरिन्द्रकर्मैव[8] तत्। अथास्य संस्तविका देवाः। अग्निः। सोमः। वरुणः। पूषा। बृहस्पतिः। ब्रह्मणस्पतिः। पर्वतः। कुत्सः। विष्णुः। वायुः[9]। अथापि मित्रो वरुणेन संस्तूयते। पूष्णा रुद्रेण च सोमः। वायुना[10] च पूषा। वातेन च पर्जन्यः[11]॥ १०॥

अथैतान्यादित्यभक्तीनि। असौ लोकः। तृतीयसवनम्। वर्षा। जगती। सप्तदशस्तोमः। वैरूपं साम[12]। ये च देवगणाः समाम्नाता उत्तमे स्थाने[13] याश्च स्त्रियः। अथास्य कर्म रसादानं रश्मिभिश्च[14] रसधारणम्[15]। यच्च[16] किंचित्प्रवहितमादित्यकर्मैव तत्। चन्द्रमसा वायुना संवत्सरेणेति संस्तवः[17]। एतेष्वेव स्थानव्यूहेष्वृतुच्छन्दः-

१. RV. X. 17. 3; AV. 18. 2. 54.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, R 7, R 8, W 1, W 2, W 3.

३. परिददात् M 3.

४. दधतिर्वा C 4, C 7, M 3, Mi, W 2, W 3, W 4.

५. Cf. BD. i. 130—131.

६. Cf. AB. ii. 32. 1; iii. 13. 1; IV. 31. 1; VIII. 12. 4; KB. VIII. 9; XIV. 1, 3, 5; XVI. 1; XXII. 2; GB. I. 1. 17, 18, 29; 2. 24; II. 2. 10, 12; II. 4. 4.

७. चित् BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

८. Cf. BD. i. 87; ii. 6.

९. Cf. BD. ii. 2—3.

१०. अग्निना C 1, C 2, C 6, M 1, M 4, S. & Roth. The corresponding passage in BD. reads वायुना I.

११. Cf. BD. ii. 4, 5, 13, 14.

१२. Cf. BD. ii. 13—14.

१३. Cf. AB. II. 32. 1; III. 13. 1; V. 1. 1; VIII. 12. 4; KB. VIII. 9; XIV. 1, 3; XVI. 1; XXII. 3, 5; GB. I. 1. 19, 29; 2. 24; II. 3. 10; 4. 18.

१४. रसाधारणं C 1, C 2, C 6, M 1, M 4; S; Roth.

१५. रश्मिभिश्च रसधारणं is omitted by Durga.

१६. यत्तु C 4, C 5, C 7, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१७. Cf. BD. ii. 15—16.

स्तोमपृष्ठस्य भक्तिशेषमनुकल्पयीत । शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायतनानि[1] । हेमन्तः पङ्क्तिस्त्रिणवस्तोमः शाक्वरं सामेत्यन्तरिक्षायतनानि[2] । शिशिरोऽतिच्छन्दास्त्रयस्त्रिंशस्तोमो रैवतं सामेति द्युभक्तीनि[3] ॥ ११ ॥

मन्त्रा मननात् । छन्दांसि छादनात्[4] । [स्तोमः स्तवनात् ।][5] यजुर्यजतेः[6] । साम सम्मितमृचा । अस्यतेर्वा । ऋचा समं मेन इति नैदानाः । गायत्री गायतेः स्तुतिकर्मणः[7] । त्रिगमना वा विपरीता । गायतो मुखादुदपतत्[8] । इति च ब्राह्मणम्[9] । उष्णिगुत्स्नाता भवति । स्निह्यतेर्वा स्यात्कान्तिकर्मणः । उष्णीषिणी वेत्यौपमिकम् । उष्णीषं स्नायतेः । ककुप् ककुभिनी भवति । ककुप्[10] च कुब्जश्च कुजतेर्वा । उब्जतेर्वा । अनुष्टुबनुष्टोभनात् ।

गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति[11] । इति च ब्राह्मणम् । बृहती परिबर्हणात् । पङ्क्तिः पञ्चपदा[12] । त्रिष्टुप् स्तोभत्युत्तरपदा । का तु त्रिता स्यात् । तीर्णतमं छन्दः । त्रिवृद्वज्रः । तस्य स्तोभनीति वा ।

यत् त्रिरस्तोभत् तत् त्रिष्टुभस्त्रिष्टुप्त्वम् । इति विज्ञायते ॥ १२ ॥

जगती गततमं छन्दः[13] । जलचरगतिर्वा[14] ।

जल्गल्यमानोऽसृजत्[13] । इति च ब्राह्मणम् । विराड्विराजनाद्वा । विराधनाद्वा । विप्रापणाद्वा । विराजनात्संपूर्णाक्षरा । विराधनादूनाक्षरा । विप्रापणादधिकाक्षरा । पिपीलिकमध्येत्यौपमिकम् । पिपीलिका पेलतेर्गतिकर्मणः ।

इतीमा देवता अनुक्रान्ताः । सूक्तभाजः । हविर्भाजः । ऋग्भाजश्च भूयिष्ठाः । काश्चिन्निपातभाजः[15] । अथोताभिधानैः संयुज्य हविश्चोदयति । इन्द्राय वृत्रघ्ने[16] ।

---

१. Cf. AB. V. 4. 1; VIII. 12. 4; KB. XXII. 9; BD. i. 116.

२. Cf. AB. V. 6. 1; VIII. 12. 8; KB. XXIII. 3; BD. i. 130—131; SRV. p. i. 2.

३. Cf. AB. V. 12. 1; VIII. 12. 4; BD. ii. 13—14.

४. Cf. Chhā. up. I. 4. 2. यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वम् ।

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3; and Durga.

६. Quoted by SRV. p. i. 2.

७. Devtādhyāya Br. III. 2.

८. Devtādhyāya Br. III. 3.

९. The passage: त्रिगमना…ब्राह्मणम् is omitted by Durga.

१०. ककुब्कुज° M 3; ककुप् च कुजते Durga who places कुब्जश्च after उब्जतेर्वा ।

११. Daivata Brāhmaṇa III.

१२. Cf. AB. V. 19. 6; KB. 1. 3, 4; XI. 2; XII. 2; XIX. 4, 7; GB. I. 3. 8, 10; 4. 24.

१३. Cf. Daivata Brahmaṇa III.

१४. जलचलगतिः Mi, W 1, W 2; Roth attributes the variant चलाचलगतिः to the shorter recension.

१५. Cf. BD. i. 17; VIII. 129.

१६. MS. II. 2. 11.

[इन्द्राय वृत्रतुरे।][1] इन्द्रायँहोमुचे[2] इति। तान्यप्येके समामनन्ति। भूयांसि तु समाम्नानात्[3]। यत्तु संविज्ञानभूतं स्यात्प्राधान्यस्तुति तत्समामने। अथोत कर्मभिर्ऋषिर्देवताः स्तौति। वृत्रहा। पुरन्दरः। इति। तान्यप्येके समामनन्ति। भूयांसि तु समाम्नानात्। व्यञ्जनमात्रं तु तत् तस्याभिधानस्य भवति। यथा ब्राह्मणाय बुभुक्षितायौदनं देहि। स्नातायानुलेपनम्। पिपासते पानीयमिति ॥ १३ ॥

अथातोऽनुक्रमिष्यामः। अग्निः पृथिवीस्थानः। तं प्रथमं व्याख्यास्यामः। अग्निः कस्मात्। अग्रणीर्भवति[4]। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीविः। न क्नोपयति न स्नेहयति। त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः। इतात्। अक्ताद्दग्धाद्वा। नीतात्। स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परः। तस्यैषा भवति[5] ॥ १४ ॥

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्[6] ॥

अग्निमीळेऽग्निं याचामि। ईळिरध्येषणाकर्मा। पूजाकर्मा वा। पुरोहितो[7] व्याख्यातो यज्ञश्च[8]। देवो दानाद्वा। दीपनाद्वा। द्योतनाद्वा। द्युस्थानो भवतीति[9] वा। यो देवः सा देवता[10]। होतारं ह्वातारम्। जुहोतेर्होतेत्यौर्णवाभः[11]। रत्नधातमं रमणीयानां धनानां दातृतमम्[12]।

तस्यैषापरा भवति ॥ १५ ॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति[13] ॥

---

१. Omitted by Bk, C 4, C 5, C 7, Kn, M 3, Mi. R 7, R 8, W 1, W 2, W 3.

२. MS. II. 2. 10.

३. Cf. BD. ii. 71.

४. Cf. BD. ii. 24; Cf. S'aṅkara on Vedāntasūtra i. 2. 7. 28: अग्निशब्दोऽप्यग्रणीत्वादियोगाश्रयेण परमात्मविषय एव भविष्यति।
Cf. S'B. II. 2. 4. 2.
तद्वाऽएनमेतदग्रे देवानामजनयत। तस्मादग्निरग्रिर्ह वै नामैतद्यदग्निरिति।
Cf. also S'B. VI. 1. 1. 11.
स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निरग्रिर्ह वै तमग्निरित्याचक्षते परोक्षम्।
Cf. also RV. VI. 16. 48.
अग्निं देवासो अग्रियम्।

५. Cf. BD. i. 91.

६. Cf. SRV. I. i. 1. p. i. 24.

७. RV. I. 1. 1.

८. N. 2. 12.

९. Cf. N. 3. 19. यज्ञस्य Mi, M 3. Cf. SRV. I. 1. 1. p. i. 24.

१०. यो देवः सा देवता is omitted by Durga.

११. Quoted by SRV. I. 127. 1. p. i. 573.

१२. Quoted by SRV. I. 1. 1. p. i. 24.

१३. RV. I. 1. 2.

अग्निर्यः पूर्वैर्ऋषिभिरीळितव्यो [वन्दितव्यो] ऽस्माभिश्च नवतरैः स देवानिहावहत्विति। स न मन्येतायमेवाग्निरिति। अप्येते उत्तरे ज्योतिषी अग्नी उच्येते।

ततो नु मध्यमः ॥ १६ ॥

अभि प्रवन्त समनेव योषाः कल्याण्य१ः स्मयमानासो अग्निम्।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥२

अभिनमन्त समनस इव योषाः। समनं समननाद्वा। संमाननाद्वा। कल्याण्यः। स्मयमानासः। अग्निमित्यौपमिकम्। घृतस्य धारा उदकस्य धाराः समिधो नसन्त। नसतिराप्नोतिकर्मा वा। नमतिकर्मा वा। ता जुषाणो हर्यति जातवेदाः। हर्यतिः प्रेप्साकर्मा३। विहर्यतीति४।

समुद्रादूर्मिर्मधुमाँ उदारत्५। इत्यादित्यमुक्तं मन्यन्ते।

समुद्राद्ध्येषोऽद्भ्य उदेति६। इति च ब्राह्मणम्।

अथापि ब्राह्मणं भवति।

अग्निः सर्वा देवताः७। इति। तस्योत्तरा भूयसे निर्वचनाय ॥ १७ ॥

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥८

इममेवाग्निं महान्तं [च९] आत्मानं बहुधा मेधाविनो वदन्ति। इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम्। दिव्यो दिविजः। गरुत्मान् गरणवान्। गुर्वात्मा। महात्मेति वा१०।

---

१. Omitted by Bk, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

२. RV. IV. 58. 8; VS. 17. 96.

३. ०कर्माभिहर्यतीति C 4, W 1; ०कर्माभिहर्यतीभिः Mi; कर्माविहर्यतीति C 5, M 3, W 2, W 3. Cf. SRV. I. 57. 2. p. i. 285; I. 62. 2. p. i. 311.

४. विहर्यतीति is omitted by Durga.

५. RV. IV. 58. 1; VS. 17. 89; cf. AB. i. 22; समुद्रादूर्मिमुदियर्ति वेनः।

६. KB. XXV. 1.

७. AB. II. 3. Taitt. B. I. 4. 4. 10. Cf. AB. I. 1. 4; Tāṇḍ. B. II. 1. 12; GB. II. 1. 12; Ṣaḍ. B. III. 7; S'B. I. 6. 2. 8; MS. I. 4. 14. वै is added after अग्निः in all these passages.

८. RV. I. 164. 46; AV. 9. 10. 28.

९. Omitted by C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S; cf. SRV. I. 164. 46. p. i. 718; महान्तमात्मानम्।

१०. गुरुर्वात्मा C 1. गुर्वात्मा महात्मेति वा is omitted by Durga.

११. Cf. SRV. loc. cit.

यस्तु सूक्तं भजते यस्मै हविर्निरुप्यतेऽयमेव सोऽग्निः ।[1] निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते[2] ॥ १८ ॥

जातवेदाः कस्मात् । जातानि वेद[3] । जातानि वैनं विदुः । जाते जाते विद्यत[4] इति वा । जातवित्तो वा । जातधनः । जातविद्यो वा जातप्रज्ञानः ।

यत्तज्जातः पशूनविन्दत [इति[5]] तज्जातवेदसो जातवेदस्त्वम्[6] । इति ब्राह्मणम् ।

तस्मात्सर्वानृतून्पशवोऽग्निमभिसर्पन्ति[7] । इति च ।

तस्यैषा भवति ॥ १९ ॥

[जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः[8] ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः[9] ॥

जातवेदस इति जातवेदस्यां वैवं जातवेदसेऽर्चाय सुनवाम सोममिति । प्रसवायाभिषवाय सोमं राजानममृतमरातीयतो यज्ञार्थमिति स्मोः । निदहाति निश्चयेन दहति भस्मीकरोति । सोमो ददित्यर्थः । स नः पर्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नावा सिन्धुं सिन्धुं नावा नदीं जलदुर्गां महाकूलां तारयति । दुरितात्यग्निरिति दुरितानि तारयति । तस्यैषापरा भवति ॥ २ ॥ २५ ॥[10]]

प्र नूनं जातवेदसमश्वं हिनोत वाजिनम् ।
इदं नो बर्हिरासदे[11] ॥

प्रहिणुत जातवेदसं कर्मभिः समश्नुवानम् । अपि वोपमार्थं स्यात् । अश्वमिव जातवेदसमिति । इदं नो बर्हिरासीदत्विति । तदेतदेकमेव[12] जातवेदसं गायत्रं तृचं

---

१. Cf. BD. i. 78: निरुप्यते हविर्यस्मै सूक्तं च भजते च या ।

२. Cf. BD. i. 67:

इहाग्निभूतस्त्वृषिभिर्लोके स्तुतिभिरीळितः । जातवेदास्तुतो मध्ये स्तुतो वैश्वानरो दिवि ॥

३. Cf. BD. ii. 30: भूतानि वेद etc. AB. II. 39. प्राणो वै जातवेदाः स हि जातानां वेद ।

४. Cf. BD. i. 92: यद्विद्यते हि जातः etc. Cf. also ii. 31.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

६. MS. I. 8. 2. Cf. AB. III. 36. S'B. IX. 5. 1. 68:

तद्यजातं जातं विन्दते तस्माजातवेदाः ।

७. MS. I. 8. 2.

८. Cf. SRV. I. 44. 1. p. i. 223; I. 127. 1. p. i. 573.

९. RV. I. 99. 1.

१०. The section within brackets is omitted by C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S; and Durga. Cf. N. 14. 33.

११. RV. X. 188. 1; cf. BD. VIII. 88.

१२. ०मिव C 4, C 5, C 7, M 3, Mi, W 1, W 3; तदेकमिव R 2; तदेकमेव Roth.

दशतयीषु[1] विद्यते । यत्तु किञ्चिदाग्नेयं तज्जातवेदसानां स्थाने युज्यते । स न मन्ये-तायमेवाग्निरिति । अप्येते उत्तरे ज्योतिषी जातवेदसी[2] उच्येते[3] । ततो नु मध्यमः ।

अभि प्रवन्त समनेव योषाः[4] । इति तत्पुरस्ताद् व्याख्यातम्[5] ।

अथासावादित्यः ।

उदु त्यं जातवेदसम्[6] । इति । तदुपरिष्टाद् व्याख्यास्यामः[7] ।

यस्तु सूक्तं भजते यस्मै हविर्निरुप्यतेऽयमेव सोऽग्निर्जातवेदाः । निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते[8] ॥ २० ॥

वैश्वानरः कस्मात् । विश्वान्नरान्नयति । विश्व एनं नरा नयन्तीति वा[9] । अपि वा विश्वानर एव स्यात्[10] । प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः[11] ।

तस्यैषा भवति ॥ २१ ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः[12] ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण[13] ॥

इतो जातः सर्वमिदमभिविपश्यति । वैश्वानरः संयतते सूर्येण । राजा यः सर्वेषां भूतानामभिश्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति ।

तत्को वैश्वानरः । मध्यम इत्याचार्याः[14] । वर्षकर्मणा ह्येनं स्तौति ॥ २२ ॥

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत्[15] ॥

---

१. RV. X. 188.

२. जातवेदसा C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

३. Cf. BD. i. 90, 97.

४. RV. IV. 58. 8.

५. N. 7. 17.

६. RV. I. 50. 1; AV. 13. 2. 16; 20. 47. 13; SV. 1. 31; VS. 7. 41; 8. 41.

७. N. 12. 15.

८. Cf. BD. i. 67.

९. Cf. BD. ii. 66.

१०. Cf. S'aṅkara on Vedāntasūtra I. 2. 28.

विश्वश्चायं नरश्चेति । विश्वेषां वायं नरः । विश्वे वा नरा अस्येति विश्वानरः परमात्मा सर्वात्मत्वात् विश्वानर एव वैश्वानरः । तद्धितो ऽनन्यार्थः । राक्षसवायसादिवत् ।

११. Cf. SRV. I. 60. 6; III. 2. 1; VII. 5. 4. pp. i. 293; ii. 133; iii. 16.

१२. भूवना० Roth.

१३. RV. I. 98. 1; VS. 26. 7.

१४. Cf. BD. i. 67: स्तुतो वैश्वानरो दिवि ।

१५. RV. I. 59. 6.

प्रब्रवीमि तत् । महत्वं[1] माहाभाग्यम् । वृषभस्य वर्षितुरपाम् । यं पूरवः पूरयितव्या मनुष्याः । वृत्रहणं मेघहनम् । सचन्ते सेवन्ते वर्षकामाः[2] । दस्युर्दस्यतेः । क्षयार्थात् । उपदस्यन्त्यस्मिन्रसाः । उपदासयति कर्माणि । तमग्निर्वैश्वानरो घ्नन्[3] । अवाधूनोदपः काष्ठा अभिनत् । शम्बरं मेघम् ।

अथासावादित्य इति पूर्वे याज्ञिकाः[4] । एषां लोकानां रोहेण सवनानां रोह आम्नातः । रोहात्प्रत्यवरोहश्चिकीर्षितः । तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन[6] प्रतिपद्यते । सोऽपि न स्तोत्रियमाद्रियेत । आग्नेयो हि भवति । तत आगच्छति मध्यमस्थाना देवता । रुद्रं च मरुतश्च । ततोऽग्निमिहस्थानमत्रैव स्तोत्रियं शंसति ।

अथापि वैश्वानरीयो द्वादशकपालो भवति[9] । एतस्य हि द्वादशविधं कर्म ।

अथापि ब्राह्मणं भवति ।

असौ वा आदित्योऽग्निर्वैश्वानरः[10] । इति ।

अथापि निवित्सौर्यवैश्वानरी भवति ।

आ यो द्यां भात्या पृथिवीम्[11] । इति । एष हि द्यावापृथिव्यावाभासयति ।

अथापि छान्दोमिकं[12] सूक्तं[13] सौर्यवैश्वानरं भवति ।

दिवि पृष्टो अरोचत[13] । इति । एष हि दिवि पृष्टो अरोचतेति ।

अथापि हविष्पान्तीयं सूक्तं[14] सौर्यवैश्वानरं भवति[15] ।

अयमेवाग्निर्वैश्वानर इति शाकपूणिः[16] । विश्वानरावित्येते[17] उत्तरे ज्योतिषी । वैश्वानरोऽयं यत् ताभ्यां जायते । कथं त्वयमेताभ्यां जायत इति[19] ।

---

१. महित्वम् C 1, C 2. Cf. SRV. I. 60. 6. p. i. 293.

२. Quoted by SRV. III. 13. 2. p. ii. 171.

३. जघन्वान् Durga.

४. Quoted by SRV. I. 60. 6. p. i. 293.

५. Cf. BD. i. 67. S'B. IX. 3. 1. 25. स यः स वैश्वानरः असौ स आदित्यः ।

६. RV. VI. 8—9.

७. Cf. BD. i. 102: रोहात् प्रत्यवरोहेण etc. Cf. AB. XII. 3. स वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत ।

८. Cf. BD. i. 103.

९. Cf. AB. VII. 9. 1; KB. IV. 3; cf. BD. ii. 16--17. S'B. VI. 6. 1. 5: वैश्वानरो द्वादशकपालः ।

१०. MS. II. 1. 2. Cf. KB. IV. 3; XIX. 2: असौ वै वैश्वानरो योऽसौ तपति ।

११. S'S'. 8. 22. 1.

१२. छन्दोमिकं M 3.

१३. VS. 33. 92.

१४. RV. X. 88.

१५. Cf. BD. ii. 16—17.

१६. Cf. GB. I. 2. 20.

१७. विश्वानरावेते उत्तरे C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१८. Cf. BD. i. 101.

१९. त्वयम् BK, C 4, C 5, C 7, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

यत्र वैद्युतः शरणमभिहन्ति यावदनुपात्तो[1] भवति मध्यमधर्मैव तावद् भवत्युदकेन्धनः[2] शरीरोपशमनः । उपादीयमान एवायं सम्पद्यत उदकोपशमनः शरीरदीप्तिः ।

अथादित्यात् । उदीचि प्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयमसंस्पर्शयन् धारयति तत्प्रदीप्यते । सोऽयमेव सम्पद्यते ।

अथाप्याह ।

वैश्वानरो यतते सूर्येण[3] । इति । न च पुनरात्मनात्मा[4] संयतते ।

अन्येनैवान्यः संयतते । इत इममादधात्यमुतोऽमुष्य रश्मयः प्रादुर्भवन्ति । इतोऽस्यार्चिषस्तयोर्भासोः संसङ्गं दृष्ट्वैवमवक्ष्यत्[5] ।

अथ यान्येतान्यौत्तमिकानि सूक्तानि भागानि वा सावित्राणि वा [सौर्याणि वा][6] पौष्णानि वा वैष्णवानि वा [वैश्वदेव्यानि वा][7] तेषु वैश्वानरीया प्रवादा अभविष्यन् । आदित्यकर्मणा चैनमस्तोष्यन्निति । उदेषीति अस्थमेषीति । विपर्येषीति । आग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादा भवन्ति । अग्निकर्मणा चैनं स्तौतीति[8] । वहसीति । पचसीति । दहसीति ।

यथो एतद्वर्षकर्मणा ह्येनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते ।

समानमेतदुदकमुच्चैत्यव चाहभिः ।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः[9] ॥

इति सा निगदव्याख्याता ॥ २३ ॥

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद् घृतेन पृथिवी व्युद्यते[10] ॥

---

१. ०नुपात्तो C 4, C 5, C 7, M 3, Mi, R 7, R 9, W 1, W 2, W 3.

२. ०उदकेन्धनु C 7, M 3, Mi.

३. RV. I. 98. 1; VS. 26. 7. See N. 7. 22.

४. ०रात्मानमात्मा C 1, C 2, C 6, M 1, M 4.

५. Quoted by SRV. I. 98. 1. p. i. 437; cf. also IV. 5. 7. p. ii. 366.

६. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3, and Durga.

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

८. दहसीति is added after स्तौतीति by M 3.

९. RV. I. 164. 51.

१०. RV. I. 164. 47; AV. 6. 22. 1.

कृष्णं निरयणं रात्रिः । आदित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयः । ते यदामुतोऽर्वाञ्चः पर्यावर्तन्ते[2] । सहस्थानादुदकस्यादित्यात् । अथ घृतेनोदकेन पृथिवी व्युद्यते । घृतमित्युदकनाम । जिघर्तेः सिञ्चतिकर्मणः ।

अथापि ब्राह्मणं भवति ।

अग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि[3] [खलु वै][4] भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति ।[1] यदा [खलु वै][4] असावादित्योऽर्भि[5] रश्मिभिः पर्यावर्ततेऽथ वर्षति[6] । इति ।

यथो एतद्रोहात् प्रत्यवरोहश्चिकीर्षित इत्याम्नायवचनादेतद् भवति ।

यथो एतद्वैश्वानरीयो द्वादशकपालो भवतीत्यनिर्वचनं कपालानि[7] भवन्ति[8] । अस्ति हि सौर्य एककपालः पञ्चकपालश्च ।

यथो एतद् ब्राह्मणं भवतीति बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति । पृथिवी वैश्वानरः[9] । संवत्सरो वैश्वानरः[10] । ब्राह्मणो वैश्वानरः[11] । इति ।

यथो एतन्निवित्सौर्यवैश्वानरी भवतीत्यस्यैव सा भवति ।

यो विड्भ्यो मानुषीभ्यो दीदेत्[12] । इत्येष हि विड्भ्यो मानुषीभ्यो दीप्यते[13] ।

यथो एतच्छान्दोमिकं[14] सूक्तं[15] सौर्यवैश्वानरं भवतीत्यस्यैव तद्भवति ।

---

१. Quoted by SRV. I. 164. 47. p. i. 718.

२. Cf. BD. ii. 8—9.

३. धामछदिव C 1, C 2, C 6, M 1, M 4, S.

४. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

५. न्यङ् C 1, C 2, C 6, M 1, M 4, S; Roth.

६. Cf. KS. XI. 10. अग्निर्वा इतो वृष्टिमुदीरयति धामच्छदिव भूत्वा वर्षति मरुतस्सृष्टां वृष्टिं नयन्ति ॥ यदासा आदित्योऽर्वाङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति । Schroeder's edition vol. i. p. 157.

Cf. TS. II. 4. 10. अग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षति । Anandās'rama ed. pp. 1722–3. Cf. MS. II. 4. 8: अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्ति तां सूर्यो रश्मिभिर्वर्षति । This last quotation is cited by PMbh. vol. i. p. 256.

७. करालानि M 3.

८. भवति M 1. The passage अनिर्वचनं कपालानि भवन्ति is omitted by Durga.

९. Cf. S'B. XIII. 3. 8. 3.
इयं (पृथिवी) वै वैश्वानरः ।

१०. S'B. V. 2. 5. 15; VI. 6. 1. 5.
संवत्सरो वैश्वानरः ।

११. Cf. Taitt. Br. III. 7. 3. 2.
एष वा अग्निर्वैश्वानरः यद्ब्राह्मणः ।

१२. S'S'. 8. 22. 1. Cf. KB. V. 8.

१३. दीदयति C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१४. ०छन्दोमिकं M 3.

१५. VS. 33. 92.

जमदग्निभिराहुतः । इति । जमदग्नयः प्रजमितानयो वा । प्रज्वलिताग्नयो वा । तैरभिहुतो[2] भवति ।

यथो एतद्धविष्पान्तीयं सूक्तं[3] सौर्यवैश्वानरं भवतीत्यस्यैव तद्भवति ॥ २४ ॥

हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधयापप्रथन्त ॥

हविर्यत्पानीयम् । अजरम् । सूर्यविदि । दिविस्पृशि । अभिहुतं[4] जुष्टमग्नौ । तस्य भरणाय च भावनाय च धारणाय च । एतेभ्यः सर्वेभ्यः[5] कर्मभ्यो देवा इममग्निमन्नेनापप्रथन्त[6] । अथाप्याह ॥ २५ ॥

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥

अपामुपस्थ उपस्थाने महत्यन्तरिक्षलोक आसीना महान्त इति वागृह्णत माध्यमिका देवगणाः । विश इव राजानमुपतस्थुः । ऋग्मियमृग्मन्तमिति वा । अर्चनीयमिति वा [पूजनीयमिति वा ।][8] अहरद्यं दूतो देवानां विवस्वत आदित्यात् । विवस्वान्विवासनवान् । प्रेरितवतः परागताद्वा [अपि वा][8] अस्याग्नेर्वैश्वानरस्य मातरिश्वानमाहर्तारमाह । मातरिश्वा वायुः[9] । मातर्यन्तरिक्षे श्वसिति । मातर्याश्वनितीति वा ।

अथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति ॥ २६ ॥

मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायाम् तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥[11]

---

१. Ās'v. S'raut. VIII. 9.

२. तैराहुतो C 4, Mi, W 1, W 2; तैराहूतो C 5, M 3, W 3.

३. RV. X. 88. 1.

४. आहुतं C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. कर्मेभ्यः Mi. सर्वेभ्यः is however added on the margin at bottom, obviously a different and probably some later scribe.

६. ०प्रथन्तेति C 4, C 5, M 3, Mi, W 1, W 2, W 3.

Cf. SRV. X. 88. 1. p. IV. 278.

७. RV. VI. 8. 4.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

९. Cf. AB. II. 38: प्राणो मातरिश्वा ।
Cf. also S'B. VI. 4. 3. 4:
अयं वै वायुर्मातरिश्वा योऽयं पवते ।

१०. Quoted SRV. III. 6. 9. p. ii. 145.

११. RV. X. 88. 6.

मूर्धा[1] मूर्तमस्मिन्धीयते। मूर्धा[2] यः सर्वेषां भूतानां भवति नक्तमग्निः। ततः सूर्यो जायते प्रातरुद्यन्त्स एव। प्रज्ञां त्वेतां मन्यन्ते यज्ञियानां देवानां यज्ञसंपादिनाम्। अपो यत्कर्म चरति प्रजानन्त्सर्वाणि स्थानान्यनुसंचरति[3] त्वरमाणः[4]।

तस्योत्तरा भूयसे निर्वचनाय ॥ २७ ॥

स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम्।
तमू अकृण्वंस्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः[5] ॥

स्तोमेन हि [6] यं दिवि देवा[7] अग्निमजनयन्[8] [शक्तिभिः[9]] कर्मभिर्द्यावापृथिव्योः [आ] पूरणम्। तमकुर्वंस्त्रेधाभावाय। पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः।

यदस्य दिवि तृतीयं तदसावादित्यः[10]। इति [हि[11]] ब्राह्मणम्। तदग्नीकृत्य स्तौति।

अथैनमेतयादित्यीकृत्य स्तौति ॥ २८ ॥

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम्।
यदा चरिष्णू[12] मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा[13] ॥

यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यम् [आदितेयम्[14]] अदितेः पुत्रम्। यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्वदा सहचारिणौ। उषाश्चादित्यश्च। मिथुनौ कस्मात्। मिनोतिः श्रयतिकर्मा। थु इति नामकरणः। थकारो वा। नयतिः परः। वनिर्वा। समाश्रितावन्योन्यं नयतः। वनुतो वा। मनुष्यमिथुनावप्येतस्मादेव। मेथन्तावन्योन्यं वनुत इति वा[15]।

अथैनमेतयाग्नीकृत्य स्तौति ॥ २९ ॥

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद।
आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत्[16] ॥

---

१. मूर्धा M 4.

२. Quoted by SRV. I. 59. 2. p. i. 291.

३. ०संचरते C 4, C 5, C 7, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

४. Quoted by SRV. X. 88. 6. p. IV. 279.

५. RV. X. 88. 10.

६. यं हि C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

७. देवासो C 1, C 2, C 6, M 1, M 4, S. Cf. SRV. X. 88. 10. p. IV. 280.

८. ०अजनयत् Mi.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१०. The quotation is untraced.

११. Cf. SRV. loc. cit.

१२. चरिष्णु M 3.

१३. RV. X. 88. 11.

१४. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१५. Quoted by SRV. X. 88. II. p. IV. 281.

१६. RV. X. 88. 17.

यत्र विवदेते दैव्यौ होतारौ । अयं चाग्निरसौ च मध्यमः । कतरो नौ यज्ञे भूयो वेद । इत्याशक्नुवन्ति । तत्सहमदनं[1] समानाख्याना ऋत्विजस्तेषां यज्ञं समश्नुवानानां[2] को न इदं विवक्ष्यतीति[3] ।

तस्योत्तरा भूयसे निर्वचनाय ॥ ३० ॥

यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो वसते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो नि षीदन्[4] ॥

यावन्मात्रमुषसः प्रत्यक्तं भवति प्रतिदर्शनमिति वा । अस्त्युपमानस्य संप्रत्यर्थे[5] प्रयोगः । इहेव निधेहीति यथा । सुपर्ण्यः सुपतनाः । एता रात्रयो वसते मातरिश्वञ्ज्योतिर्वर्णस्य । तावदुपदधाति यज्ञमागच्छन् ब्राह्मणो होतास्याग्नेर्होतुरवरो निषीदन् ।

होतृजपस्त्वनग्निर्वैश्वानरीयो भवति[6] । देव सवितरेतं त्वा वृणतेऽग्निं होत्राय सह पित्रा वैश्वानरेण[7] । इति । इममेवाग्निं सवितारमाह । सर्वस्य प्रसवितारम् । मध्यमं वा । उत्तमं वा पितरम् ।

यस्तु सूक्तं भजते यस्मै[8] हविर्निरुप्यतेऽयमेव सोऽग्निर्वैश्वानरः[9] । निपातमेवैते[10] उत्तरे ज्योतिषी एतेन नामधेयेन भजेते भजेते[11] ॥ ३१ ॥

इति सप्तमोऽध्यायः ।

---

१. ॰मदवनं M 3.

२. समाश्नु॰ C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

३. Quoted by SRV. X. 88. 17. p. IV. 282.

४. RV. X. 88. 19.

५. Cf. SRV. I. 57. 3; 88. 6; VI. 4. 3; pp. i. 285, 394; ii. 697.

६. ॰त्वमग्नि॰ C 4, C 5, M 3, Mi, W 1.

७. The whole passage: यावन्मात्रमुषसः ......भवति is quoted by SRV. X. 88. 19. p. IV. 283.

८. This is the quotation of recitation ĀS'. 1. 3. 23; S'S'. 1. 6. 2.

९. यस्तु M 3.

१०. Cf. BD. i. 67.

११. MSS. of both the recensions repeat भजेते but not Roth.

[[1]अथातो दैवत[2]मिन्द्रो दिवः [3]परोक्षकृतास्त[4]द्येना [5]तिस्र एव देवता[6]थाकारचिन्तन-
[7]म्पुरुषविधा[8]स्तिस्र एव देवता इत्युक्तं [9]पूषात्वेतो[10]ऽथैतानीन्द्रभक्तीन्य[11]थैतान्यादित्य-
भक्तीनि [12]मन्त्रा मनना[13]ज्जगती गततम[14]मथातोऽनुक्रमिष्यामो[15]ऽग्निमीळे[16]ऽग्निः पूर्वेभि-
[17]रभि प्रवन्ते[18]न्द्रं मित्रं [19]जातवेदाः कस्मा[20]त्प्रनूनं वै जातवेदसं [21]वैश्वानरः कस्मा[22]द्वैश्वानरस्य
[23]प्रनू महित्वं [24]कृष्णं नियानं [25]हविष्पान्तमपा[26]मुपस्थे [27]मूर्धा भुवः स्तोमे[28]न यदे[29]देनं य[30]त्रावदेते
[31]यावन्मात्रमेकत्रिंशत् ।]

॥ इत्युत्तरषट्के प्रथमोऽध्यायः ॥

॥ इति निरुक्ते सप्तमोऽध्यायः ॥

Small figure on this page represents the corresponding section of the seventh chapter of the *Nirukta*.

अथाष्टमोऽध्यायः।

द्रविणोदाः कस्मात्। धनं द्रविणमुच्यते। यदेनमभिद्रवन्ति[1]। बलं वा द्रविणम्। यदेनेनाभिद्रवन्ति। तस्य दाता द्रविणोदाः[2]।

तस्यैषा भवति[3] ॥ १ ॥

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे।
यज्ञेषु देवमीळते[4] ॥

द्रविणोदा यस्त्वम्[5]। द्रविणस इति द्रविणसादिन इति वा। द्रविणसानिन इति वा। द्रविणसस्तस्मात्पिबतीति[6] वा। यज्ञेषु देवमीळते। याचन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति[7] वा।

तत्को द्रविणोदाः। इन्द्र इति क्रौष्टुकिः। स बलधनयोर्दातृतमः[8]। तस्य च सर्वा बलकृतिः।

ओजसो जातमुत मन्य एनम्[9]। इति चाह।

अथाप्यग्निं द्राविणोदसमाह। एष पुनरेतस्माज्जायते।

यो अश्मनोरन्तरग्निं जजान[10]। इत्यपि निगमो भवति।

अथाप्यृतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति[11]। तेषां पुनः पात्रस्येन्द्रपानमिति भवति।

अथाप्येनं सोमपानेन स्तौति। अथाप्याह।

द्रविणोदाः पिबतु द्राविणोदसः[12]। इति।

---

१. यदेनदभि० C 1, C 2, C 3, M 1, M 4, W 2, W 3; द is crossed and म added on the margin in C 5; द added on the margin is corrected to म in W 1.

२. Cf. BD. ii. 25. Cf. S'B. VI. 3. 3. 13. द्रविणोदा इति द्रविणᳪ ह्येभ्यो ददाति।

३. Quoted by SRV. I. 15. 7. p. i. 94.

४. RV. I. 15. 7.

५. यस्तम् C 1, C 6.

६. पिबतीति C 6.

७. पूजयतीति C 7.

८. Cf. BD. iii. 61.

९. RV. X. 73. 10.

१०. RV. II. 12. 3; AV. 20. 34. 3.

११. Quoted by SRV. I. 15. 7. p. i. 95.

१२. RV. II. 37. 4.

अयमेवाग्निर्द्रविणोदा[1] इति शाकपूणिः । आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति[2] ।

देवा अग्निं धारयन्द्रविणोदाम्[3] । इत्यपि निगमो भवति ।

यथो एतत्स बलधनयोर्दातृतम इति सर्वासु देवतास्वैश्वर्यं विद्यते[4] ।

यथो एतदोजसो जातमुत मन्य एनमिति चाहेति । अयमप्यग्निरोजसा बलेन मथ्यमानो जायते । तस्मादेनमाह सहसस्पुत्रं सहसः सूनुं सहसो यहुम्[5] ।

यथो एतदग्निं द्राविणोदसमाहेति । ऋत्विजोऽत्र द्रविणोदस उच्यन्ते । हविषो दातारस्ते चैनं जनयन्ति[6] ।

ऋषीणां पुत्रो अधिराज एषः[7] । इत्यपि निगमो भवति ।

यथो एतत्तेषां पुनः पात्रस्थेन्द्रपानमिति भवतीति भक्तिमात्रं तद्भवति । [8]यथा वायव्यानीति सर्वेषां सोमपात्राणाम् ।

यथो एतत्सोमपानेनैनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते ।

सोमं पिब मन्दसानो गणश्रिभिः[9] । इत्यपि निगमो भवति ।

यथो एतद् द्रविणोदाः पिबतु द्राविणोदस इत्यस्यैव तद्भवति ॥ २ ॥

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः[10] ॥

मेद्यन्तु ते । वह्नयो वोळ्हारः[11] । यैर्यासि । अरिष्यन् । दृढीभव । आयूय धृष्णो अभिगूर्य त्वं नेष्ट्रीयात् । धिष्ण्यात्[12] । धिष्णो धिष्ण्यो धिषणाभवः । धिषणा [वाक्[13]] धिषेर्दधात्यर्थे । धीसादिनीति वा धीसानिनीति वा । वनस्पत इत्येनमाह । एष हि वनानां पाता वा पालयिता वा[14] । वनं वनोतेः । पिब । ऋतुभिः[15] कालैः ॥ ३ ॥

---

१. द्रविद्रोदा M 3.
२. Cf. BD. iii. 65.
३. RV. I. 96. 1–7.
४. Cf. BD. iii. 62.
५. Cf. BD. iii. 64.
६. Quoted by SRV. II. 37. 4. p. ii. 113.
७. AV. 4. 39. 9; VS. 5. 4.
८. Cf. BD. iii. 63–64.
९. RV. V. 60. 8.
१०. RV. II. 37. 3.
११. वोढारः C 1, C 3, M 4, S.
१२. धिष्ण्यो धिषण्यो Roth.
१३. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.
१४. Cf. BD. iii. 26.
१५. पिपर्तुभिः C 2, M 1, M 3, M 4, W 2.

अथात आप्रियः । आप्रियः कस्मात् । आप्नोतेः[1] । प्रीणातेर्वा ।
आप्रीभिराप्रीणाति । इति च ब्राह्मणम्[2] ।
तासामिध्मः प्रथमागामी भवति । इध्मः समिन्धनात्[3] ।
तस्यैषा भवति ॥ ४ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः[4] ॥

समिद्धोऽद्य मनुष्यस्य मनुष्यस्य गृहे देवो देवान्यजसि जातवेदः। आ च वह मित्रमहः। चिकित्वांश्चेतनवान् । त्वं दूतः कविरसि । [प्रचेताः] प्रवृद्धचेताः । यज्ञेध्म इति कात्थक्यः । अग्निरिति शाकपूणिः ।

तनूनपात् [आज्यमिति कात्थक्यः ।][5] नपादित्यननन्तरायाः प्रजाया नामधेयम्[6] । निर्णततमा भवति । गौरत्र तनूरुच्यते[8] । तता अस्यां भोगाः । तस्याः पयो जायते । पयस आज्यं जायते । अग्निरिति शाकपूणिः । आपोऽत्र तन्व उच्यन्ते । तता अन्तरिक्षे । ताभ्य ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतिभ्य एष जायते । तस्यैषा भवति ॥ ५ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा[9] च कृणुह्यध्वरं नः[10] ॥

तनूनपात्पथ ऋतस्य यानान्यज्ञस्य यानान् । मधुना समञ्जन्त्स्वदय कल्याणजिह्व । मननानि च नो धीभिर्यज्ञं च समर्धय । देवान्नो यज्ञं गमय ।

नराशंसो यज्ञ इति कात्थक्यः[11] । नरा अस्मिन्नासीनाः शंसन्ति । अग्निरिति शाकपूणिः । नरैः प्रशस्यो भवति[12] । तस्यैषा भवति ॥ ६ ॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या[13] ॥

---

१. Cf. Taitt. B. II. 2. 8. 6: आप्रीभिराप्नुवन् ।

२. KB. X. 3; AB. ii. 4. 1.

३. Cf. BD. ii. 158.

४. RV. X. 110. 1; AV. 5. 12. 1; VS. 29. 25.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

६. कार्थक्यः C 7, M 3.

७. Cf. BD. ii. 27.

८. तनुरूच्यते C 7.

९. ०मृधन्देवत्रा C 5, M 3, Mi, W 1, W 2.

१०. RV. X. 110. 2; AV. 5. 12. 2; VS. 29. 26.

११. कात्र्थक्यः C 7, M 3. Cf. AB. II. 24: एष वै यज्ञो नराशंसपङ्क्तिः ।

१२. Cf. BD. ii. 28; iii. 2-3.

१३. RV. VIII. 2. 2; VS. 29. 27.

नराशंसस्य महिमानमेषामुपस्तुमो यज्ञियस्य यज्ञैः। ये सुकर्माणः शुचयो धियं धारयितारः स्वदयन्तु देवा उभयानि हवींषि। सोमं चेतराणि चेति वा। ताम्राणि चावापिकानि चेति वा।

ईळ ईट्टेः स्तुतिकर्मणः। इन्धतेर्वा। तस्यैषा भवति॥ ७॥

आजुह्वान ईळ्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान्॥

आहूयमान ईळितव्यो वन्दितव्यश्च। आयाह्यग्ने वसुभिः सहजोषणः। त्वं देवानामसि यह्व होता। यह्व इति महतो नामधेयम्। यातश्च हूतश्च भवति। स एनान्यक्षीषितो यजीयान्। इषितः प्रेषित इति वाधीष्ट इति वा। यजीयान्यष्टृतरः।

बर्हिः परिबर्हणात्। तस्यैषा भवति॥ ८॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम्॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनाय। अस्याः प्रवृज्यतेऽग्रेऽह्नां बर्हिः पूर्वाह्णे। तद्विप्रथते [वितरं] विकीर्णतरमिति वा विस्तीर्णतरमिति वा। वरीयो वरतरम्। उरुतरं वा। देवेभ्यश्चादितये च स्योनम्। स्योनमिति सुखनाम स्यतेः। अवस्यन्त्येतत्। सेवितव्यं भवतीति वा।

द्वारो जवतेर्वा। द्रवतेर्वा। वारयतेर्वा। तासामेषा भवति॥ ९॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः॥

व्यञ्जनवत्य उरुत्वेन विश्रयन्ताम्। पतिभ्य इव जायाः। ऊरू मैथुने धर्मे शुशोभिषमाणाः। वरतममङ्गमूरू। देव्यो द्वारः। बृहत्यो महत्यः। विश्वमिन्वा विश्वमाभिरेति यज्ञे। गृहद्वार इति कात्थक्यः। अग्निरिति शाकपूणिः।

---

1. Quoted by SRV. VII. 2. 1. p. iii. 8.
2. Cf. BD. iii. 4.
3. RV. X. 110. 3; AV. 5. 12. 3; VS. 29. 28.
4. जातश्च C 7, M 3, W 2; a ज is added just above य in Mi.
5. Cf. BD. iii. 5.
6. RV. X. 110. 4; AV. 5. 12. 4; VS. 29. 29.
7. प्रवृज्यते अग्रे अह्नां W 3.
8. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.
9. Quoted by SRV. VII. 17. 2. p. iii. 35.
10. बृहस्पती M 3.
11. °र्व्हिरश्वमिन्वा W 3.
12. RV. X. 110. 5; AV. 5. 12. 5; VS. 29. 30.
13. वरतरम° C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.
14. कात्थक्यः C 7, M 3.
15. Cf. BD. iii. 6.

उषासानक्ता। उषाश्च नक्ता च। उषा व्याख्याता। नक्तेति रात्रिनाम। अनक्ति भूतान्यवश्यायेन। अपि वा नक्ताव्यक्तवर्णा[3]। तयोरेषा भवति ॥ १० ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने[4] ॥

सेष्मीयमाणे इति वा। सुष्वापयन्त्याविति वा। सीदतामिति वा। न्यासीदतामिति वा। यज्ञिये उपक्रान्ते दिव्ये योषणे। बृहत्यौ महत्यौ। सुरुक्मे सुरोचने। अधिदधाने शुक्रपेशसं श्रियम्। शुक्रं शोचतेर्ज्वलतिकर्मणः। पेश इति रूपनाम। पिंशतेः। विपिशितं भवति।

दैव्या होतारा दैव्यौ होतारौ। अयं चाग्निरसौ च मध्यमः[6]। तयोरेषा भवति ॥११॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता[7] ॥

दैव्यौ होतारौ प्रथमौ सुवाचौ निर्मिमानौ यज्ञं मनुष्यस्य [मनुष्यस्य[8]] यजनाय। प्रचोदयमानौ यज्ञेषु कर्तारौ पूर्वस्यां दिशि यष्टव्यमिति प्रदिशन्तौ।

तिस्रो देवीस्तिस्रो देव्यः। तासामेषा भवति ॥ १२ ॥

आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु[9] ॥

एतु नो यज्ञं भारती क्षिप्रम्। भरत आदित्यस्तस्य भाः[10]। इळा च मनुष्यवदिह चेतयमाना। तिस्रो देव्यो बर्हिरिदं सुखं सरस्वती च सुकर्माण आसीदन्तु।

त्वष्टा तूर्णमश्नुत इति नैरुक्ताः। त्विषेर्वा स्यात्। दीप्तिकर्मणः[11]। त्वक्षतेर्वा[12] स्यात्। करोतिकर्मणः[13]। तस्यैषा भवति ॥ १३ ॥

---

१. Cf. S'B. VI. 7. 2. 3.
अहोरात्रे वै नक्तोषासा।

२. N. 2. 18.

३. Cf. BD. iii. 9.

४. RV. X. 110. 6; AV. 5. 12. 6; 27. 8; VS. 29. 31.

५. Quoted by SRV. I. 49. 2. p. i. 247.

६. Cf. BD. iii. 11.

७. RV. X. 110. 7; AV. 5. 12. 7; VS. 29. 32.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

९. RV. X. 110. 8; AV. 5. 12. 8; VS. 29. 33.

१०. Quoted by SRV. I. 22. 10. p. i. 117.

११. वृद्धिकर्मणः Cf. SRV. I. 142. 11. p. i. 637.

१२. तक्षते C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१३. Quoted by SRV. loc. cit.; cf. BD. iii. 16.

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा[1] ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥

य इमे द्यावापृथिव्यौ जनयित्र्यौ रूपैरकरोद् भूतानि च सर्वाणि । तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यज विद्वान् ।

माध्यमिकस्त्वष्टेत्याहुः । मध्यमे च स्थाने समाम्नातः । अग्निरिति शाकपूणिः[2] । तस्यैषापरा भवति ॥ १४ ॥

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते[3] ॥

आविरावेदनात् । तस्यो वर्धते चारुरासु । चारु चरतेः । जिह्मं जिहीतेः । ऊर्ध्वमुच्छ्रितं भवति[4,5] । स्वयशा आत्मयशा । उपस्थ उपस्थाने । उभे त्वष्टुर्बिभ्यतुर्जायमानात् । [प्रतीची सिंहं प्रति जोषयेते ।][6] द्यावापृथिव्याविति वा । अहोरात्रे इति वा । अरणी इति वा । प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते[7] ॥ १५ ॥

वनस्पतिर्व्याख्यातः[8] । तस्यैषा भवति ॥ १६ ॥

उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन[10] ॥

उपावसृजात्मनात्मानं समञ्जन्देवानामन्नमृतावृतौ हवींषि काले काले । वनस्पतिः शमिता देवो अग्निरित्येते त्रयः स्वदयन्तु हव्यं मधुना च घृतेन च ।

तत्को वनस्पतिः । यूप इति कात्थक्यः[11] । अग्निरिति शाकपूणिः[12] । तस्यैषापरा भवति ॥ १७ ॥

---

१. RV. X. 110. 9; AV. 5. 12. 9; VS. 29. 34.

२. Cf. BD. iii. 15, 25.

३. RV. I. 95. 5.

४. ऊर्ध्वं उच्छ्रितो भवति C 1, C 2, C 6, M 1, M 4, S & Roth; cf. SRV. I. 95. 5. p. i. 429.

५. जिह्मं...भवति is omitted by Durga.

६. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

७. इति वापि चैते प्रत्यक्ते SRV. I. 95. 5. p. i. 429.

८. SRV. loc. cit.

९. N. 8. ३

१०. RV. X. 110. 10; AV. 5. 12. 10; VS. 29. 35.

त्मन्या C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

११. कात्थक्यः C 7, M 3.

१२. Cf. BD. iii. 28. According to BD. IV. 100. the stanza अञ्जन्ति त्वाम् RV. III. 8. 1. is addressed to यूप, the sacrificial post.

अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे[1] ॥

अञ्जन्ति त्वामध्वरे देवान्कामयमाना वनस्पते मधुना दैव्येन च घृतेन च । यदूर्ध्वं स्थास्यसि । द्रविणानि च नो दा[2]स्यसि । यद्वा ते कृतः क्षयो मातुरस्या उपस्थ उप[3]स्थाने ।

अग्निरिति शाकपूणिः । तस्यैषापरा भवति ॥ १८ ॥

देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥

देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण ऋतपर्ण । अपि वोपमार्थे स्यात् । हिरण्यवर्णपर्णेति । प्रदिवस्ते अर्थं पुराणस्ते सोऽर्थो यं ते प्रब्रूमः । यज्ञस्य वह पथिभी रजिष्ठैर्ऋजुतमैः । रजस्वलतमैः । तपिष्ठतमैरिति वा । तस्यैषापरा भवति ॥ १९ ॥

वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् ।
वह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥

वनस्पते रशनया नियूय सुरूपतमया । वयुनानि विद्वान् प्रज्ञानानि प्रजानन् । वह देवान् [यज्ञे] दातुर्हवींषि । प्रब्रूहि च दातारममृतेषु देवेषु ।

स्वाहाकृतयः । स्वाहेत्येतत्सु आहेति वा । स्वा वागाहेति वा । स्वं प्राहेति वा । स्वाहुतं हविर्जुहोतीति वा । तासामेषा भवति ॥ २० ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥

---

१. RV. III. 8. 1.

२. धास्यसि C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

३. Quoted by SRV. III. 8. 1. p. ii. 155.

४. KS. XVIII. 21; MS. 4. 13. 7: 208. 10.

५. वद्दा M 3.

६. KS. XVIII. 21; MS. 4. 13. 7: 209. 1; cf. RV. X. 70. 10. (...नियूया)

७ Omitted by BK, C 4, C 5, Kn, [illegible] R 7, R 8, W 1, W 2, W 3; it is added on the margin by a different probably later scribe in C 7.

८. According to Durga स्वा वागाह is a quotation from some Brāhmaṇa. He remarks: अथवेदमन्यद् ब्राह्मणानुगतं निर्वचनम् ।, adding the quotation: विज्ञायते हि । तं स्वा वागभ्यवदत् । जुहुधीति । तत् स्वाहाकारस्य जन्म । Cf. KS. VI. 1. MS. I. 8. 1.

९. Cf. BD. iii 29.

१०. RV. X. 110. 11; AV. 5. 12. 11; VS. 29. 36.

सद्यो जायमानो निरमिमीत यज्ञम्। अग्निर्देवानामभवत्पुरोगामी। अस्य होतुः प्रदिश्यृतस्य वाच्यास्ये स्वाहाकृतं हविरदन्तु देवाः [इति यजन्ति][1]।

इतीमा आप्रीदेवता अनुक्रान्ताः।

अथ किंदेवताः[2] प्रयाजानुयाजाः। आग्नेया इत्येके ॥ २१ ॥

प्रयाजान्मे अनुयाजाँश्च केवलानूर्जस्वन्तं हविषो दत्त भागम्।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः[3] ॥
तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः।
तवाग्ने यज्ञो३ऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः[4] ॥

आग्नेया वै प्रयाजा आग्नेया अनुयाजाः[5]। इति च ब्राह्मणम्[6]।

छन्दोदेवता[7] इत्यपरम्।

छन्दांसि वै प्रयाजाश्छन्दांस्यनुयाजाः[8]। इति च ब्राह्मणम्।

ऋतुदेवता इत्यपरम्।

ऋतवो वै प्रयाजा ऋतवो[9]ऽनुयाजाः[10]। इति च ब्राह्मणम।

[पशुदेवता इत्यपरम्।

पशवो वै प्रयाजाः पशवोऽनुयाजाः[11]। इति च ब्राह्मणम्।][12]

प्राणदेवता इत्यपरम्।

प्राणा वै प्रयाजाः प्राणा[13] वा अनुयाजाः[14]। इति च ब्राह्मणम्।

आत्मदेवता इत्यपरम्।

---

१. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3; is added on the margin in C 7.

२. Cf. SRV. I. 188. 1. p. i. 782.

३. RV. X. 51. 8.

४. RV. X. 51. 9.

५. The quotation is untraced.

६. आग्नेया...ब्राह्मणम् is omitted by Durga.

७. Durga does not comment on the following passages remarking: अथ नानादेवताः प्रवादा इत्युक्तम्...छन्दोदेवता इत्येवमादि।

८. Cf. S'B. i. 3. 2. 9: छन्दांसि ह्यनुयाजाः।

९. पशवो C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१०. Cf. KB. III. 4. S'B. i. 3. 2. 8; MS. i. 4. 12: ऋतवो वै प्रयाजाः।

११. Cf. KB. III. 4.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१३. अपाना अनुयाजाः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१४. Cf. AB. i. 11. 3; 17. 14; KB. VII. I; X. 3; S'B. XI. 2. 7. 27. Cf. KS. XXVI. 9: प्राणा वै प्रयाजाः। Schroeder's ed. vol ii. p. 133.

आत्मा वै प्रयाजा आत्मा[1] वा अनुयाजाः[2] । इति च ब्राह्मणम् ।

आग्नेया इति तु स्थितिः । भक्तिमात्रमितरत्[3] । किमर्थं पुनरिदमुच्यते । यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट्करिष्यन्[4] । इति ह विज्ञायते ।

इतीमान्येकादशाप्रीसूक्तानि । तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गार्त्समदमिति नाराशंसवन्ति । मैधातिथं दैर्घतमसं प्रैषिकमित्युभयवन्ति । अतोऽन्यानि तनूनपात्वन्ति तनूनपात्वन्ति[5] ॥ २२ ॥

इत्यष्टमोऽध्यायः ।

[द्रविणोदाः[1] कस्माद् द्रविणोदा[2] द्रविणसो मेद्यन्तु[3] तेऽथातः[4] आप्रियः समिद्धो[5] अद्य[6] तनूनपान्[7] नराशंसस्या[8] जुह्वानः[9] प्राचीनं बर्हिः[10] व्यचस्वती[11] रा सुष्वयन्ती[12] दैव्या[13] होतारा नो[13] यज्ञं य इमे[14] आविष्ट्यो[15] वनस्पतिरु[16] पावसृजा[17] ञ्जन्ति[18] त्वा देवेभ्यो[19] वनस्पते[20] रशनया नियूय सद्यो[21] जातः प्रयाजा[22] न्मे द्वाविंशतिः ॥][6]

॥ इत्युत्तरषट्के द्वितीयोऽध्यायः ॥

॥ इति निरुक्त अष्टमोऽध्यायः समाप्तः ॥

---

१. प्रजा अनुयाजाः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

२. Cf. TS. VI. 1. 5. 4; cf. KS. XXIII. 9. आत्मा वै प्रयाजाः प्रजानुयाजाः । Schroeder's ed. vol. ii. p. 85.

३. Cf. BD. iii. 29.

४. Cf. AB. iii. 8. 1: यस्मै तां ध्यायेद्वषट्करिष्यन् । GB. II. 3. 4: यस्मै...तां मनसा ध्यायन् वषट्कुर्यात् ।

५. Cf. BD. ii. 154—157.

६. Small figure within brackets represents the corresponding section of the eighth chapter of the *Nirukta*.

अथ नवमोऽध्यायः ।

अथ यानि पृथिव्यायतनानि सत्त्वानि स्तुतिं लभन्ते तान्यतोऽनुक्रमिष्यामः । तेषामश्वः प्रथमागामी भवति । अश्वो व्याख्यातः । तस्यैषा भवति ॥ १ ॥

अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छति इन्द्रायेन्दो परि स्रव ॥

अश्वो वोळ्हा । सुखं वोळ्हा [रथं वोळ्हा][3] । सुखमिति कल्याणनाम । कल्याणं पुण्यं सुहितं भवति । [सुहितं गम्यतीति वा । हसैता वा पाता वा पालयिता वा । शेपमृच्छतीति । वारि वारयति ।][3]

मा नो व्याख्यातः । तस्यैषा भवति ॥ २ ॥

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥

यद्वाजिनो देवैर्जातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि । मा नस्त्वं मित्रश्च वरुणश्चार्यमा चायुश्च वायुरयन इन्द्रश्चोरुक्षयण ऋभूणां राजेति वा मरुतश्च परिख्यन् ।

शकुनिः शक्नोत्युन्नेतुमात्मानम् । शक्नोति नदितुमिति वा । शक्नोति तकितुमिति वा । सर्वतः शङ्करोऽस्त्विति वा । शक्नोतेर्वा । तस्यैषा भवति ॥ ३ ॥

---

१. See N. 2. 27; cf. 1. 12.

२. RV. I. 162. 2.

३. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

४. The passage: अथ यानि पृथिव्यायतनानि...कल्याणनाम seems to have been written by a different scribe in C[2]. f. 10[r]. The letters are larger, lines crooked, and stand in marked contrast to the rest of the page.

५. The second section is omitted by Durga and given in a foot-note by Roth. But it is found in the MSS. of both recensions and is also enumerated in the summary at the end of the chapter in the MSS. of longer recensions.

६. RV. I. 162. 1; VS. 25. 24.

७. देवजातस्य C 1.

८. विदथे is omitted by M 3; partially obliterated with yellow pigment in W 1; added on the margin in W 2, C 7.

कनिक्रदज्जनुषं प्र ब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥[1]

न्यक्रन्दीज्जन्म प्रब्रुवाणः[2] । यथास्य शब्दस्तथा नामेरयति वाचम् । ईरयितेव नावम् । सुमङ्गलश्च शकुने भव । कल्याणमङ्गलः । मङ्गलं गिरतेर्गृणात्यर्थे[3] । गिरत्यनर्थानिति वा । अङ्गलमङ्गवत् । मज्जयति पापकमिति[4] नैरुक्ताः । मां गच्छत्विति वा । मा च त्वा काचिदभिभूतिः सर्वतो विदत् ।

गृत्समदमर्थमभ्युत्थितं कपिञ्जलोऽभिववाशे[5] । तदभिवादिन्येषर्ग्भवति[6] ॥ ४ ॥

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद ।
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल[7] ॥

इति सा निगदव्याख्याता ।

गृत्समदो गृत्समदनः[8] । गृत्स इति मेधाविनाम[9] । गृणातेः स्तुतिकर्मणः[10] ।

मण्डूका मज्जूका मज्जनात् । मदतेर्वा मोदतिकर्मणः । मन्दतेर्वा तृप्तिकर्मणः । मण्डयतेरिति वैयाकरणाः[11] । मण्ड एषामोक इति वा । मण्डो मदेर्वा मुदेर्वा[12] ।

तेषामेषा भवति[13] ॥ ५ ॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥[14]

संवत्सरं शिश्यांना[15] ब्राह्मणा व्रतचारिणोऽब्रुवाणाः[16] । अपि वोपमार्थे स्यात् । ब्राह्मणा इव व्रतचारिण इति । वाचं पर्जन्यप्रीतां प्रावादिषुर्मण्डूकाः ।

---

१. RV. II. 42. 1; cf. BD. IV. 94.
२. प्रक्रवाणः M 3.
३. Quoted by SRV. II. 42. 1. p. ii. 125.
४. पावकम् M 3.
५. Cf. BD. IV. 93.
६. षर्गभवति Roth.
७. RVKH. 2. 43. 1.
८. गृत्सोमदनः C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.
९. Quoted by SRV. VII. 4. 2. p. iii. 13.
१०. SRV. II. 20. 8. p. ii. 57; cf. BD. IV. 78.
११. Cf. Uṇādi sūtra IV. 42. शलिमण्डिभ्यामूकण् ।
१२. मण्डो मदेर्वा मुदेर्वा is omitted by Durga.
१३. Cf. SRV. VII. 103. 1. p. iii. 211.
१४. RV. VII. 103. 1; AV. 4. 15. 13; cf. BD. VI. 27.
१५. शयानाः C 4, M 3, Mi, W 1, W 2, W 3.
१६. ब्रुवाणाः C 5, W 1; ब्रुवाणादपि C 4, C 7, Mi, W 3, द् is partially obliterated with red ink and an अ added on the margin in W 2; ब्रवणादपि M 3. Cf. Kumārila Bhaṭṭa, Tantra Vārtika, Benares ed. p. 200 or I. 3. 18: ...निरुक्ते... ब्राह्मणो...ब्रवणादिति प्रयुक्तम् ।

वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव । तं मण्डूका अन्वमोदन्त । स मण्डूकाननुमोदमानान्दृष्ट्वा तुष्टाव[1] । तदभिवादिन्येषर्ग्भवति ॥ ६ ॥

उप प्र[2] वद मण्डूकि[3] वर्षं मा वद तादुरि ।
मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः[4] ॥

इति सा निगदव्याख्याता ।

अक्षा अश्नुवत एनानिति वा । अभ्यश्नुवत एभिरिति वा । तेषामेषा भवति ॥७॥

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः ।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्[5] ॥

प्रवेपिणो मा महतो विभीदकस्य फलानि मादयन्ति । प्रवातेजाः प्रवतेजाः[6] । इरिणे वर्तमानाः । इरिणं निर्ऋणम्[7] । ऋणातेः[8] । अपार्णं भवति । अपरता अस्मादोषधय इति वा । [सोमस्येव मौजवतस्य भक्षः ।][9] मौजवतो मूजवति जातः । मूजवान्पर्वतो मुञ्जवान्[10] । मुञ्जो विमुच्यत इषीकया । इषीकेषतेर्गतिकर्मणः । इयमपीतरेषीकैतस्मादेव । विभीदको विभेदनात् । जागृविर्जागरणात्[11] । मह्यमचच्छदत्[12] । प्रशंसत्येनान्प्रथमया । निन्दत्युत्तराभिः । ऋषेरक्षपरिद्यूनस्यैतदार्षं वेदयन्ते[13] ।

ग्रावाणो हन्तेर्वा । गृणातेर्वा[14] । गृह्णातेर्वा । तेषामेषा भवति ॥ ८ ॥

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः[15] ॥

१. Quoted by SRV. VII. 103. 1. p. iii. 211.

२. प्लु C 4, C 5, C 7, M 1, M 4.

३. मण्डूका C 7.

४. AV. 4. 15. 14.

५. RV. X. 34. 1; cf. BD. VII. 36.

६. प्रवणेजाः C 1, C 2, C 6, M 1, M 4, S; & Roth; ते is partially obliterated with red ink and णे added on the margin in W 2; Durga gives both *i. e.* प्रवणेजाः as well as प्रवतेजाः ।. Sāyaṇa reads प्रवणेजाः ।

७. निरिणम् C 4, C 5, C 7, M 3, Mi, W 2, W 3; W 1 agrees with the reading of the longer recension.

८. रिणातेः C 4, C 5, C 7, M 3, Mi, W 2, W 3; W 1 agrees with the reading of the longer recension.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१०. मुजवान् M 3; Sāyaṇa also reads मुजवान्. See SRV. X. 34. 1. p. IV. 101.

११. Quoted by SRV. III. 24. 3. p. ii. 198.

१२. Cf. SRV. X. 34. 1. p. IV. 101.

१३. The passage: प्रशंसत्येनान्……… …वेदयन्ते is omitted by Durga.

१४. गृणातेर्वा is omitted by S'ivadatta although given by Durga.

१५. RV. X. 94. 1.

प्रवदन्त्वेते । प्रवदाम वयम् । ग्रावभ्यो वाचं वदत वदद्भ्यः । यदद्रयः पर्वता अदरणीया:[1] सह सोममाशवः क्षिप्रकारिणः । श्लोकः[2] शृणोतेः । घोषो घुष्यतेः । सोमिनो यूयं स्थेति वा । सोमिनो गृहेष्विति वा ।

येन नराः प्रशस्यन्ते स नाराशंसो मन्त्रः ।

तस्यैषा भवति ॥ ९ ॥

> अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
> यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः[3] ॥

अमन्दान्स्तोमानबालिशाननल्पान्वा । बालो बलवर्ती[4] भर्तव्यो भवति । अम्बास्मा अलं भवतीति वा । अम्बास्मै बलं भवतीति वा । बलो वा प्रतिषेधव्यवहितः[5] । प्रभरे मनीषया मनस[6] ईषया स्तुत्या प्रज्ञया वा । सिन्धावधि निवसतो भावयव्यस्य राज्ञः । यो मे सहस्रं निरमिमीत सवानतूर्तो राजातूर्ण इति वा । अत्वरमाण इति वा । प्रशंसामिच्छमानः ॥ १० ॥

यज्ञसंयोगाद्राजा स्तुतिं लभेत । राजसंयोगाद् युद्धोपकरणानि । तेषां रथः प्रथमागामी भवति । रथो रंहतेर्गतिकर्मणः । स्थिरतेर्वा स्याद्विपरीतस्य । रममाणोऽस्मिंस्तिष्ठतीति वा[7] । रपतेर्वा [रसतेर्वा[8]] । तस्यैषा भवति ॥ ११ ॥

> वनस्पते वीड्वङ्गो[9] हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
> गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि[10] ॥

वनस्पते दृळ्हाङ्गो[11] हि भव । अस्मत्सखा प्रतरणः सुवीरः कल्याणवीरः । गोभिः सन्नद्धो असि । वीळयस्वेति संस्तम्भस्व । आस्थाता ते जयतु जेतव्यानि ।

---

१. आदरणीया: C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; Durga, & S'ivadatta.

२. श्लोक:......घुष्यतेः is omitted by Durga.

३. RV. I. 126. 1; cf. BD. III. 155.

४. बलभर्ता C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. The passage बालो......प्रतिषेधव्यवहित: is omitted by Durga. Etymological explanation of a word which occurs neither in the text of the RV. nor in that of Yāska is irrelavont and suspicious.

६. मनस: is omitted by Durga.

७. रममाणो......वा is omitted by Durga.
Cf. PMbh. vol. I. p. 327. line 15. रमन्तेऽस्मिन्रथ इति ।

८. रपतेर्वा रसतेर्वा is omitted by Durga; रसतेर्वा is omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

९. वीड्वङ्गो M 3.

१०. RV. VI. 47. 26; AV. 6. 125. 1; VS. 29. 52.

११. दृढांगो C 1, C 2, C 6, M 1, S. & Roth & S'ivadatta.

दुन्दुभिरिति शब्दानुकरणम् । द्रुमो भिन्न इति वा । दुन्दुभ्यतेर्वा स्याच्छब्द-कर्मणः[1] । तस्यैषा भवति ॥ १२ ॥

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून्[2] ॥

उपश्वासय पृथिवीं च दिवं च । बहुधा ते घोषं मन्यताम् । विष्ठितं स्थावरं जङ्गमं च यत् । स दुन्दुभे सहजोषण इन्द्रेण च देवैश्च । दूराद्दूरतरमपसेध शत्रून् ।

इषुधिरिषूणां निधानम्[3] । तस्यैषा भवति ॥ १३ ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः[4] ॥

बह्वीनां[5] पिता बहुरस्य पुत्र इतीषूनभिप्रेत्य । प्रस्मयत इवापाव्रियमाणः[6] । शब्दानुकरणं वा[7] । सङ्काः सचतेः । संपूर्वाद्वा किरतेः । पृष्ठे निनद्धो जयति प्रसूत इति व्याख्यातम् ।

हस्तघ्नो हस्ते हन्यते । तस्यैषा भवति ॥ १४ ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥

अहिरिव भोगैः परिवेष्टयति बाहुम् । ज्याया वधात्परित्रायमाणः । हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् । पुमान्पुरुमना भवति । पुंसतेर्वा[10] ।

अभीशवो व्याख्याताः[11] । तेषामेषा भवति ॥ १५ ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः[12] ॥

---

१. स्याद्वधकर्मणः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3 and Sāyaṇa; see SRV. VI. 47. 29. p. ii. 815.

२. RV. VI. 47. 29; AV. 6. 126. 1.

३. Quoted SRV. VI. 75. 5. p. ii. 888.

४. RV. VI. 75. 5; VS. 29. 42.

५. बहूनां C 1, C 2, C 6, M 1, M 4, S; Roth & S'ivadatta; ह्वी is crossed and हू added on the margin in C 7.

६. प्रस्मयत इति वा वध्रीयमाणः C 4, C 5, C 7, M 3, W 1, W 2; प्रस्मयतद्इति वा वध्रीयमाणः Mi; प्रस्मयत इति वार्पव्रियमाणः W 3.

७. शब्दानुकरणा वा M 3.

८. RV. VI. 75. 14; VS. 29. 51.

९. Cf. PMbh. vol. II. p. 340. l. 16. अथवा भोगशब्दः शरीरवाच्यपि दृश्यते । तद्यथा । अहिरिव भोगैः पर्येति बाहुम् । अहिरिव शरीरैरिति गम्यते ।

१०. Quoted SRV. VI. 75. 14. p. ii. 891; cf. also VII. 6. 1.

११. N. 3. 9.

१२. RV. VI. 75. 6; VS. 29. 43.

रथे तिष्ठन्नयति[1] वाजिनः पुरस्तात्सतो यत्र यत्र कामयते । सुषारथिः कल्याणसारथिः । अभीशूनां महिमानं पूजयामि[2] । मनः पश्चात्सन्तो[3]ऽनुयच्छन्ति रश्मयः[4] ।

धनुर्धन्वतेर्गतिकर्मणः । वधकर्मणो वा । धन्वन्त्यस्मादिषवः । तस्यैषा भवति ॥ १६ ॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम[5] ॥

इति सा निगदव्याख्याता । समदः समदो वात्तेः । सम्मदो वा मदतेः[6] ।

ज्या जयतेर्वा । जिनातेर्वा । प्रजावयतीषूनिति वा । तस्या एषा भवति ॥ १७ ॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती[7] ॥

वक्ष्यन्तीवागच्छति कर्णं प्रियमिव सखायमिषुं परिष्वजमाना । योषेव [शिङ्क्ते][8] शब्दं करोति । वितताधि धनुषि ज्येयं समने संग्रामे पारयन्ती [पारं नयन्ती][9] ।

इषुरीषतेर्[10]गतिकर्मणः । [वधकर्मणो वा ।][11] तस्यैषा भवति ॥ १८ ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन्[12] ॥

सुपर्णं वस्त इति वाजानभिप्रेत्य । मृगमयोऽस्या दन्तः । मृगयतेर्वा । गोभिः सन्नद्धा पतति प्रसूतेति व्याख्यातम्[13] । यत्र नराः संद्रवन्ति च विद्रवन्ति च तत्रास्मभ्यमिषवः शर्म यच्छन्तु[14] शरणं संग्रामेषु ।

अश्वाजनीं कशेत्याहुः । कशा प्रकाशयति भयमश्वाय । कृष्यतेर्वाणूभावात् । वाक्पुनः प्रकाशयत्यर्थान् । खशया[15] । क्रोशतेर्वा । अश्वकशाया एषा भवति ॥ १९ ॥

---

१. नयसि L.

२. पूजयति W 1; पूजयतः C 4; पूजयत C 5, C 7, M 3, Mi, W 2, W 3; and Sāyaṇa, cf. SRV. VI. 75. 6. p. ii. 889.

३. सतो C 4, C 5, M 3, Mi, W 2, W 3; and Sāyaṇa loc. cit. W 1, C 7 agree with the text of the longer recension.

४. Quoted SRV. loc. cit.

५. RV. VI. 75. 2; VS. 29. 39.

६. Quoted SRV. VI. 75. 2. p. ii. 888.

७. RV. VI. 75. 3; VS. 29. 40.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3; quoted by SRV. VI. 75. 3. p. ii. 888.

१०. इषुरिषतेः Roth.

११. Omitted by C 4, C 7, M 3, Mi, W 1, W 3; is underlined in C 5; वधकर्मणो वेति भाष्ये पाठः is added on the margin in W 2.

१२. RV. VI. 75. 11; VS. 29. 48.

१३. N. 2. 5.

१४. Cf. SRV. VI. 75. 11. p. ii. 890 सुपर्ण...शर्म शरणं प्रयच्छन्तु ।

१५. न्कशया M 3, but a ख is added just above क on the margin in M 3.

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते ।[1]
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥

आघ्नन्ति[2] सानून्येषां सरणानि सक्थीनि । सक्थि सचतेः । आसक्तोऽस्मिन् कायः । जघनानि चोपघ्नन्ति[3] । जघनं जङ्घन्यतेः[4] । अश्वाजनि [प्रचेतसः][5] प्रवृद्धचेतसोऽश्वान्त्समत्सु समरणेषु संग्रामेषु चोदय[6] ।

उलूखलमुरुकरं वा । ऊर्ध्वखं वा । उर्करं[7] वा ।

उरु मे कुरु । इत्यब्रवीत् ।

तदुलूखलमभवत् ।

उरुकरं वैतदुलूखलमित्याचक्षते परोक्षेण । इति च ब्राह्मणम्[8] ।

तस्यैषा भवति ॥ २० ॥[9]

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।[10]
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥

इति सा निगदव्याख्याता ॥ २१ ॥

वृषभः प्रजां वर्षतीति वा । अतिबृहति रेत इति वा । तद्वर्षकर्मा वर्षणाद्वृषभः । तस्यैषा भवति ॥ २२ ॥

न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।[11]
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥

न्यक्रन्दयन्नुपयन्त इति व्याख्यातम् । अमेहयन्वृषभं मध्ये । [आजेः] आजयनस्याजवनस्येति वा । तेन [तं][12] सूभर्वं राजानम् । भर्वतिरत्तिकर्मा[13] । तद्वा सूभर्वं

---

१. RV. VI. 75. 13.

२. आघ्नति C 4, C 5, C 7, Mi, W 1, W 2, W 3; अघ्नति M 3.

३. चोपघ्नते M 3; चोपघ्नन्ति Sāyaṇa.

४. Cf. SRV. I. 28. 2. p. i. 147.

५. Omitted by BK, C 4, C 5, C 7. Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

६. Quoted SRV. VI. 75. 13. p. ii. 891.

७. उत्करं M 3, W 1, W 2, W 3; उर्करं C 4, C 5, Mi; उर्करं वोर्ध्वखं Rot.

८. Cf. S'B. VII. 5. 1. 22: उरु मे करदिति तदुरुकरम् । उरुकरं ह वै तदुलूखलमित्याचक्षते परोक्षम् । Cf. SRV. I. 28. 5. p. i. 148.

९. The section comes to an end here in S'ivadatta's edition. It is however against the evidence of the MSS. of both recensions,

१०. RV. I. 28. 5; cf. BD. iii. 101.

११. RV. X. 102. 5.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१३. भर्वतिरत्तिकर्मा is omitted by Durga, underlined by Roth; Sāyaṇa reads भुर्वतिरत्तिकर्मा SRV. I, 56, 1; 143, 5.

सहस्रं गवां मुद्गलः प्रधने जिगाय। प्रधने इति सङ्ग्रामनाम। प्रकीर्णान्यस्मिन् धनानि भवन्ति।

द्रुघणो द्रुममयो घनः। तत्रेतिहासमाचक्षते। मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा सङ्ग्रामे व्यवहृत्याजिं जिगाय। तदभिवादिन्येषर्ग्भवति॥ २३॥

इमं तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम्।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु॥

इमं तं पश्य वृषभस्य सहयुजं काष्ठाया मध्ये द्रुघणं शयानम्। येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु। पृतनाज्यमिति सङ्ग्रामनाम। पृतनानाम-जनाद्वा। जयनाद्वा। मुद्गलो मुद्गवान्। मुद्गगिलो [वा]। मदनं गिलतीति वा। मदंगिलो वा। मुदंगिलो वा। भार्म्यश्वो भृम्यश्वस्य पुत्रः। भृम्यश्वो भृमयोऽस्याश्वाः। अश्वभरणाद्वा।

पितुरित्यन्ननाम। पातेर्वा। पिबतेर्वा। प्यायतेर्वा। तस्यैषा भवति॥ २४॥

पितुं नु स्तोषं महो धर्माणं तविषीम्।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥

तं पितुं स्तौमि महतो धारयितारं बलस्य। तविषीति बलनाम। तवतेः [वा] वृद्धिकर्मणः। यस्य त्रित ओजसा बलेन। त्रितस्त्रिस्थानो इन्द्रो वृत्रं विपर्वाणं व्यर्दयति।

नद्यो व्याख्याताः। तासामेषा भवति॥ २५॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥

---

१. प्रधनमिति SRV. I. 52. 9. p. i. 265.

२. Quoted SRV. loc. cit.

३. घण: Roth.

४. Cf. BD. viii. 12; SRV. X. 102. 1. p. IV. 338.

५. RV. X. 102. 9; cf. BD. VIII. 11.

६. पृतनाज्य इति C 4, C 5, C 7, M 3, W2, W 3; पृतनाज्यद्गति Mi.

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

८. Cf. S'B. I. 9. 2. 20. AB. I. 13. अन्नं वै पितुः।

९. RV. I. 187. 1; VS. 34. 7.

१०. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

११. N. 2. 24.

१२. RV. X. 75. 5.

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि परुष्णि स्तोममासेवध्वम्। असिक्न्या च सह मरुद्वृधे वितस्तया चार्जीकीय आशृणुहि सुषोमया चेति समस्तार्थः। अथैकपदनिरुक्तम्। गङ्गा गमनात्। यमुना प्रयुवती गच्छतीति वा। प्रवियुतं गच्छतीति वा। सरस्वती। सर इत्युदकनाम। सर्तेः। तद्वती। शुतुद्री शुद्राविणी। क्षिप्रद्राविणी। आशु तुन्नेव द्रवतीति वा। इरावतीं परुष्णीत्याहुः। पर्ववतीं [भास्वती] कुटिलगामिनी। असिक्न्यशुक्लासिता। सितमिति वर्णनाम। तत्प्रतिषेधोऽसितम्। मरुद्वृधाः सर्वा नद्यो मरुत एना वर्धयन्ति। वितस्ताविदग्धा विवृद्धा महाकूला। आर्जीकीयां विपाडित्याहुः। ऋजीकप्रभवा वा। ऋजुगामिनी वा। विपाड् विपाटनाद्वा। विपाशनाद्वा। विप्रापणाद्वा। पाशा अस्यां व्यपाश्यन्त वसिष्ठस्य मुमूर्षतः। तस्माद्विपाडुच्यते। पूर्वमासीदुरुञ्जिरा। सुषोमा सिन्धुः। यदेनामभिप्रसुवन्ति नद्यः। सिन्धुः स्यन्दनात्।

आप आप्नोतेः। तासामेषा भवति ॥ २६ ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे ॥

आपो हि स्थ सुखभुवस्ता नोऽन्नाय धत्त। महते च नो रणाय रमणीयाय [च] दर्शनाय।

ओषधय ओषद्धयन्तीति वा। ओषत्येना धयन्तीति वा। दोषं धयन्तीति वा।

तासामेषा भवति ॥ २७ ॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥

---

१. Cf. SRV. X. 75. 5. p. IV. 232.

२. Omitted by C 4, M 3, Mi, W 1, W 3; the reading of C 5, C 7, W 2 is that of the longer recension.

३. कुदिल॰ M 3.

४. मरुद्वृधः C 4, M 3, Mi, W 1, W 3.

५. महाकुला M 3, W 3.

६. विपालित्याहुः C 4, M 1, M 3, Mi, W 1, W 3.

७. ऋजूकप्रभवा C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S; & Roth. Cf. Durga: ऋजीको नाम पर्वतः। तस्मात् प्रभवति।

८. ॰विपालुच्यते M 1, M 3.

९. Cf. SRV. I. 125. 4. p. i. 569.

१०. Cf. S'B. VI. 1. 1. 9. यदाप्नोत्तस्मादापः। also Uṇādi sūtra II. 58. आप्नोतेर्ह्रस्वश्च।

११. RV. X. 9. 1; AV. 1. 5. 1; SV. 2. 1187; VS. 11. 50; 36. 14.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१३. RV. X. 97. 1; VS. 12. 75.

या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये नु तद्बभ्रूणामहं बभ्रुवर्णानां हरणानां भरणानामिति वा[1]। शतं धामानि सप्त च [इति[2]]। धामानि त्रयाणि भवन्ति। स्थानानि । नामानि। जन्मानीति । जन्मा[3]न्यत्राभिप्रेतानि । सप्तशतं पुरुषस्य मर्मणां तेष्वेना दधतीति वा[4]।

रात्रिर्व्याख्याता[5]। तस्या एषा भवति ॥ २८ ॥

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः ।
दिवः सदाँसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः[6] ॥

आपूपुरस्त्वं रात्रि पार्थिवं रजः। स्थानैर्मध्यमस्य । दिवः सदाँसि। बृहती महती वितिष्ठस आवर्तते त्वेषं तमो रजः।

अरण्यान्यरण्यस्य पत्नी। अरण्यमपार्णम्। ग्रामादरमणं भवतीति वा। तस्या एषा भवति ॥ २९ ॥

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि ।
कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दती[7] ३ँ ॥

अरण्यानीत्येनामामन्त्रयते। यासावरण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि। न त्वा भीर्विन्दतीवेति। इवः परिभयार्थे वा[8]।

श्रद्धा श्रद्धानात्। तस्या एषा भवति ॥ ३० ॥

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ।
श्रद्धां भगस्य[9] मूर्धनि वचसा वेदयामसि[10] ॥

श्रद्धयाग्निः साधु समिध्यते। श्रद्धया हविः साधु हूयते। श्रद्धां भगस्य भागधेयस्य मूर्धनि प्रधानाङ्गे वचनेनावेदयामः।

---

१. भरणानां हरणानामिति वा C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; cf. SRV. X. 97. 1. p. IV. 319: या...भरणानां हरणानां...

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

३. स्थानानि C 4, M 3, Mi; is corrected to जन्मानि in C 7; जन्मानि is partially obliterated with black ink & स्थानानि added on the margin in W 2; स्थानानि is added on the margin although no attempt is made to obliterate जन्मानि in W 1.

४. Cf. SRV. X. 97. 1. p. IV. 319: ...प्रेतानि सप्तशतानि सप्तशतं...दधति। Cf. also S'B. VII. 2. 4. 26.

५. N. 2. 18.

६. AV. 19. 47. 1; VS. 34. 32.

७. RV. X. 146. 1.

८. Cf. SRV. X. 147. 1. p. IV. 462.

९. भरस्य M 3.

१०. RV. X. 151. 1.

पृथिवी व्याख्याता[1] । तस्या एषा भवति ॥ ३१ ॥

स्योना पृथिवि भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथः[2] ॥

सुखा नः पृथिवि भव । अनृक्षरा निवेशनी । ऋक्षरः कण्टक ऋच्छतेः[3] । कण्टकः कन्तपो वा । कृन्ततेर्वा । कण्टतेर्वा स्याद्गतिकर्मणः । उद्धर्ततमो[4] भवति । यच्छ नः शर्म । [यच्छन्तु[5]] शरणं सर्वतः पृथु[6] ।

अप्वा व्याख्याता[7] । तस्या एषा भवति ॥ ३२ ॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु[8] शोकैरन्धेनामित्रास्तमसा सचन्ताम्[9] ॥

अमीषां चित्तानि [प्रज्ञानानि[10]] प्रतिलोभयमाना गृहाणाङ्गान्यप्वे परेहि । अभिप्रेहि । निर्दहैषां हृदयानि शोकैः । अन्धेनामित्रास्तमसा संसेव्यन्ताम् ।

अग्नाय्यग्नेः पत्नी । तस्या एषा भवति ॥ ३३ ॥

इहेन्द्राणीमुप ह्वये वरुणानीं स्वस्तये ।
अग्नायीं सोमपीतये[11] ॥

इति सा निगदव्याख्याता ॥ ३४ ॥

अथातोऽष्टौ द्वन्द्वानि । [उलूखलमुसले[12] ।] उलूखलं व्याख्यातम्[13] । मुसलं मुहुः सरम् । तयोरेषा भवति ॥ ३५ ॥

---

१. N. 1. 13, 14.

२. RV. I. 22. 15; cf. AV. 18. 2. 19:

स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी ।
यच्छास्मै शर्म सप्रथाः ॥

Cf. VS. 35. 21:

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ॥

३. Cf. SRV. I. 41. 4. p. i. 215.

४. उद्धततरो C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. Omitted by C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

६. Cf. SRV. I. 22. 15. p. i. 118.

७. N. 6. 12.

८. Durga reads हृत् सुशोकैः

९. RV. X. 103. 12; SV. 2. 1211; VS. 17. 44; cf. AV. 3. 2. 5; cf. BD. viii. 13 B.

१०. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

११. RV. I. 22. 12.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१३. N. 9. 20.

आयजी वाजसातमा ता ह्यु१च्चा विजर्भृतः ।
हरी इवान्धाँसि वप्सता ॥[1]

आयष्टव्ये अन्नानां संभक्ततमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि[2] भुञ्जाने ।[3]

हविर्धाने हविषां निधाने । तयोरेषा भवति ॥ ३६ ॥

आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः ।
इहाद्य सोमपीतये[4] ॥

आसीदन्तु वामुपस्थमुपस्थानम् [अद्रोग्धव्ये इति वा][5] यज्ञिया देवा यज्ञसंपादिन इहाद्य सोमपानाय ।

द्यावापृथिव्यौ[6] व्याख्याते । तयोरेषा भवति ॥ ३७ ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।
यज्ञं देवेषु यच्छताम्[7] ॥

द्यावापृथिव्यौ न इमं साधनमद्य दिविस्पृशं यज्ञं देवेषु नियच्छताम्[8] ।

विपाट्छुतुद्र्यौ[9] व्याख्याते । तयोरेषा भवति ॥ ३८ ॥

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते[10] ॥

पर्वतानामुपस्थादुपस्थानात् । उशत्यौ कामयमाने । अश्वे इव विमुक्ते इति वा । विषण्णे इति वा । हासमाने । हासतिः स्पर्धायां । हर्षमाणे वा । गावाविव [शुभ्रे][11] शोभने मातरौ[12] संरिहाणे[13] । विपाट्छुतुद्री[14] पयसा प्रजवेते[15] ।

---

१. RV. I. 28. 7.

२. इवांधानि C 4, C 5, C 7, M 3, Mi; अन्नानि is corrected to अंधानि in W 3.

३. Quoted by SRV. I. 28. 7. p. i. 148.

४. RV. II. 41. 21.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

६. N. 1. 13, 14; 3. 22.

७. RV. II. 41. 20.

८. निगच्छताम् M 3; नियच्छताविपाट् W 3.

९. N. 2. 24; 9. 26.

१०. RV. III. 33. 1.

११. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W 2, W 3.

१२. संमातरौ C 4, C 5, C 7, M3, Mi, W 2, W 3; मातरौ is corrected to संमातरौ in W1.

१३. रिहाणे C 4, C 5, C 7, M 3, Mi, W 2, W 3; संरिहाणे is corrected to रिहाणे in W 1.

१४. विपाट्छुतुद्रयौ C 1, C 2, C 3, C 6, M 1, M 4, S; W 2; Roth.

१५. Cf. SRV. III. 33. 1. p. ii. 242.

आर्त्नी अर्तन्यौ वा । अरण्यौ वा । अरिषण्यौ वा ।

तयोरेषा भवति ॥ ३९ ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥

ते आचरन्त्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थाने । अपविध्यतां शत्रून्त्संविदाने आर्त्न्याविमे विघ्नत्याव्मित्रान् ।

शुनासीरौ । शुनो वायुः । शु एत्यन्तरिक्षे । सीर आदित्यः सरणात् । तयोरेषा भवति ॥ ४० ॥

शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः ।
तेनेमामुप सिञ्चतम् ॥

इति सा निगदव्याख्याता ।

देवी जोष्ट्री देव्यौ जोषयित्र्यौ । द्यावापृथिव्याविति वा । अहोरात्रे इति वा । सस्यं च समा चेति कात्थक्यः । तयोरेष संप्रैषो भवति ॥ ४१ ॥

देवी जोष्ट्री वसुधीती ययोरन्याघा द्वेषांसि यूयवदान्या-
वक्षद्वसु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥

देवी जोष्ट्री । देव्यौ जोषयित्र्यौ । [वसुधीती] वसुधान्यौ । ययोरन्याघानि द्वेषांस्यवयावयत्यावहत्यन्या वसूनि वननीयानि यजमानाय । वसुवननाय च । वसुधानाय च । वीतां पिबेतां कामयेतां वा । यजेति संप्रैषः ।

देवी ऊर्जाहुती । देव्या ऊर्जाह्वान्यौ । द्यावापृथिव्याविति वा । अहोरात्र इति वा । सस्यं च समा चेति कात्थक्यः । तयोरेष संप्रैषो भवति ॥ ४२ ॥

देवी ऊर्जाहुती इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥

---

१. RV. VI. 75. 4; VS. 29. 41.

२. अप शत्रून्विध्यतां C 4, C 5, C 7, M 3, Mi, W 2, W 3; the figures of २ and १ are placed respectively on शत्रून् and विध्यतां in W 1.

३. Cf. SRV. VI. 75. 4. p. ii. 888.

४. Cf. SRV. IV. 57. 5. p. ii. 490; cf. BD. V. 8.

५. RV. IV. 57. 5.

६. कात्थक्य: M 3.

७. KS. 19. 13; MS. 4. 13. 8: 210. 1.

८. Omitted by BK, C 4, C 5, C 7, Kr, M 3, Mi, R 7, R8, W 1, W 2, W 3.

९. ययौ० M 3.

१०. वरणीयानि M 3.

११. कात्थक्य: M 3.

१२. KS. 19. 13; MS. 4. 13. 8: 210. 4, 7.

देवी ऊर्जाहुती । देव्या ऊर्जाह्वान्यौ । अन्नं च रसं चावहति [आवहेति] अन्या । सहजेग्धि च सहपीतिं चान्या । नवेन पूर्वं दयमानाः स्याम । पुराणेन नवम् । तामूर्जमूर्जाहुती ऊर्जयमाने अधाताम् । वसुवननाय च । वसुधानाय च । वीतां पिबेतां कामयेतां वा । यजेति संप्रैषो यजेति संप्रैषः ॥ ४३ ॥

॥ इति नवमोऽध्यायः ॥

[[१]अथ यान्यश्वो [२]वोळ्हा [३]मा नो मित्रः [४]कनिक्रदद् [५]भद्रं वद [६]संवत्सरमुप प्र वद प्रावेपा मा प्रैते[९] वदन्त्व[१०]मन्दान्[११]न्यक्षसंयोगाद्[१२]वनस्पते [१३]उप श्वासय [१४]बह्वीनाम[१५]हिरिव भोगै [१६]रथे तिष्ठन्[१७]धन्वना गा [१८]वक्ष्यन्तीवेदा [१९]सुपर्णं वस्त [२०]आ जङ्घन्ति [२१]यच्चिद्धि त्वं [२२]वृषभो [२३]न्यक्रन्दयन्[२४]निमं तं [२५]पितुं [२६]न्विमं म [२७]आपोहिष्ठा [२८]या ओषधी[२९]रा [३०]त्र्यरण्यानि [३१]श्रद्धयाग्निः [३२]स्योनामीषां [३३]चित्तमिहेन्द्रा[३४]ण्यथातो[३५]ऽष्टावा[३६]यज्या[३७] वां द्यावा[३८] नः प्र [३९]पर्वतानां ते [४०]आचरन्ती [४१]शुनासीरौ [४२]देवी जोष्ट्री [४३]देवी ऊर्जाहुती त्रिचत्वारिंशत् ॥ [५]]

॥ इत्युत्तरषट्के तृतीयोऽध्यायः ॥

॥ इति निरुक्ते नवमोऽध्यायः ॥

---

१. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 7, R 8, W 1, W2, W 3.

२. सहसग्धि C 4, C 7, M 3, Mi; सुसंग्धि W 2.

३. सहसपीतिं C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

४. यजेति संप्रैषः is given only once in Roth.

५. Small figure within brackets represents the corresponding section of the ninth chapter of the *Nirukta*.

अथ दशमोऽध्यायः

अथातो मध्यस्थाना देवताः ।

तासां वायुः प्रथमागामी भवति । वायुर्वातेः । वेतेर्वा स्याद्गतिकर्मणः । एतेरिति स्थौलाष्ठीविः । अनर्थको वकारः । तस्यैषा भवति ॥ १ ॥

वायवा याहि दर्शतेमे सोमा अरंकृताः ।
तेषां पाहि श्रुधी हवम्[१] ॥

वायवायाहि दर्शनीयेमे सोमा अरङ्कृता [अलङ्कृताः[२]] । तेषां पिब शृणु नो ह्वान[३]मिति । कमन्यं मध्यमादेवमवक्ष्यत्[४] ।

तस्यैषापरा भवति ॥ २ ॥

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्[५] ॥

आसस्रवांसः । अभिबलायमानमिन्द्रम् । कल्याणचक्रे रथे योगाय । रथ्या अश्वा रथस्य वोढारः । ऋज्यन्त ऋजुगामिनोऽन्नमभिवहेयुः । नवं च पुराणं[६] च । श्रव इत्यन्ननाम । श्रूयत इति सतः[७] । वायोश्चास्य भक्षो यथा न विदस्येदिति ।

इन्द्रप्रधानेत्येके नैघण्टुकं वायुकर्म । उभयप्रधानेत्यपरम्[८] ।

वरुणो वृणोतीति सतः । तस्यैषा भवति ॥ ३ ॥

नीचीनबारं वरुणः कबन्धं प्र ससर्ज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम[९] ॥

---

१. RV. I. 2. 1.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

३. Cf. SRV. I. 2. 1. p. i. 30.

४. अवक्षत् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. RV. VI. 37. 3.

६. पुराण M 3.

७. Cf. SRV. I. 11. 7; 49. 2; 91. 17; pp. i. 78, 247, 407; also III. 11. 6. p. ii. 167.

८. Cf. BD. ii. 33.

९. RV. V. 85. 3.

नीचीनद्वारं वरुणः । कवन्धं मेघम्[1] । कवनमुदकं भवति । तदस्मिन्धीयते[2] । उदकमपि कवन्धमुच्यते । बन्धिरनिभृतत्वे । कमनिभृतं च । प्रसृजति । द्यावापृथिव्यौ चान्तरिक्षं[3] च[4] महत्वेन । तेन सर्वस्य भुवनस्य राजा यवमिव वृष्टिर्व्युनत्ति भूमिम् ।

तस्यैषापरा भवति ॥ ४ ॥

तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो
नभन्तामन्यके समे[5] ॥

तं स्वभिष्टौमि समानया[6] गिरा गीत्या स्तुत्या । पितृणां च मननीयैः स्तोमैः । नाभाकस्य प्रशस्तिभिः । ऋषिर्नाभाको बभूव । यः स्यन्दमानानाम्[7] आसामुपोदये[8] सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यते । अथैष एव भवति । नभन्तामन्यके समे । मा भूवन्नन्यके सर्वे ये नो द्विषन्ति दुर्धियः पापधियः पापसंकल्पाः ।

रुद्रो रौतीति सतः[10] । रोरूयमाणो द्रवतीति वा । रोदयतेर्वा ।

यदरुदत्तद्रुद्रस्य रुद्रत्वम्[11] । इति काठकम् ।

यदरोदीत्तद्रुद्रस्य रुद्रत्वम्[12] । इति हारिद्रविकम् ।

तस्यैषा भवति ॥ ५ ॥

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः[13] ॥

इमा रुद्राय । दृढधन्वने । गिरः । क्षिप्रेषवे । देवाय । अन्नवते । अषाळ्हा[14]-

1. Quoted by SRV. V. 85. 3. p. ii. 680.
2. कमस्मिन्धीयते C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.
3. वान्तरिक्षं C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.
4. Omitted but added on the margin in M 3.
5. RV. VIII. 41. 2.
6. समान्या C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.
7. स्यन्दनानाम् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.
8. आसामपामुपोदये SRV. VIII. 41. 2. p. iii. 416.
9. Quoted by SRV. VIII. 41. 2. p. iii. 416. The passage ये नो द्विषन्ति …पापसंकल्पाः is omitted by Durga.
10. Quoted by SRV. I. 158. 1. p. i. 671.
11. Cf. KS. XXV. 1.
12. TS. i. 5. 1. 1; cf. S'B. IX. 1. 1. 6; BD. ii. 34.
13. RV. VII. 46. 1.
14. अषाढाय C 1, C 2, C 6, M 4, S and Roth.

यान्यैः[1] । सहमानाय । विधात्रे । तिग्मायुधाय । भरत । शृणोतु नः । तिग्मं तेजतेः । उत्साहकर्मणः[2] । आयुधमायोधनात्[3] ।

तस्यैषापरा भवति ॥ ६ ॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः[4] ॥

या ते दिद्युदवसृष्टा । दिवस्परि दिवोऽधि । दिद्युद् द्युतेर्वा [द्योततेर्वा[5]] । क्ष्मया चरति । क्ष्मा पृथिवी । तस्यां चरति । तया चरति । विक्ष्मापयन्ती[6] चरतीति वा । परिवृणक्तु[7] नः सा । सहस्रं ते स्वाप्तवचन भैषज्यानि । मा नस्त्वं पुत्रेषु [च[5]] पौत्रेषु च रीरिषः । तोकं तुद्यतेः । तनयं तनोतेः ।

अग्निरपि रुद्र उच्यते[8] । तस्यैषा भवति ॥ ७ ॥

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।
स्तोमं रुद्राय दृशीकम्[9] ॥

जरा स्तुतिः[10] । जरतेः स्तुतिकर्मणः[11] । तां बोध । तया बोधयितरिति वा । तद्विविड्ढि । तत्कुरु । मनुष्यस्य मनुष्यस्य यजनाय । स्तोमं रुद्राय दर्शनीयम्[12] ।

इन्द्र इरां दृणातीति वा[13] । इरां ददातीति वा । इरां दधातीति वा । इरां दारयते[14] इति वा । इरां धारयते[15] इति वा । इन्दवे द्रवतीति[16] वा । इन्दौ रमत इति वा । इन्धे भूतानीति वा ।

---

१. अग्नैः C 4, C 5, C 7, M 3, Mi, W 1, W 2; अन्यैः is corrected to अग्नैः in W 3.

२. तिग्मं...कर्मणः is quoted by SRV. VII. 18. 18. p. iii. 41; is omitted by Durga.

३. आयुधमायोधनात् is omitted by Durga.

४. RV. VII. 46. 3.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

६. विक्ष्मापयति C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

७. परिवृणाक्तु M 3.

८. Cf. S'B. V. 2. 4. 13:
यो वै रुद्रः सोऽग्निः ।
and also S'B. V. 3. 1. 10:
अग्निर्वै रुद्रः ।

९. RV. I. 27. 10; SV. 1. 15; 2. 1013.

१०. Quoted by SRV. X. 59. 2. p. IV. 171.

११. Quoted by SRV. I. 123. 5. p. i, 558; cf. also I. 38. 5.

१२. Quoted by SRV. I. 27. 10. p. i, 145.

१३. Cf. BD. ii. 36; cf. SRV. I. 156. 5. p. i. 668.

१४. दारयतीति वा SRV. I. 3. 5. p. i. 36.

१५. धारयतीति वा SRV. loc. cit. cf. also IX. 5. 7. p. iii. 609.

१६. द्रमते M 3; द्रवत इति C 4, C 5, C 7, Mi, W 1, W 2, W 3.

तद्यदेनं प्राणैः समैन्धं[१]स्तदिन्द्रस्येन्द्रत्वम्[२]। इति विज्ञायते[३]।

इदं करणादित्याग्रयणः[४]। इदं दर्शनादित्यौपमन्यवः। इन्दतेर्वै[५]श्वर्यकर्मणः। इन्दञ्छत्रूणां दारयिता[६] वा। द्रावयिता वा। आदरयिता च यज्वनाम्[७]।

तस्यैषा भवति ॥ ८ ॥

अर्दर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः।
महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्[८] ॥

अदृणा उत्सम्। उत्स [उत्सरणाद्वा[९]]। उत्सदनाद्वा। उत्स्यन्दनाद्वा। उनत्तेर्वा[१०]।[११] व्यसृजोऽस्य खानि। त्वमर्णवानर्णस्वतः। ए[१२]तान्माध्यमिकान्त्संस्त्यायान्। बाबध्यमानानरम्णाः। रम्णातिः संयमनकर्मा। विसर्जनकर्मा वा। महान्तमिन्द्र पर्वतं मेघं यद्व्यवृणोः। व्यसृजोऽस्य धाराः। अवा[१३]हन्नेनं [दानवं[१४]] दानकर्माणम्।

तस्यैषापरा भवति ॥ ९ ॥

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः[१५] ॥

यो जातः[१६] एव प्रथमो मनस्वी देवो देवान्। क्रतुना कर्मणा। पर्यभवत्पर्यगृह्णा-

---

१. समैन्धत C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; cf. SRV. below note 7.

२. The quotation is untraced. Cf. S'B. VI. 1. 1. 2:

एष एवेन्द्रस्तानेष प्राणान्मध्यत इन्द्रियेणैन्ध यदैन्ध तस्मादिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते परोऽक्षम्।

३. Cf. SRV. IX. 5. 7. p. iii. 609:

तथा च यास्कः। इन्द्र इरां दृणातीति वा। इरां दारयत इति वा। इरां धारयतीति वा। इन्धे भूतानीति वा।

तद्यदेनं प्राणैः समैन्धत तदिन्द्रस्येन्द्रत्वमिति विज्ञायते।

४. Cf. SRV. I. 156. 5. p. i. 668.

५. इञ्छत्रूणां Roth; SRV. I. 3. 4. p. i. 36.

६. Cf. SRV. X. 48. 6. p. IV. 146: इन्द्रः शत्रूणां दारयितेति निरुक्तम्।

७. The entire passage इन्द्र इरां दृणातीति...यज्वानम् is quoted by SRV. I. 3. 4. p. i. 36.

८. RV. V. 32. 1; SV. 1. 315.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3; also by Sāyaṇa, see, SRV. V. 32. 1. p. ii. 559.

१०. उन्नयनात् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

११. उनत्तेर्वा स्यात् SRV. loc. cit.

१२. The passage अदृणा उत्सम्...एतान् is quoted by SRV. loc. cit.

१३. अवहन्नेनं C 1; C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

१४. Omitted by BK, C 4, C 5, C 7, Kn, M 3, R 8, W 1, W 2, W 3.

१५. RV. II. 12. 1; AV. 20. 34. 1.

१६. जायमानः C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

त्पर्यरक्षदत्यक्रामदिति वा। यस्य बलाद् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य महा बलस्य महत्त्वेन । स जनास इन्द्र इति ।

ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता[1] ।

पर्जन्यस्तृपेः । आद्यन्तविपरीतस्य । तर्पयिता जन्यः । परो जेता वा । परो[2] जनयिता वा । प्रार्जयिता वा रसानाम्[3] ।

तस्यैषा भवति ॥ १० ॥

वि वृक्षान्हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः[4] ॥

वि[5]हन्ति वृक्षान् । विहन्ति च रक्षांसि । सर्वाणि चास्माद्[6]भूतानि बिभ्यति महावधात् । महान्ह्यस्य व[7]धः । अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः पापकृत[8]ः ।

बृहस्पतिर्बृहतः पाता वा । पालयिता[9] वा । तस्यैषा भवति ॥ ११ ॥

अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य[10] ॥

अशनवता मेघेनापिनद्धं मधु पर्यपश्यत् । मत्स्यमिव दीन उदके निवसन्तम् । निर्जहार तच्चमसमिव वृक्षात् । चमसः कस्मात् । चमन्त्यस्मिन्निति । बृहस्पतिर्विरवेण शब्देन विकृत्य ।

ब्रह्मणस्पतिर्ब्रह्मणः पाता वा[11] । पालयिता वा । तस्यैषा भवति ॥ १२ ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम्[12] ॥

१. The entire passage यो जात एव… आख्यानसंयुक्ता । is quoted by SRV. II. 12. 1. p. ii. 32.

२. परो is omitted by SRV. V. 83. 1. p. ii. 676.

३. The passage पर्जन्यस्तृपेः…रसानाम् is quoted by SRV. loc. cit.
Cf. BD. ii. 37—38.

४. RV. V. 83. 2.

५. Sāyaṇa adds पर्जन्यो before विहन्ति; see SRV. V. 83. 2. p. ii. 676.

६. चास्मद् S'ivadatta.

७. व्यधः M 3. The passage महान्ह्यस्य वधः is omitted by Durga.

८. The passage विहन्ति वृक्षान्…पापकृतः is quoted by SRV. loc. cit. अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः । तदेवात्र लिख्यते । etc.

९. Cf. BD. ii. 39.

१०. RV. X. 68. 8; AV. 20. 16. 8.

११. Cf. BD. ii. 40.

१२. RV. II. 24. 4.

अशनवन्तमास्यन्दनवन्तम्[1]। अवातितं ब्रह्मणस्पतिर्मधुधारम्। अभि यमोजसा बलेनाभ्यतृणत्तमेव सर्वे पिबन्ति रश्मयः सूर्यदृशः। वहनं सह सिञ्चन्त्युत्समुद्रिणमुदकवन्तम्॥ १३॥

क्षेत्रस्य पतिः। क्षेत्रं क्षियतेर्[2]निवासकर्मणः। तस्य पाता वा पालयिता[3] वा। तस्यैषा भवति॥ १४॥

क्षेत्रस्य पतिना वयं हितेनेव जयामसि।
गामश्वं पोषयित्वा स नो मृळातीदृशे[4]॥

क्षेत्रस्य पतिना[5] वयं सुहितेनेव जयामः। गामश्वं पुष्टं पोषयितृ चाहरेति। स नो मृळातीदृशे। बलेन वा धनेन वा। मृळतिर्दानकर्मा[6]। तस्यैषापरा भवति॥ १५॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु[7]॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयोऽस्मासु धुक्ष्वेति। मधुश्चुतं घृतमिवोदकं सुपूतम्। ऋतस्य नः पातारो वा पालयितारो वा मृळयन्तु। मृळयतिरुपदया[8]कर्मा। पूजाकर्मा वा[9]।

तद्यत्समान्यामृचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकम्। मधुमन्तं मधुश्चुतमिति यथा। यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरम्।

हिरण्यरूपः स हिरण्यसंदृग्[10]। इति यथा।

यथा कथा च विशेषोऽजामि भवतीत्यपरम्।

मण्डूका इवोदकान्मण्डूका उदकादिव[11]। इति यथा।

---

१. Quoted by SRV. II. 24. 4. p. ii. 71.

२. क्षीयते: C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

३. Cf. BD. ii. 41.

४. RV. IV. 57. 1.

५. Quoted by SRV. IV. 57. 1. p. ii. 489.

६. मृळतिरुपदयाकर्मा पूजाकर्मा वा C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; cf. SRV. X. 64. 1. p. iv. 193: मृळतिरुपदयाकर्मेति यास्कः।

७. RV. IV. 57. 2.

८. मृळतिर्दानकर्मा C 4, C 5, C 7, M 3, Mi, R 8, W 1, W 2, W 3.

९. The passage मृळतिरुपदयाकर्मा पूजाकर्मा वा is omitted by Durga.

१०. RV. II. 35. 10.

११. RV. X. 166. 5.

वास्तोष्पतिः । वास्तुर्वसतेर्[1]निवासकर्मणः । तस्य पाता वा पालयिता वा[2] । तस्यैषा भवति ॥ १६ ॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।
सखा सुशेव एधि नः[3] ॥

अभ्यमनहा वास्तोष्पते सर्वाणि रूपाण्याविशन्त्सखा नः सुसुखो भव । शेव इति सुखनाम । शिष्यतेः । वकारो नामकरणः । अन्तस्थान्तरोपलिङ्गी । विभाषितगुणः । शिवमित्यप्यस्य भवति । यद्यद्रूपं कामयते तत्तद्देवता भवति[4] ।

रूपं रूपं मघवा बोभवीति[5] । इत्यपि निगमो भवति ।

वाचस्पतिर्वाचः पाता वा[6] पालयिता वा । तस्यैषा भवति ॥ १७ ॥

पुनरेहि वाचस्पते देवेन मनसा सह ।
वसोष्पते नि रामय मय्येव तन्वं मम[7] ॥

इति सा निगदव्याख्याता ।

अपां नपात्तनूनप्त्रा व्याख्यातः[8] । तस्यैषा भवति ॥ १८ ॥

यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईळते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय[9] ॥

योऽनिध्मो [दीदयद्[10]] दीप्यते[11]ऽभ्यन्तरमप्सु यं मेधाविनः स्तुवन्ति यज्ञेषु सोऽपांनपान्मधुमतीरपो देह्यभिषवाय । याभिरिन्द्रो वर्धते । वीर्याय वीरकर्मणे ।

यमो यच्छतीति सतः[12] । तस्यैषा भवति ॥ १९ ॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य[13] ॥

---

१. वास्तु वसतेः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

२. Cf. BD. ii. 44.

३. RV. VII. 55. 1.

४. Cf. SRV. VII. 56. 1. p. iii. 114: यद्यद्रूपं कामयन्ते तत्तद्देवता विशन्तीति यास्कः ।

५. RV. III. 53. 8.

६. Cf. BD. ii. 45.

७. AV. 1. 1. 2.

८. N. 8. 5.

९. RV. X. 30. 4; AV. 14. 1. 37.

१०. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

११. दीप्यसे C 1, C 2, C 3, C 6, M 1, M 4, S; Durga & S'ivadatta.

१२. Cf. BD. ii. 48.

१३. RV. X. 14. 1; cf. AV. 18. 1. 49.

परेयिवांसं पर्यागतवन्तम् । प्रवत उद्वतो निवत इति । अवतिर्गतिकर्मा । बहुभ्यः पन्थानमनुपस्पाशयमानम्[1] । वैवस्वतम् । संगमनं जनानाम् । यमं राजानं हविषा दुवस्येति । दुवस्यतिराप्नोतिकर्मा[2] ।

अग्निरपि यम उच्यते । तमेता ऋचोऽनुप्रवदन्ति ॥ २० ॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका[3] ॥

यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्[4] ॥

तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम्[5] ॥

इति द्विपदाः । सेनेव सृष्टा भयं वा बलं वा दधाति । अस्तुरिव दिद्युत्त्वेषप्रतीका[6] । भयप्रतीका । [बलप्रतीका यशःप्रतीका[7]][8] महाप्रतीका[9] दीप्तप्रतीका वा ।

यमो ह जात इन्द्रेण सह संगतः[10] ।

यमाविहेह मातरा[11] ॥

इत्यपि निगमो भवति ।

यम इव जातः । यमो जनिष्यमाणः । जारः कनीनाम् । जरयिता कन्यानाम् । पतिर्जनीनाम् । पालयिता जायानाम् । तत्प्रधाना हि यज्ञसंयोगेन भवन्ति ।

तृतीयो अग्निष्टे पतिः[12] । इत्यपि निगमो भवति[13] ।

तं वः । चराथा चरन्त्या । पश्वाहुत्या । वसत्या च । निवसन्त्या । औषधाहुत्या । अस्तं यथा गाव आप्नुवन्ति तथाप्नुयाम[14] । इद्धं समृद्धं भोगैः ।

मित्रः प्रमीतेः[15] । त्रायते । संमिन्वानो द्रवतीति वा । मेदयतेर्वा[16] । तस्यैषा भवति ॥ २१ ॥

---

१. पन्थामनुपस्पा° C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

२. दुवस्यती राप्नोतिकर्मा C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

३. RV. I. 66. 7.

४. RV. I. 66. 8.

५. RV. I. 66. 9.

६. Quoted by SRV. I. 66. 8. p. i. 325.

७. यशःप्रतीका is omitted by Roth.

८. बलप्रतीका यशःप्रतीका is omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3, & Durga.

९. महप्रतीका C 4, C 5, M 3, Mi, W 2, W 3.

१०. The quotation is untraced.

११. RV. VI. 59. 2.

१२. RV. X. 85. 40; AV. 14. 2. 3.

१३. Cf. SRV. I. 66. 8. p. i. 325.

१४. The passage तं वश्चराथा......आप्नुयाम is quoted by SRV. I. 66. 10. p. i. 326.

१५. प्रमीयतेः C 4, C 5, C 7, M 3, Mi, W 1, W 3. Cf. SRV. I. 156. 1. p. i. 667.

१६. मेदतेः M 3.

मि॒त्रो जनां॑न्यातयति ब्रुवा॒णो मि॒त्रो दा॑धार पृथि॒वीमु॒त द्याम्।
मि॒त्रः कृ॒ष्टीरनि॑मिषा॒भि च॑ष्टे मि॒त्राय॑ ह॒व्यं घृ॒तव॑ज्जुहोत॑ ॥[1]

मित्रो जनानायातयति[2] प्रब्रुवाणः[3] शब्दं कुर्वन्। मित्र एव धारयति पृथिवीं च दिवं च। मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति। कृष्टय इति मनुष्यनाम। कर्मवन्तो भवन्ति। विकृष्टदेहा वा। मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातम्। जुहोतिर्दानकर्मा।[4]

कः कमनो वा। क्रमणो वा। सुखो वा[5]। तस्यैषा भवति ॥ २२ ॥

हि॒र॒ण्य॒ग॒र्भः सम॑वर्तता॒ग्रे भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्।
स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥[6]

हिरण्यगर्भो हिरण्यमयो गर्भः। हिरण्यमयो गर्भोऽस्येति वा। गर्भो गृभेः। गृणात्यर्थे। गिरत्यनर्थानिति वा। यदा हि स्त्री गुणान्गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति। समभवदग्रे भूतस्य जातः पतिरेको बभूव। स धारयति पृथिवीं च दिवं च। कस्मै देवाय हविषा विधेमेति व्याख्यातम्। विधतिर्दानकर्मा।

सरस्वान्व्याख्यातः[7]। तस्यैषा भवति ॥ २३ ॥

ये ते॑ सरस्व[8] ऊ॒र्मयो॒ मधु॑मन्तो घृत॒श्चुतः॑।
तेभि॑र्नोऽवि॒ता भ॑व[9] ॥

इति सा निगदव्याख्याता ॥ २४ ॥

विश्वकर्मा सर्वस्य कर्ता[10]। तस्यैषा भवति ॥ २५ ॥

वि॒श्वक॑र्मा॒ विम॑ना॒ आद्विहा॑या धा॒ता वि॑धा॒ता प॑र॒मोत सं॒दृक्।
तेषा॑मि॒ष्टानि॒ समि॒षा म॑दन्ति॒ यत्रा॑ सप्तऋ॒षीन्प॒र एक॑मा॒हुः ॥[11]

१. RV. III. 59. 1.

२. जनान्यातयति SRV. III. 59. 1. p. ii. 328.

३. ब्रुवाणः C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

४. जुहोतिर्दानकर्मा is omitted by Durga. The entire passage मित्रो जनान्......दानकर्मा is quoted by SRV. III. 59. 1. p. ii. 328.

५. Cf. BD. ii. 47.

६. RV. X. 121. 1; AV. 4. 2. 7; VS. 13. 4; 23. 1; 25. 10.

७. N. 2. 23. Cf. BD. ii. 51.

८. सरस्वन् C 1, C 2, C 6, M 1, M 4, S, Durga & S'ivadatta.

९. RV. VII. 96. 5.

१०. Cf. BD. ii. 50.

११. RV. X. 82. 2; VS. 17. 26.

विश्वकर्मा विभूतमना व्याप्ता[1] धाता च । विधाता च । परमश्च संद्रष्टा[2] भूतानाम् । तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वा । अद्भिः सह संमोदन्ते यत्रैतानि सप्तऋषीणानि ज्योतींषि । तेभ्यः पर आदित्यः । तान्येतस्मिन्नेकं भवन्तीत्यधिदैवतम् ।

अथाध्यात्मम् । विश्वकर्मा विभूतमना व्याप्ता धाता च । विधाता च । परमश्च संदर्शयितेन्द्रियाणाम् । एषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वा । अन्नेन सह संमोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाणि । एभ्यः पर आत्मा । तान्यस्मिन्[3]नेकं भवन्तीत्यात्मगतिमाचष्टे ।

तत्रेतिहासमाचक्षते । विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार । स आत्मानमप्यन्ततो जुहवाञ्चकार । तदभिवादिन्येषर्ग्भवति[4] ।

य इमा विश्वा भुवनानि जुह्वत्[5] । इति ।

तस्योत्तरा भूयसे निर्वचनाय ॥ २६ ॥

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु[6] ॥

विश्वकर्मन्हविषा वर्धयमानः[7] स्वयं यजस्व पृथिवीं च दिवं च । मुह्यन्त्वन्ये अभितो जनाः सपत्नाः । इहास्माकं मघवा सूरिरस्तु प्रज्ञाता ।

ताक्ष्यंस्त्वष्ट्रा व्याख्यातः । तीर्णेऽन्तरिक्षे क्षियति । तूर्णमर्थं[8] रक्षति । अश्नोते[9]र्वा । तस्यैषा भवति ॥ २७ ॥

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये ताक्ष्यमिहा हुवेम[10] ॥

तं भृशमन्नवन्तम् । जूतिर्गतिः । प्रीतिर्वा । देवजूतं देवगतं देवप्रीतं वा[11] ।

---

१. Cf. SRV. X. 82. 2. p. IV. 247: अत्र विश्वकर्मा विभूतमना व्याप्तेत्यादि निरुक्तमनुसन्धेयम् ।

२. संद्रष्टा C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

३. तान्येतस्मिन् C 1, C 2, C 3, C 6, C 7, M 1, M 4, S.

४. The passage विश्वकर्मा......भवति is quoted by SRV. X. 81. 1. p. IV. 244. Cf. S'B. XIII. 7. 1.

५. RV. X. 81. 1; VS. 17. 17.

६. RV. X. 81. 6; SV. 2. 939; VS. 17. 22.

७. Quoted by SRV. X. 81. 6. p. IV. 246.

८. N. 8. 13.

९. Cf. BD. ii. 58.

१०. RV. X. 178. 1; AV. VII. 85. 1; SV. 1. 332.

११. SRV. X. 178. 1. p. IV. 503: देवगतं is omitted by Sāyaṇa.

सहस्वन्तं तारयितारं रथानामरिष्टनेमिं पृतनाजितम्। आशुं स्वस्तये तार्क्ष्यमिह ह्वयेमेति।

कमन्यं मध्यमादेवमवक्ष्यत्[1]।

तस्यैषापरा भवति ॥ २८ ॥

सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम्[2] ॥

सद्योऽपि यः शवसा बलेन तनोत्यपः सूर्य इव ज्योतिषा पञ्च मनुष्यजातानि। सहस्रसानिनी शतसानिन्यस्य सा गतिः। न स्मैनां वारयन्ति प्रयुवतीमिव शरमयीमिषुम्[3]।

मन्युर्मन्यतेः[4]। दीप्तिकर्मणः। क्रोधकर्मणः [वधकर्मणो[5]] वा[6]। मन्य-[7]न्त्यस्मादिषवः[8]।

तस्यैषा भवति ॥ २९ ॥

त्वया मन्यो सरथमारुजन्तो हर्षमाणासोऽधृषिता मरुत्वः।
तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः[9] ॥

त्वया मन्यो सरथमारुह्य रुजन्तो[10] हर्षमाणासोऽधृषिता मरुत्वस्तिग्मेषव आयुधानि संशिश्यमाना अभिप्रयन्तु नरः। अग्निरूपा अग्निकर्माणः। सन्नद्धाः कवचिन इति वा।

दधिक्रा व्याख्यातः[11]। तस्यैषा भवति ॥ ३० ॥

---

१. अवक्षत् C 4, C 5, C 7, M 3, Mi, W 1, W 3.

२. RV. X. 178. 3.

३. Quoted by SRV. X. 178. 3. p. IV. 504.

४. Cf. BD. ii. 53.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

६. Quoted by SRV. II. 24. 2; X, 83. 1; 87. 13; pp. ii. 70; IV. 249. 275.

७. मन्युन्त्य° Roth.

८. मन्यन्त्यस्मादिषवः is omitted by Durga.

९. RV. X. 84. 1; AV. 4. 31. 1.

१०. Cf. SRV. X. 84. 1. p. IV. 251,

११. N. 2. 27.

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि[१] ॥

आतनोति दधिक्राः [शवसा[२]] बलेनापः सूर्य इव ज्योतिषा पञ्च मनुष्यजातानि । सहस्रसाः शतसा । वाजी वेजनवान् । अर्वा ईरणवान् । संपृणक्तु नो मधुनोदकेन वचनानीमानीति । मधु धमतेर्विपरीतस्य ।

सविता सर्वस्य प्रसविता[३] । तस्यैषा भवति ॥ ३१ ॥

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् ।
अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम्[४] ॥

सविता यन्त्रैः पृथिवीमरमयदनारम्भणे[५]ऽन्तरिक्षे । सविता द्यामदृंहत् । अश्वमिवाधुक्षद्धुनिमन्तरिक्षे मेघम् । बद्धमतूर्ते । बद्धमतूर्ण इति वा । अत्वरमाण इति वा । सविता समुदितार[६]मिति ।

कमन्यं मध्यमादेवमवक्ष्यत्[७] । आदित्योऽपि सवितोच्यते[८] । तथा च हैरण्यस्तूपे[९] स्तुतः । अर्चन्हिरण्यस्तूप ऋषिरिदं सूक्तं प्रोवाच । तदभिवादिन्येषर्ग्भवति ॥ ३२ ॥

हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे[१०] अस्मिन् ।
एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम्[११] ॥

हिरण्यस्तूपो हिरण्यमयः स्तूपः । हिरण्यमयः स्तूपोऽस्येति वा । स्तूपः स्त्यायतेः संघातः । सवितर्यथा त्वाङ्गिरसो जुह्वे वाजेऽन्नेऽस्मिन्नेवं त्वार्चन् । अवनाय वन्दमानः सोमस्येवांशुं प्रतिजागर्म्यहम्[१२] ।

---

१. RV. IV. 38. 10.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

३. Cf. BD. ii. 62.
Cf. S'B. I. 1. 2. 17.
सविता वै देवानां प्रसविता ।

४. RV. X. 149. 1.

५. ०नालम्बने C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. Quoted by SRV. X. 149. 1. p. IV. 467.

७. कमन्यमादित्यादेवमवक्ष्यत् W 2; कमन्यमादित्यादेवमवक्षत् C 4, C 5, M 3, Mi, W 1, W 3.

८. Cf KB. VII. 6. असौ वै सविता योऽसौ तपति ।

९. हिरण्यस्तूपे C 4, C 5, M 3, Mi, W 1, W 2, W 3; हि is corrected to है in C 7.

१०. वोजे Roth.

११. RV. X. 149. 5.

१२. Quoted by SRV. X. 150. 5. p. IV. 468.

त्वष्टा व्याख्यातः[1] । तस्यैषा भवति ॥ ३३ ॥

देवस्त्वष्टा सविता विश्वरूपः पुपोष[2] प्रजाः पुरुधा जजान ।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम्[3] ॥

देवस्त्वष्टा सविता सर्वरूपः पोषति प्रजा रसानुप्रदानेन । बहुधा चेमा जनयति । इमानि च सर्वाणि भूतान्युदकान्यस्य । महच्चास्मै देवानामसुरत्वमेकम्[3] । प्रज्ञावत्त्वं वा । अनवत्त्वं वा । अपि वासुरिति प्रज्ञानाम । अस्यत्यनर्थान् । अस्ताश्चास्यामर्थाः[4] । असुरत्वमादिलुप्तम् ।

वातो वातीति सतः । तस्यैषा भवति ॥ ३४ ॥[5]

वात आ वातु भेषजं शंभु मयोभु नो हृदे ।
प्र ण आयूंषि तारिषत् ॥

वात आवातु भैषज्यानि । शंभु मयोभु च नो हृदयाय । प्रवर्धयतु[6] च न आयुः ।

अग्निर्व्याख्यातः[7] । तस्यैषा भवति ॥ ३५ ॥[8]

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे ।
मरुद्भिरग्न आ गहि[9] ॥

तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे । सोऽग्ने मरुद्भिः सहागच्छेति ।

कमन्यं मध्यमादेवमवक्ष्यत्[10] । तस्यैषापरा भवति ॥ ३६ ॥

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ।
मरुद्भिरग्न आ[11] गहि ॥

अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय । सोम्यं मधु सोममयम् । सोऽग्ने मरुद्भिः सहागच्छेति ॥ ३७ ॥

वेनो वेनतेः कान्तिकर्मणः[12] । तस्यैषा भवति ॥ ३८ ॥

---

१. N. 8. 13.

२. RV. III. 55. 19; AV. 18. 1. 5.

३. ०मेकत्वम् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

४. ०मनर्थाः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. RV. X. 186. 1; SV. 1. 184; 2. 1190.

६. प्रवर्धय च C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

७. N. 7. 14.

८. RV. I. 19. 1; SV. 1. 16.

९. Quoted by SRV. I. 19. 1. p. i. 107.

१०. अवक्षत् C 4, C 5, C 7, M 3, Mi; W 1, W 2, W 3.
Cf. BD. iii. 76.

११. RV. I. 19. 9; VIII. 3. 7; AV. 20. 99. 1; SV. 1. 256; 2. 923.

१२. Quoted by SRV. IX. 73. 2; 97. 22; X. 64. 2. pp. iii. 717, 782; IV. 193; Cf. BD. ii. 52.

24

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥[1]

अयं वेनश्चोदयत्। पृश्निगर्भाः प्राष्टवर्णगर्भाः। आप इति वा। ज्योतिर्जरायुः। ज्योतिरस्य जरायुस्थानीयं भवति। जरायु जरया गर्भस्य। जरया यूयत इति वा। इममपां च संगमने सूर्यस्य च शिशुमिव विप्रा मतिभी रिहन्ति। लिहन्ति। [स्तुवन्ति[2]।] वर्धयन्ति। पूजयन्तीति वा। शिशुः शंसनीयो भवति। शिशीतेर्वा स्यात् दानकर्मणः। चिरलब्धो गर्भो भवति[3]।

असुनीतिः। असून्नयति[4]। तस्यैषा भवति[5] ॥ ३९ ॥

असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः ।
रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व[6] ॥

असुनीते मनोऽस्मासु धारय। चिरं जीवनाय। प्रवर्धय च न आयू रन्धय च नः सूर्यस्य संदर्शनाय।

रध्यतिर्वशगमनेऽपि दृश्यते।

मा रधाम द्विषते सोम राजन्[7]। इत्यपि निगमो भवति।

घृतेन त्वमात्मानं तन्वं वर्धयस्व।

ऋतो व्याख्यातः[8]। तस्यैषा भवति ॥ ४० ॥

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति ।
ऋतस्य श्लोको[9] बधिरा ततर्द कर्णा बुधानः शुचमान आयोः[10] ॥

ऋतस्य हि शुरुधः सन्ति पूर्वीः। ऋतस्य प्रज्ञा वर्जनीयानि हन्ति। ऋतस्य श्लोको बधिरस्यापि कर्णावातृणत्ति। बधिरो बद्धश्रोत्रः। कर्णौ बोधयन्। दीप्यमानश्च। [आयोः[11]] अयनस्य[12] मनुष्यस्य। ज्योतिषो वोदकस्य वा।

इन्दुरिन्धेः। उनत्तेर्वा। तस्यैषा भवति ॥ ४१ ॥

---

१. RV. X. 123. 1; VS. 7. 16.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

३. इति C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

४. Cf. BD. ii. 54.

५. Op. cit. VII. 93.

६. RV. X. 59. 5.

७. RV. X. 128. 5; AV. 5. 3. 7.

८. N. 2. 25; 3. 4; 4. 9; 6. 22.

९. श्लोका Roth.

१०. RV. IV. 23. 8.

११. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

१२. अयनश्च W 2.

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो असदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥[1]

प्रब्रवीमि तद् भव्यायेन्दवे । हवनार्ह इव । य इषवानन्नवान् । कामवान्वा । मननानि च नो रेजयति । रक्षोहा च । बलेन रेजयति । स्वयं सोऽस्मदमिनिन्दितारम् । वधैरजेत दुर्मतिम् । अवस्रवेदघशंसः । ततश्चावतरं क्षुद्रमिवावस्रवेत् । अभ्यासे भूयाँसमर्थं मन्यन्ते । यथा । अहो दर्शनीय । अहो दर्शनीय इति ।

तत्परुच्छेपस्य शीलम् । परुच्छेप ऋषिः । [पर्ववच्छेपः[2] ।] परुषिपरुषि शेपोऽस्येति वा ।

इतीमानि सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि । सूक्तभाञ्जि हविर्भाञ्जि[3] । तेषामेतान्यहविर्भाञ्जि । वेनः । असुनीतिः । ऋतः । इन्दुः ।

प्रजापतिः प्रजानां पाता वा पालयिता वा । तस्यैषा भवति ॥ ४२ ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्[4] ॥

प्रजापते न हि त्वदेतान्यन्यः सर्वाणि जातानि तानि परिबभूव[5] । यत्कामास्ते जुहुमः । तन्नो अस्तु । वयं स्याम पतयो रयीणाम् । इत्याशीः ।

अहिर्व्याख्यातः[6] । तस्यैषा भवति ॥ ४३ ॥

अब्जामुक्थैरहिं[7] गृणीषे बुध्ने नदीनां रजस्सु षीदन्[8] ॥[9]

अप्सुजमुक्थैरहिं[10] गृणीषे बुध्ने नदीनां रजस्सु [उदकेषु[11]] सीदन्[12] । बुध्नमन्तरिक्षम् । बद्धा अस्मिन्धृता आप [इति वा][13] । इदमपीतरद् बुध्नमेतस्मादेव । बद्धा अस्मिन्धृताः प्राणा इति ।

---

१. RV. I. 129. 6.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3; added on the margin in C 7; explained by Durga.

३. Cf. BD. i. 17; VIII. 129.

४. RV. X. 121. 10; AV. 7. 80. 3; VS. 10. 20; 23. 65.

५. परि तानि बभूव C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. N. 2. 17.

७. ०मुक्रैर० C 7.

८. रजः सुषीदन् M 3, W 2; रजस्सुषीदनु C 7; रजस्सुषीदन् W 3.

९. RV. VII. 34. 16

१०. अप्सुजामु० C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

११. Omitted by BK, C 4, C 5. C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

१२. षीदन् Roth.

१३. इति वा is omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

Cf. SRV. VII. 34. 16. p. iii. 80: बुध्ने नदीनां रजःसूदकेषु सीदन् बुध्नमन्तरिक्षम् । बद्धा अस्मिन्धृता आप इति ।; cf. also VII. 6. 7. p. iii. 19. तथा च यास्कः । बुध्नमन्तरिक्षम् । बद्धा अस्मिन्धृता आप इति वा ।

योऽहिः स बुध्न्यः। बुध्नमन्तरिक्षम्। तन्निवासात्[1]। तस्यैषा भवति॥ ४४॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः[3]।

मा च नोऽहिर्बुध्न्यो रेषणाय धात्। मास्य यज्ञोऽस्य च स्रिधत्। यज्ञकामस्य।

सुपर्णो व्याख्यातः[4]। तस्यैषा भवति॥ ४५॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम्[5]॥

एकः सुपर्णः स समुद्रमाविशति। स इमानि सर्वाणि भूतान्यभिविपश्यति। तं पाकेन मनसापश्यमन्तितः। इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवति। आख्यानसंयुक्ता। तं माता रेळ्हि[6]। वागेषा माध्यमिका। स उ मातरं रेळ्हि[6]।

पुरूरवा बहुधा रोरूयते[7]। तस्यैषा भवति॥ ४६॥

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्यः स्वगूर्ताः।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः[8]॥

समासतास्मिञ्जायमाने। ग्ना गमनादापः। देवपत्न्यो वा। अपि चैनमवर्धयन्। नद्यः [स्वगूर्ताः][9] स्वयंगामिन्यः। महते च यत् त्वा पुरूरवः। रणाय रमणीयाय संग्रामायावर्धयन् दस्युहत्याय च देवा देवाः॥ ४७॥

॥ इति दशमोऽध्यायः॥

---

१. बुध्नो M 3.

२. Cf. BD. V. 166.

३. RV. VII. 34. 17; cf. V. 41. 16.

४. N. 4. 3; 7. 24.

५. RV. X. 114. 4.

६. रेढि C 1, C 2, C 6, M 4, R 2, R 3, S; Roth & S'ivadatta.

७. Cf. BD. ii. 59.

८. RV. X. 95. 7.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

[अथातो मध्यस्थाना [२]वायवा याह्यास[३]स्त्रोणासो [४]नीचीनबारन्त[५]मूंष्विमा[६] रुद्राय [८]यां ते दिद्युज्जराबोधा[९]दंर्दरुद्यो[१०] जात एव वि [११]वृंक्षान[१२]श्वापिनद्धम[१३]श्मास्यमवतं क्षेत्रस्य[१४] पतिः क्षेत्रस्य[१५] पतिना क्षेत्रस्य[१६]पतेऽमी[१७]वहा [१८]पुनरेहि यो [१९]अनिध्मः परेयि[२०]वांसं सेनेव[२१] सृष्टा मित्रो[२२] जनान्हिरण्य[२३]गर्भो ये[२४] ते सरस्व विश्व[२५]कर्मा सर्वस्य विश्व[२६]कर्मा विमना [२७]विश्वकर्मन्हविषा [२८]त्यमू षु [२९]सद्यश्चिद्यस्त्वया[३०] मन्यवा [३१]दधिक्राः सविता[३२] यन्त्रैर्हिरण्य[३३]स्तूपो दे[३४]वस्त्वष्टा [३५]वातं आ वातु [३६]प्रति [३७]त्यमभि त्वा [३८]वेनो वेनतेरयं [३९]वेनोऽ[४०]सुनीत ऋतस्य[४१] हि प्र [४२]तद्वोचेयं प्र[४३]जापतेऽ[४४]ब्जामुक्थैर्मा[४५] नोऽहिरे[४६]कः सुपर्णः [४७]समस्मिन्सप्तचत्वारिंशत् ॥]

॥ इत्युत्तरषट्के चतुर्थोऽध्यायः ॥

॥ इति निरुक्ते दशमोऽध्यायः समाप्तः ॥

Small figure on this page represents the corresponding section of the tenth chapter of the *Nirukta.*

अथैकादशोऽध्यायः ।

श्येनो व्याख्यातः[1] । तस्यैषा भवति ॥ १ ॥

आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरंन्धिरजहादरातीर्मदे सोमस्य मूरा अमूरः[2] ॥

आदाय श्येनोऽहरत्सोमम् । सहस्रं सवान् । अयुतं च सह । सहस्रं सहस्र[3]-साव्यमभिप्रेत्य । तत्रायुतं सोमभक्षाः[4] । तत्संबन्धेनायुतं दक्षिणा इति वा । तत्र पुरन्धिरजहादमित्रान्[5]दानानिति वा । मदे सोमस्य मूरा अमूरः [इति]। ऐन्द्रे च सूक्ते सोमपानेन च[6] स्तुतः । तस्मादिन्द्रं मन्यन्ते ।

ओषधिः सोमः सुनोतेः । यदेनमभिषुण्वन्ति । बहुलमस्य नैघण्टुकं वृत्तम् । आश्चर्यमिव प्राधान्येन ।

तस्य पावमानीषु निदर्शनायोदाहरिष्यामः ॥ २ ॥

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥

इति सा निगदव्याख्याता ।

अथैषापरा भवति । चन्द्रमसो वा । एतस्य वा ॥ ३ ॥

सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥

सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिमिति वृथासुतमसोममाह । सोमं यं ब्रह्माणो विदुरिति । न तस्याश्नाति कश्चनायज्वेत्यधियज्ञम् ।

---

१. N. 4. 24.

२. RV. IV. 26. 7. अमूरः Roth.

३. सहस्रं W 2.

४. ०भक्ष्याः M 3.

५. ०मित्रान्नदाना० M 3, W 2.

६. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

७. Omitted by C 2.

८. RV. IX. 1. 1; SV, 1. 468; 2. 39; VS. 26. 25.

९. RV. X. 85. 3; AV. 1[illegible]. 1. 3.

अथाधिदैवतम्। सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिमिति यजुःसुतमसोममाह। सोमं यं ब्रह्माणो विदुश्चन्द्रमसम्। न तस्याश्नाति कश्चनादेव इति।

अथैषापरा भवति। चन्द्रमसो वा। एतस्य वा॥ ४॥

यत्त्वा[1] देव प्र पिबन्ति तत आ प्यायसे पुनः।
वायुः सोमस्य रक्षिता समानां मास आकृतिः[2]॥

यत् त्वा देव प्रपिबन्ति तत आप्यायसे पुनरिति नाराशंसानभिप्रेत्य। पूर्वपक्षापरपक्षाविति वा। वायुः सोमस्य रक्षिता। वायुमस्य रक्षितारमाह। साहचर्यात्। रसहरणाद्वा। समानां संवत्सराणां मास आकृतिः सोमः। रूपविशेषैरोषधिः। चन्द्रमा वा।

चन्द्रमाश्चायन्[3]द्रमति। चन्द्रो माता। चान्द्रं मानमस्येति वा[4]। चन्द्रश्चन्दतेः[5]। कान्तिकर्मणः[6]। चन्दनमित्यप्यस्य भवति। चारु[7] द्रमति[8]। चिरं द्रमति। चमेर्वा पूर्वम्[9]। चारु रुचेर्विपरीतस्य।

तस्यैषा भवति॥ ५॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो वि दधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः[10]॥

नवोनवो भवति जायमानः। इति पूर्वपक्षादिमभिप्रेत्य। अह्नां केतुरुषसामेत्यग्रम्। इत्यपरपक्षान्तमभिप्रेत्य। आदित्यदैवतो द्वितीयः पाद इत्येके। भागं देवेभ्यो विदधात्यायन्। इत्यर्धमासेज्यामभिप्रेत्य। प्रवर्धयते चन्द्रमा दीर्घमायुः।

मृत्युर्मारयतीति सतः। मृतं च्यावयतीति[11] [वा[12]] शतबलाक्षो मौद्गल्यः। तस्यैषा भवति॥ ६॥

परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्[13]॥

---

१. RV. X. 85. 5; cf. AV. 14. 1. 14.

२. Cf. BD. VII. 144.

३. चान्द्रमिति M 3; चान्द्रमति W 2; चायन्द्रवति C 4, C, 5 C 7, Mi, W 1, W 3.

४. Cf. BD. VII. 129 B.

५. चन्द्रं चन्दतेः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. Quoted by SRV. VI. 65. 2. p. ii. 86.

७. वारु M 3.

८. द्रवति C 4, C 5, C 7, M 3, Mi, W 1, W 3; द्रवति is corrected to द्रमति on the margin in M 3.

९. Cf. BD. VII. 129 (B).

१०. RV. X. 85. 19; cf. AV. 7. 81. 2.

११. Cf. BD. ii. 60.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

१३. RV. X. 18. 1; AV. 12. 2. 21; VS. 35. 7.

परं मृत्यो । ध्रुवं मृत्यो । ध्रुवं परेहि मृत्यो । कथितं तेन मृत्यो । मृतं च्यावयते भवति मृत्यो । मदेर्वा मुदेर्वा । तेषामेषा भवति ॥ ७ ॥

त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वाम्[1]उरुष्यति ।
या मर्त्याय प्रतिधीयमानम्[2]इत्कृशानोरस्तुरसनामुरुष्यथः[3] ॥

इति सा निगदव्याख्याता ।

विश्वानरो व्याख्यातः[4] । तस्यैषा भवति ॥ ८ ॥

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः[5] ॥

प्रार्चत [यूयं][6] स्तुतिं महतेऽन्धसोऽन्नस्य दात्रे । मन्दमानाय मोदमानाय स्तूयमानाय[7] शब्दायमानायेति वा । विश्वानराय सर्वं विभूताय । इन्द्रस्य यस्य प्रीतौ सुमहद्बलम् । महच्च श्रवणीयं यशः । नृम्णं च बलं नृनतम्[8] । द्यावापृथिव्यौ वः परिचरत इति ।

कमन्यं मध्यमादेवमवक्ष्यत्[9] ।

तस्यैषापरा भवति ॥ ९ ॥

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्[10] ॥

उदशिश्रियत्[11] । ज्योतिः । अमृतम् । सर्वजन्यम् । विश्वानरः सविता देव इति ।

धाता सर्वस्य विधाता[12] । तस्यैषा भवति ॥ १० ॥

---

१. वामरुष्यति M 3.

२. प्रतिधायमान० C 2.

३. RV. I. 155. 2. The text परं मृत्यो... रसनामुरुष्यथ! is regarded as spurious by Roth. It is given however by MSS. of both the recensions but is ignored by the commentator Durga.

४. N. 7. 21.

५. RV. X. 50. 1; VS. 33. 23.

६. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

७. मोदमानाय स्तूयमानाय is omitted by Durga.

८. नन्नतं S'ivadatta.

९. ०प्रवक्षत् M 3.

१०. RV. VII. 76. 1.

११. उदशिश्रयत् C 4, C 5, M 3, Mi, W 1, W 2, W 3.

१२. Cf. BD. ii. 57.

धाता ददातु दाशुषे प्राचीं जीवातुमक्षिताम्[1] ।
वयं देवस्य धीमहि सुमतिं सत्यधर्मणः[2] ॥

धाता ददातु दत्तवते प्रवृद्धां जीविकाम्[3] अनुपक्षीणाम् । वयं देवस्य धीमहि सुमतिं कल्याणीं मतिं[4] सत्यधर्मणः ।

विधाता धात्रा व्याख्यातः । तस्यैष निपातो भवति बहुदेवतायामृचि[5] ॥ ११ ॥

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या[6] उ शर्मणि ।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम्[7] ॥

इत्येताभिर्देवताभिरभिप्रसूतः सोमकलशानभक्षयमिति । कलशः [कस्मात्] । कला अस्मिञ्छेरते मात्राः । कलिश्च कलाश्च किरतेः । विकीर्णमात्राः ॥ १२ ॥

अथातो मध्यस्थाना देवगणाः । तेषां[8] मरुतः प्रथमागामिनो भवन्ति । मरुतो मितराविणो[9] वा । मितरोचिनो[10] वा । महद्[11] द्रवन्तीति वा । तेषामेषा[12] भवति ॥ १३ ॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः[13] ॥

विद्युन्मद्भिर्मरुतः । स्वर्कैः स्वञ्चनैरिति वा । स्वर्चनैरिति वा । स्वर्चिभिरिति वा । रथैरायात । ऋष्टिमद्भिः । अश्वपर्णैरश्वपतनैः । वर्षिष्ठेन च नोऽन्नेन वय इवापतत । सुमायाः कल्याणकर्माणो वा । कल्याणप्रज्ञा वा[14] ।

रुद्रा व्याख्याताः[15] । तेषामेषा भवति ॥ १४ ॥

---

१. ०मक्षितिम् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

२. Cf. AV. 7. 17. 2:

धाता दधातु दाशुषे प्राचीं जीवातुमक्षिताम् ।
वयं देवस्य धीमहि सुमतिं विश्वराधसः ॥

३. जीविताम० C 4, C 5, M 3, Mi, W 1, W 3.

४. मतिं सुमतिं सत्यधर्मणः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. बहुदेवतामृचि C 4, C 5, M 3, Mi, W 1, W 3.

६. अनुमत्या is omitted by W 2.

७. RV. X. 167. 3. अभक्षम् C 4, C 5, C 7, Mi, W 1, W 2, W 3; अक्षभक्षं यं M 3.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

९. अमितराविणो is given as a variant by Durga.

१०. अमितरोचिनः is given as a variant by Durga.

११. महद्द्रवन्तीति वा Roth.

१२. तेषामेषामेषा C 4, C 5.

१३. RV. I. 88. 1.

१४. Quoted by SRV. I. 88. 1. p. i. 392.

१५. N. 10. 5.

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे[1] ॥

आगच्छत रुद्रा इन्द्रेण । सहजोषणाः । सुविताय कर्मणे । इयं वोऽस्मदपि प्रतिकामयते मतिः । तृष्णज इव दिव उत्सा उदन्यवे । तृष्णक् तृष्यतेः[2] । उदन्युरुदन्यतेः[3] ।

ऋभव उरु भान्तीति वा । ऋतेन भान्तीति वा । ऋतेन भवन्तीति वा[4] । तेषामेषा भवति ॥ १५ ॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः[5] ॥

कृत्वा कर्माणि क्षिप्रत्वेन । वोळ्हारो[6] मेधाविनो वा[7] । मर्तासः सन्तोऽमृतत्वमानशिरे । सौधन्वना ऋभवः सूरख्याना वा । सूरप्रज्ञा वा । संवत्सरे समपृच्यन्त [धीतिभिः[8]] कर्मभिः ।

ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः[9] । तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन[10] । तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्ति ।

आदित्यरश्मयोऽप्यृभव उच्यन्ते[11] ।

अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ[12] ।

अगोह्य आदित्योऽगूहनीयः । तस्य यदस्वपथ गृहे । यावत्तत्र भवथ न तावदिह भवथेति ।

अङ्गिरसो व्याख्याताः[13] । तेषामेषा भवति ॥ १६ ॥

विरूपास इदृषयस्त इद्गम्भीरवेपसः ।
ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे[14] ॥

---

१. RV. V. 57. 1.

२. तृप्यते C 1.

३. तृष्णक् तृष्यतेः । उदन्युरुदन्यतेः । is omitted by Durga.

४. Quotted by SRV. I. 20. 4. p. i. 110.

५. RV. I. 110. 4.

६. वोढारो C 1, C 2, C 3, C 6, M 4, S; Roth & S'ivadatta.

७. Quoted by SRV. III. 60. 4. p. ii. 332.

८. Omitted by BK, C 4, C 5, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

९. Cf. BD. iii. 83; cf. SRV. I. 110. 2, 4. pp. i. 480-1.

१०. Cf. BD. iii. 89 B; cf. SRV. I. 111. 4. p. i. 485.

११. Quoted by SRV. I. 161. 11. p. i. 682.

१२. RV. I. 161. 11.

१३. N. 3. 17.

१४. RV. X. 62. 5.

बहुरूपा ऋषयः। ते गम्भीरकर्माणो वा। गम्भीरप्रज्ञा वा। तेऽङ्गिरसः पुत्राः। तेऽग्नेरधिजज्ञिरे। इत्यग्निजन्म।

पितरो व्याख्याताः[1]। तेषामेषा भवति ॥ १७ ॥

उदी॑रता॒मव॑र॒ उत्परा॑स॒ उन्म॑ध्य॒माः पि॒तरः॑ सो॒म्यासः॑।
असुं॒ य ई॒युर॑वृ॒का ऋ॑त॒ज्ञास्ते नो॑ऽवन्तु पि॒तरो॒ हवे॑षु[2] ॥

उदीरतामवरे। उदीरतां परे। उदीरतां मध्यमाः पितरः। सोम्याः सोमसंपादिनः[3]। तेऽसुं ये प्राणमन्वीयुः[4]। अवृका अनमित्राः। सत्यज्ञा वा यज्ञज्ञा वा। ते न आगच्छन्तु पितरो ह्वानेषु।

माध्यमिको[5] यम इत्याहुः[6]। तस्मान्माध्यमिकान्पितॄन्मन्यन्ते।

अङ्गिरसो व्याख्याताः[7]। पितरो व्याख्याताः। भृगवो व्याख्याताः[8]। अथर्वाणोऽथनवन्तः। थर्वतिश्चरतिकर्मा। तत्प्रतिषेधः। तेषामेषा साधारणा भवति ॥१८॥

अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यासः॑।
तेषां॑ व॒यं सु॑म॒तौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौ॑म॒न॒से[10][11] स्या॑म[12] ॥

अङ्गिरसो नः पितरः। नवगतयो नवनीतगतयो[13] वा। अथर्वाणो भृगवः। सोम्याः सोमसम्पादिनः। तेषां वयम्। सुमतौ[13] कल्याण्यां मतौ। यज्ञियानामपि चैषाम्। भद्रे भन्दनीये। भाजनवति वा। कल्याणे मनसि। स्यामेति।

माध्यमिको[14] देवगण इति नैरुक्ताः। पितर इत्याख्यानम्।

अथाप्यृषयः स्तूयन्ते ॥ १९ ॥

सूर्य॑स्येव व॒क्षथो॒ ज्योति॑रेषां समु॒द्रस्ये॑व महि॒मा ग॑भी॒रः।
वात॑स्येव प्रज॒वो नान्येन॒ स्तोमो॑ वसिष्ठा॒ अन्वे॑तवे वः[15] ॥

---

१. N. 4. 21.

२. RV. X. 15. 1; AV. 18. 1. 44; VS. 19. 49.

३. Quoted by SRV. VI. 75. 10. p. ii. 890.

४. प्राणसुन्वीयुः C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. माध्यमको C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. Cf. BD. VI. 155:
अत्र स्तूयते मध्यमो यमः।

७. N. 3. 17.

८. N. 4. 21.

९. N. 3. 17.

१०. सौमनसे Roth.

११. RV. X. 14. 6; AV. 18. 1. 58.

१२. Quoted by SRV. I. 62. 4. p. i. 306.

१३. सुमतौ is placed between मतौ and यज्ञियानाम् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१४. माध्यमको C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१५. RV. VII. 33. 8.

इति यथा ।

आस्या आप्नोतेः । तेषामेष निपातो भवत्यैन्द्र्यामृचि ॥ २० ॥

स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्षते शवसा सप्त दानून्प्र साक्षते प्रतिमानानि भूरि[1] ॥

स्तोतव्यम् । बहुरूपम् । उरुभूतम् । ईश्वरतमम् । आप्तव्यम् । आप्तव्यानाम् । आदृणाति । यः । शवसा बलेन । सप्तदातॄनिति वा । सप्तदानवानिति वा । प्रसाक्षते । प्रतिमानानि । बहूनि । साक्षतिराप्नोतिकर्मा[2] ॥ २१ ॥

अथातो मध्यस्थानाः स्त्रियः । तासामदितिः प्रथमागामिनी भवति । अदितिर्व्याख्याता[3] । तस्या एषा भवति ॥ २२ ॥

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्थाः पुरुरथो[4] अर्यमा सप्तहोता विषुरूपेषु जन्मसु[5] ॥

दक्षस्य वादिते जन्मनि । व्रते कर्मणि[6] । राजानौ । मित्रावरुणौ । परिचरसि । विवासतिः परिचर्यायाम् ।

हविष्मा[7] आविवासति[8] ।

इत्याशास्तेर्वा । अतूर्तपन्था अत्वरमाणपन्थाः । बहुरथः[10] । अर्यमादित्य । अरीन्नियच्छति । सप्तहोता । सप्तास्मै रश्मयो रसानभिसन्नामयन्ति । सप्तैनमृषयः स्तुवन्तीति वा । विषमरूपेषु जन्मसु । कर्मसूदयेषु ।

आदित्यो दक्षः[11] । इत्याहुः । आदित्यमध्ये च स्तुतः । अदितिर्दाक्षायणी ।

अदितेर्दक्षो अजायत दक्षाद्वदितिः परि[12] । इति च ।

---

१. RV. X. 120. 6; AV. 20. 107. 9.

२. Quoted by SRV. X. 120. 8. p. IV. 399.

३. N. 4. 22, 23.

४. तुरुरथो C 7.

५. RV. X. 64. 5.

६. कर्मणि व्रते C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3. & SRV. X. 64. 5. p. IV. 194.

७. Quoted SRV. loc. cit.

८. हविष्मानाविवासति C 1, C 2, C 3, C 6, M 1, M 4, S; Roth.

९. RV. I. 12. 9; SV. 2. 196; VS. 6. 23.

१०. लघुरथः C 2.

११. The quotation is untraced. Durga attributes it to the *devatāstatvavidah i. e.* persons who know the reality of deity.

१२. RV. X. 72. 4.

तत्कथमुपपद्यते । समानजन्मानौ स्यातामिति । अपि वा देवधर्मेणेतरेतरजन्मानौ स्याताम् । इतरेतरप्रकृती[1] ।

अग्निरप्यदितिरुच्यते[2] । तस्यैषा भवति ॥ २३ ॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम[3] ॥

यस्मै त्वं सुद्रविणो ददासि[4] । अनागास्त्वम् । अनपराधत्वम्[5] । अदिते । सर्वासु कर्मततिषु । आग आङ्पूर्वाद्गमेः । एन एतेः । किल्बिषं किल्भिदम् । सुकृतकर्मणो भयम्[6] । कीर्तिमस्य भिनत्तीति वा । यं भद्रेण । शवसा बलेन । चोदयसि । प्रजावता च राधसा [धनेन[7]] ते वयमिह स्यामेति ।

सरमा सरणात्[8] । तस्या एषा भवति ॥ २४ ॥

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि[9] ॥

किमिच्छन्ती सरमेदं प्रानट्[10] । दूरे ह्यध्वा । जगुरिर्जङ्गम्यतेः । पराञ्चैरञ्चितः[11] । का तेऽस्मास्वर्थहितिरासीत् । किं परितकनम् । परितक्म्या रात्रिः[12] । परित एनां तक्म । तक्मेत्युष्णनाम । तकत इति सतः । कथं रसाया अतरः पयांसीति । रसा नदी रसतेः शब्दकर्मणः[13] । कथं रसानि तान्युदकानीति वा ।

देवशुनीन्द्रेण[14] प्रहिता पणिभिरसुरैः समूदे । इत्याख्यानम् ।

सरस्वती व्याख्याता[15] । तस्या एषा भवति ॥ २५ ॥

---

१. Quoted by SRV. X. 72. 4. p. IV. 225.

२. Cf. BD. IV. 18.

३. RV. I. 94. 15.

४. ददाशो C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. अनपराधित्वम् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. सुकृतकर्मणो भयम् is omitted by Durga.

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

८. Cf. Quoted by SRV. I. 62. 3. p. i. 305.

९. RV. X. 108. 1.

१०. प्रापद् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; SRV. X. 108. 1. p. IV. 361.

११. Quoted by SRV. I. 63. 4. p. i. 312.

१२. Quoted by SRV. I. 116. 15. p. i. 519.

१३. Quoted by SRV. I. 112. 12. p. i. 490; cf. also. V. 53. 9. p. ii. 618.

१४. Durga adds the following:

वाग्वै सरमेति हि विज्ञायते ।

पा॒व॒का नः॒ सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती ।
य॒ज्ञं व॑ष्टु धि॒याव॑सुः[1] ॥

पावका नः सरस्वती । अन्नैरन्नवती । यज्ञं वष्टु धियावसुः कर्मवसुः[2] ।

तस्या एषापरा भवति ॥ २६ ॥

म॒हो अर्णः॒ सर॑स्वती॒ प्र चे॑तयति के॒तुना॑ ।
धियो॒ विश्वा॒ वि रा॑जति[3] ॥

महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वा । इमानि च सर्वाणि प्रज्ञाना[4]न्यभिविराजति[5]। वागर्थेषु विधीयते । तस्मान्माध्यमिकां वाचं मन्यन्ते। वाग्व्याख्याता[6] । तस्या एषा भवति ॥ २७ ॥

यद्वाग्वद॑न्त्यविचेत॒नानि॒ राष्ट्री॑ दे॒वानां॑ निष॒साद॑ म॒न्द्रा ।
चत॑स्र ऊर्जं॑ दुदुहे॒ पयां॑सि॒ क्व॑ स्विदस्याः पर॒मं ज॑गाम[7] ॥

यद्वाग्वदन्ति । अविचेतनान्यविज्ञातानि । राष्ट्री देवानां निषसाद [मन्द्रा[8]] मदना । चतस्रोऽनुदिश ऊर्जं दुदुहे पयांसि । क्व स्विदस्याः परमं जगामेति । यत्पृथिवीं गच्छतीति वा । यदादित्यरश्मयो हरन्तीति वा[9] ।

तस्या एषापरा भवति ॥ २८ ॥

दे॒वीं वाच॑मजनयन्त दे॒वास्तां वि॒श्वरू॑पाः प॒शवो॑ वदन्ति ।
सा नो॑ म॒न्द्रेष॒मूर्जं॒ दुहा॑ना धे॒नुर्वाग॒स्मानुप॒ सुष्टु॒तैतु॑[10] ॥

देवीं वाचमजनयन्त देवाः । तां सर्वरूपाः[11] पशवो वदन्ति । व्यक्तवाचश्चाव्यक्तवाचश्च । सा नो मदनान्नं[12] च रसं च दुहाना धेनुर्वागस्मानुपैतु सुष्टुता[13] ।

---

१. RV. I. 3. 10; SV. 1. 189; VS. 20. 84.

२. Quoted by SRV. I. 3. 10. p. i. 39.

३. RV. I. 3. 12; VS. 20 86.

४. भूतान्यभि० C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. Quoted by SRV. I. 3. 12. p. i. 40.

६. N. 2. 23.

७. RV. VIII. 100. 10.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

९. Quoted by SRV. VIII. 100. 10. p. iii. 589.

१०. RV. VIII. 100. 11.

११. विश्वरूपाः SRV. VIII. 100. 11. p. iii. 590.

१२. मननान्नं C 4, C 5, C 7, M 3, Mi, W 1, W 3.

१३. Quoted by SRV. loc. cit.

अनुमति[1] राकेति देवपत्न्याविति नैरुक्ताः । पौर्णमास्याविति याज्ञिकाः ।

या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राका[2] । इति विज्ञायते ।

अनुमतिरनुमननात् । तस्या एषा भवति ॥ २९ ॥

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि ।
क्रत्वे दक्षाय नो हिनु[3] प्र ण आयूंषि तारिषः[4] ॥

अनुमन्यस्वानुमते । त्वं सुखं च नः कुरु । अन्नं च नोऽपत्याय धेहि । प्रवर्धय च न आयुः[5] ।

राका रातेर्दानकर्मणः । तस्या एषा भवति ॥ ३० ॥

राकाम[6]हं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्[7] ॥

राकामहं सुह्वानां सुष्टुत्या ह्वये । शृणोतु नः सुभगा । बोधत्वात्मना । सीव्यत्वपः प्रजननकर्म । सूच्याछिद्यमानया । सूची सीव्यतेः । ददातु वीरम् । शतप्रदम् । उक्थ्यं वक्तव्यप्रशंसम् ।

सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ताः । अमावास्ये इति याज्ञिकाः ।

या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूः[8] । इति विज्ञायते ।

सिनीवाली सिनमन्नं भवति । सिनाति भूतानि । वालं पर्व वृणोतेः । तस्मिन्नन्नवती । वालिनी वा । वालेनेवा[9]स्यामणुत्वाच्चन्द्रमाः सेवितव्यो[10] भवतीति वा ।

तस्या एषा भवति ॥ ३१ ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः[11] ॥

---

१. अनुमती Roth & S'ivadatta.

२. AB. VII. 11. 2; GB. II. 1. 10; Ṣaḍ. B. IV. 6; cf. KB. III. 1. KS. XII. 8: या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका । Schroeder's ed. vol. i. p. 170.

३. Durga reads: इषं च तोकाय नो हिनु

४. VS. 34. 8; cf. AV. 7. 20. 2:

अन्विदनुमते त्वं मंससे शं च नस्कृधि ।
जुषस्व हव्यमाहुतं प्रजां देवि ररास्व नः॥

५. आयूः C 4, C 5, C 7, M 3, Mi, W1, W 2, W 3.

६. शाकामहं C 7.

७. RV. II. 32. 4; AV. 7. 48. 1.

८. AB. VII. 11. 3; GB. II. 1. 10; Ṣaḍ. B. IV. 6; cf. KB. III. 1. KS. XII. 8: या पूर्वामावस्या सा सिनीवाली योत्तरा सा कुहूः । Schroeder's ed. vol. i. p. 170.

९. वालेनैव॰ Roth.

१०. सेतव्यो C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

११. RV. II. 32. 6; AV. 7. 46. 1; VS. 34. 10.

सिनीवालि । पृथुजघने । स्तुकः[1] स्त्यायतेः संघातः । पृथुकेशस्तुके । पृथुष्टुते वा[2] । या त्वं देवानामसि स्वसा । स्वसा सु असा । स्वेषु सीदतीति वा[3] । जुषस्व हव्यमदनम्[4] । प्रजां च देवि दिशः[5] नः ।

कुहूर्गूहतेः । क्वाभूदिति वा । क्व सती हूयत इति वा । क्वाहुतं हविर्जुहोतीति वा[6] ।

तस्या एषा भवति ॥ ३२ ॥

कुहूमहं सुकृतं[7] विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि ।
सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम[8] ॥

कुहूमहं सुकृतं विदितकर्माणमस्मिन्यज्ञे सुह्वानामाह्वये । सा नो ददातु श्रवणं पितॄणाम् । पित्र्यं धनमिति वा । पित्र्यं यश इति वा । तस्यै ते देवि हविषा विधेमेति व्याख्यातम् ।

यमी व्याख्याता[9] । तस्या एषा भवति ॥ ३३ ॥

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्[10] ॥

अन्यमेव हि त्वं यमि । अन्यस्त्वां परिष्वङ्क्ष्यते । लिबुजेव वृक्षम् । तस्य वा त्वं मन इच्छ । स वा तव । अधानेन कुरुष्व संविदम् । सुभद्रां कल्याणभद्राम् ।

यमी यमं चकमे । तां प्रत्याचचक्षे[11] । इत्याख्यानम् ॥ ३४ ॥

उर्वशी व्याख्याता[12] । तस्या एषा भवति ॥ ३५ ॥

---

१. स्तुकः स्त्यायतेः is omitted by Durga.

२. पृथुकेशस्तुका पृथुष्टुतिर्वा C 4, C 5, M 3, Mi, W 1, W 2, W 3; ...पृथुष्टुकिर्वा C 7; पृथुकेशस्तुके पृथुस्तुके वा Roth.

३. स्वसा...सीदतीति वा is omitted by Durga.

४. ०माहुतम् C 4, C 5, M 3, Mi, W 1, W 2, W 3; ०मादनम् C 7.

५. दिशि C 4, C 5, C 7 M 3, Mi, W 1, W 2, W 3.

६. क्वाहुतं हविर्जुहोतीति वा is omitted by Durga.

७. सुवृतं C 1, C 2, C 3, C 6, M 1, M4, S; Roth & S'ivadatta.

८. MS. IV. 12. 6. Cf. AV. 7. 47. 1:

कुहूं देवीं सुकृतं विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि ।
सा नो रयिं विश्ववारं नि यच्छाद् ददातु वीरं शतदायमुक्थ्यम् ॥

९. N. 10. 19.

१०. RV. X. 10. 14; cf. AV. 18. 1. 16.

११. प्रत्याचचक्षेत्याख्यानम् S'iva.

१२. N. 5. 13.

विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।
जनिष्ठो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥

विद्युदिव या । पतन्त्यद्योतत । हरन्ती मे अप्या काम्यानि । उदकान्यन्तरिक्षलोकस्य । यदा नूनमयं जायेताद्भ्योऽध्यप इति । नर्यो मनुष्यो नृभ्यो हितः । नरापत्यमिति वा । सुजातः सुजाततरः । अथोर्वशी प्रवर्धयते दीर्घमायुः ।

पृथिवी व्याख्याता । तस्या एषा भवति ॥ ३६ ॥

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।
प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥

सत्यं त्वं पर्वतानां मेघानां खेदनं छेदनं [भेदनं] बलमत्र धारयसि पृथिवि । प्रजिन्वसि या भूमिम् । प्रवणवति । महत्त्वेन । महतीत्युदकवतीति वा ।

इन्द्राणी । इन्द्रस्य पत्नी । तस्या एषा भवति ॥ ३७ ॥

इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पतिः ।
विश्वस्मादिन्द्र उत्तरः ॥

इन्द्राणीमासु नारिषु सुभगामहमशृणवम् । न ह्यस्या अपरामपि समां जरया म्रियते पतिः । सर्वस्माद् य इन्द्र उत्तरस्तमेतद् ब्रूमः ।

तस्या एषापरा भवति ॥ ३८ ॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति ।
विश्वस्मादिन्द्र उत्तरः ॥

नाहमिन्द्राणि रमे । सख्युर्वृषाकपेर्ऋते । यस्येदमप्यं हविः । अप्सु शृतम् । अद्भिः संस्कृतमिति वा । प्रियं देवेषु निगच्छति । सर्वस्माद् य इन्द्र उत्तरस्तमेतद् ब्रूमः ।

---

१. RV. X. 95. 10.

२. पतन्तं M 3.

३. N. 1. 13, 14.

४. RV. V. 84. 1.

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

६. RV. X. 86. 11; AV. 20. 126. 11.

७. जरयां M 3, W 2.

८. म्रियेते M 3.

९. RV. X. 86. 12; AV. 20. 126. 12.

१०. नियच्छति is given as a variant by Durga.

गौरी रोचतेः। ज्वलतिकर्मणः। अयमपीतरो गौरो वर्ण एतस्मादेव। प्रशस्यो भवति।

तस्या एषा भवति ॥ ३९ ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

गौरीर्निर्मिमाय सलिलानि। तक्षती कुर्वती। एकपदी मध्यमेन। द्विपदी मध्यमेन चादित्येन च। चतुष्पदी दिग्भिः। अष्टापदी दिग्भिश्चावान्तरदिग्भिश्च। नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च। सहस्राक्षरा बहूदका। परमे व्यवने।

तस्या एषापरा भवति ॥ ४० ॥

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥

तस्याः समुद्रा अधिविक्षरन्ति। वर्षन्ति मेघाः। तेन जीवन्ति दिगाश्रयाणि भूतानि। ततः क्षरत्यक्षरमुदकम्। तत्सर्वाणि भूतान्युपजीवन्ति।

गौर्व्याख्याता। तस्या एषा भवति ॥ ४१ ॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥

गौरन्वमीमेद्वत्सम्। मिषन्तमनिमिषन्तम्। आदित्यमिति वा। मूर्धानमस्याभिहिङ्ङकरोन्मननाय। सृक्वाणं सरणम्। घर्मं हरणम्। अभिवावशाना मिमाति मायुम्। प्रप्यायते पयोभिः। मायुमिवादित्यमिति वा।

वागेषा माध्यमिका। घर्मधुगिति याज्ञिकाः।

धेनुर्धयतेर्वा। धिनोतेर्वा। तस्या एषा भवति ॥ ४२ ॥

---

१. RV. I. 164. 41; cf. AV. 9. 10. 21.

२. गौरीर्मिमाय SRV. I. 164. 41. p. i. 715.

३. Quoted by SRV. loc. cit.

४. RV. I. 164. 42; AV. 9. 10. 22; 13. 1. 42.

५. Quoted by SRV. I. 164. 42. p. i. 716.

६. N. 2. 5.

७. RV. I. 164. 28; cf. AV. 9. 10. 6.

८. गौरन्नमीमे° W 2.

९. इषन्तम° W 2; निमिषन्तम° C 1, C 2, C 3, C 6, M 1, M 4, S; C 4, C 5, W 1, W 3, and Roth.

उप॑ ह्वये सु॒दुघां॑ धे॒नुमे॒तां सु॒हस्तो॑ गो॒धुगु॒त दो॑हदेनाम् ।
श्रेष्ठं॑ स॒वं स॑वि॒ता सा॑विषन्नो॒ऽभी॑द्धो घ॒र्मस्तदु॒ षु प्र वो॑चम् ॥

उपह्वये सुदोहनां धेनुमेताम् । कल्याणहस्तो गोधुगपि च दोग्ध्येनाम् । श्रेष्ठं सवं सविता सुनोतु न इति । एष हि श्रेष्ठः सर्वेषां सवानां यदुदकं यद्वा पयो यजुष्मत् । अभीद्धो घर्मः । तं सु प्रब्रवीमि ।

वागेषा माध्यमिका । घर्मधुगिति याज्ञिकाः ।

अघ्न्याहन्तव्या भवति । अघघ्नीति वा । तस्या एषा भवति ॥ ४३ ॥

सू॒य॒व॒साद्भग॑वती॒ हि भू॒या अथो॑ व॒यं भग॑वन्तः स्याम ।
अ॒द्धि तृण॑मघ्न्ये विश्व॒दानीं॒ पिब॑ शु॒द्धमु॒द॒कमा॒चर॑न्ती ॥

सूयवसादिनी भगवती हि भव । अथेदानीं वयं भगवन्तः स्याम । अद्धि तृणमघ्न्ये । सर्वदा पिब च शुद्धमुदकमाचरन्ती ।

तस्या एषापरा भवति ॥ ४४ ॥

हि॒ङ्कृ॒ण्व॒ती व॑सु॒पत्नी॒ वसू॑नां व॒त्सम॒िच्छन्ती॒ मन॑सा॒भ्याग॑त् ।
दु॒हाम॒श्विभ्यां॒ पयो॑ अ॒घ्न्येयं सा व॑र्धतां मह॒ते सौभ॑गाय ॥

इति सा निगदव्याख्याता ।

पथ्या स्वस्तिः । पन्था अन्तरिक्षम् । तन्निवासात् ।

तस्या एषा भवति ॥ ४५ ॥

स्व॒स्तिरिद्धि प्रप॑थे॒ श्रेष्ठा॒ रेक्ण॑स्वत्य॒भि या वा॒ममेति॑ ।
सा नो॑ अ॒मा सो अर॑णे॒ नि पा॑तु स्वावे॒शा भ॑वतु दे॒वगो॑पा ॥

स्वस्तिरेव हि प्रपथे श्रेष्ठा । रेक्णस्वती धनवती । अभ्येति या । वसूनि वननीयानि । सा नोऽमा गृहे । सा निरमणे । सा निर्गमने पातु । स्वावेशा भवतु । देवी गोप्त्री देवान्गोपायत्विति । देवा एनां गोपायन्त्विति वा ।

उषा व्याख्याता । तस्या एषा भवति ॥ ४६ ॥

---

१. RV. I. 164. 26; AV. 7. 73. 7; 9. 10. 4.

२. सुदुघां C 4, C 5, C 7, M 3, M₄, W 1, W 2, W 3.

३. RV. I. 164. 40; AV. 7. 73. 11; 9. 10. 20.

४. सुयवसादिनी SRV. I. 164. 40. p. i. 715; & Roth.

५. Quoted by SRV. loc. cit.

27; AV. 7. 73. 8; 9.

७. Quoted by SRV. X. 59. 7. p. iv.

८. RV. X. 63. 16.

९. N. 2. 18.

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी ।
नि यत्सीं शिश्नथद्वृषा[१] ॥

अपासरदुषाः । अनसः संपिष्टान्मेघाद् बिभ्युषी । अनो वायुरनितेः । अपि वोपमार्थे स्यात् । अनस इव शकटादिव । अनः शकटम् । आनद्धमस्मिञ्चीवरम् । अनितेर्वा स्यात् । जीवनकर्मणः । उपजीवन्त्येनत् । मेघोऽप्यन एतस्मादेव[२] । यन्निरशिश्नथत् । वृषा वर्षिता मध्यमः ।

तस्या एषापरा भवति ॥ ४७ ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या ।
ससार सीं परावतः[३] ॥

एतदस्या अन आशेते सुसंपिष्टम् । इतरदिव । विपाशि विमुक्तपाशि । ससारोषाः । परावतः प्रेरितवतः । परागताद्वा ।

इळा व्याख्याता[४] । तस्या एषा भवति ॥ ४८ ॥

अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः[६] ।
सिषक्तु न ऊर्जव्यस्य पुष्टेः[७] ॥

अभिगृणातु न इळा । यूथस्य माता । [सर्वस्य माता ।][८] स्मदभि नदीभिः । उर्वशी वा गृणातु । उर्वशी[९] वा । बृहद्दिवा महद्दिवा[१०] । गृणाना । अभ्यूर्ण्वाना । प्रभृथस्य[११] प्रभृतस्य । आयोरयनस्य [मनुष्यस्य[१२]] ज्योतिषो वोदकस्य वा । सेवतां नोऽन्नस्य पुष्टेः ।

रोदसी । रुद्रस्य पत्नी । तस्या एषा भवति ॥ ४९ ॥

१. RV. IV. 30. 10.

२. The passage अनः शकटम्...एतस्मादेव is omitted by Durga.

३. RV. IV. 30. 11.

४. N. 8. 7.

५. ऽस्मन्न० S'ivadatta.

६. ०स्यायोः C 7, M 3.

७. RV. V. 41. 19.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3; सर्वस्य माता सहचरतीभिर्नदीभिः is added on the margin in C 7.

९. उर्वशा C 7.

१०. Quoted by SRV. X. 64. 10. p. iv. 195.

११. Cf. SRV. V. 41. 19. p. ii. 582.

१२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

रथं[1] नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥

रथं क्षिप्रं मारुतं [मेघं[2]] वयं श्रवणीयमाह्वयामहे[3] । आ यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी ॥ ५० ॥

॥ इत्येकादशोऽध्यायः ॥

[[1]श्येनो व्याख्यात [2]आदाय [3]स्वादिष्ठया [4]सोमं मन्यते [5]यत्त्वा देव [6]नवोनवः [7]परं मृत्यो [8]त्वेषसित्था [9]प्र वो महे [10]इन्दु ज्योति[11]र्धाता ददातु [12]सोमस्या[13]थातो मध्यस्थाना देवगणा [14]आ विद्युन्म[15]द्भिरा रुद्रासो [16]विष्ट्वी शमी [17]विरूपास [18]उदीरतामवरे[19]ऽङ्गिरसो नः [20]सूर्यस्येव [21]स्तुषेय्यम[22]थातो मध्यस्थानाः स्त्रियो [23]दक्षस्य [24]यस्मै [25]त्वं किमिच्छन्ती [26]पावका नो [27]महो अर्णो [28]यद्वाग्वदन्ती [29]देवीं [30]वाचमन्विदनुमते [31]राकामहं [32]सिनीवालि [33]कुहूमहमन्य[34]मू-[35]षूर्वशी [36]विद्युन्न [37]बळित्थे[38]न्द्राणी [39]नाहमिन्द्राणि [40]गौरीर्मिमाय [41]तस्याः समुद्रा [42]गौरमीमे[43]दुप ह्वये [44]सूयवसाद्भि[45]ङ्क्रण्वती [46]स्वस्तिरि[47]द्धिपोषा [48]एतदस्या [49]अभि नो [50]रथं नु मारुतमिति पञ्चाशत् ॥][4]

॥ इत्युत्तरषट्के पञ्चमोऽध्यायः ॥

॥ इति निरुक्त एकादशोऽध्यायः समाप्तः ॥

---

१. RV. V. 56. 8.

२. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

३. आह्वयाम: C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

४. Small figure within brackets represents the corresponding section of the eleventh chapter of the *Nirukta*.

अथ द्वादशोऽध्यायः

अथातो द्युस्थाना देवताः । तासामश्विनौ प्रथमागामिनौ भवतः । अश्विनौ यद्व्यश्नुवाते सर्वम् । रसेनान्यः । ज्योतिषान्यः । अश्वैरश्विनावित्यौर्णवाभः ।

तत्कावश्विनौ । द्यावापृथिव्यावित्येके । अहोरात्रावित्येके । सूर्याचन्द्रमसावित्येके।[2] राजानौ पुण्यकृतावित्यैतिहासिकाः[3] । तयोः काल ऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टम्भम् । अनुतमोभागो हि मध्यमो ज्योतिर्भाग आदित्यः ।

तयोरेषा भवति ॥ १ ॥

वसातिषु स्म चरथो[4]ऽसितौ पेत्वाविव ।

कदेदमश्विना युवमभि देवाँ अगच्छतम्[5] ॥

इति सा निगदव्याख्याता[6] ।

तयोः समानकालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोऽर्धर्चो भवति। वासात्यो अन्य उच्यते । उषः पुत्रस्त्वन्य इति ।

तयोरेषापरा भवति ॥ २ ॥

इहेह जाता समवावशीतामरेपसा तन्वा[7] नामभिः स्वैः ।

जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे[8] ॥

---

१. Cf. S'B. IV. 1. 5. 16.
इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदं सर्वमाश्नुवातां ।

२. Cf. BD. VII. 126; Quoted by SRV. I. 92. 1; 112. 1; 181. 4; 184. 3; X. 106. 5. pp. i. 416, 486, 764, 771; IV. 354.

३. Quoted by SRV. I. 89. 3. p. i. 396.

४. चरतो M 3.

५. The quotation is not traced.

६. S'ivadatta adds the following passage after व्याख्याता as the text in some of the MSS., which have however not been specified.

वसातिषु स्म चरथो वसातयो रातयो वसन्ते स्मा इतरेतरा तयोः । वक्तेर्वा वहतेर्वा । सितौ पेत्वाविव । अपेत्वा वृत्रहणं सुरातयोः ॥

७. तन्वान्य: Roth.

८. RV. I. 181. 4.

इह चेह[1] च जातौ संस्तूयेते[2] पापेनालिप्यमानया तन्वा नामभिश्च स्वैः। जिष्णुर्वामन्यः सुमहतो बलस्येरयिता मध्यमः। दिवोऽन्यः सुभगः पुत्र ऊह्यत आदित्यः[3]।

तयोरेषापरा भवति ॥ ३ ॥

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम् ।
अस्य सोमस्य पीतये[4] ॥

प्रातर्योगिनौ विबोधयाश्विनाविहागच्छतामस्य सोमस्य पानाय ।

तयोरेषापरा भवति ॥ ४ ॥

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।
उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान्[5] ॥

प्रातर्यजध्वमश्विनौ प्रहिणुत न सायमस्ति देवेज्या अजुष्टमेतत् । अप्यन्योऽस्मद्यजते वि चावः। पूर्वःपूर्वो यजमानो वनीयान्वनयितृतमः।

तयोः कालः सूर्योदयपर्यन्तः। तस्मिन्नन्या देवता ओप्यन्ते।

उषा वष्टेः कान्तिकर्मणः। उच्छतेरितरा माध्यमिका। तस्या एषा भवति ॥५॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे[6] ॥

उषस्तत् [चित्रं[7]] चायनीयं [मंहनीयं[8]] धनमाहर। अस्मभ्यमन्नवति । येन पुत्रांश्च पौत्रांश्च दधीमहि[9]।

तस्या एषापरा भवति ॥ ६ ॥

---

१. इहेह SRV. I. 181. 4. p. i. 764.

२. संस्तूयेथे SRV. loc. cit.

३. Quoted by SRV. loc. cit.

४. RV. I. 22. 1.

५. RV. V. 77. 2.

६. RV. I. 92. 13; SV. 2. 1081; VS. 34. 33.

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

८. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3; and SRV. I. 92. 13. p. i. 415.

९. Quoted by SRV. loc. cit.

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥[1]

एतास्ता उषसः केतुमकृषत प्रज्ञानम्। एकस्या एव पूजनार्थे बहुवचनं स्यात्। पूर्वेऽर्धेऽन्तरिक्षलोकस्य समञ्जते भानुना। निष्कृण्वाना आयुधानीव धृष्णवः। निरित्येष समित्येतस्य स्थाने।[2]

एमीदेषां निष्कृतं जारिणीव[3]। इत्यपि निगमो भवति।

प्रति यन्ति। गावो गमनात्। अरुषीरारोचनात्। मातरो भासो निर्मात्र्यः।[4]

सूर्या सूर्यस्य पत्नी। एषैवाभिसृष्टकालतमा। तस्या एषा भवति॥ ७॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम्।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व॥[5]

सुकाशनं[6] शल्मलं सर्वरूपम्। अपि वोपमार्थे स्यात्। सुकिंशुकमिव शल्मलिमिति। किंशुकं क्रंशतेः प्रकाशयतिकर्मणः। शल्मलिः सुशरो भवति। शरवान्वा। आरोह सूर्ये अमृतस्य लोकमुदकस्य। सुखं पत्ये वहतुं कुरुष्व।

सविता सूर्यां प्रायच्छत्सोमाय राज्ञे प्रजापतये वा[7]। इति च ब्राह्मणम्।

वृषाकपायी वृषाकपेः पत्नी। एषैवाभिसृष्टकालतमा। तस्या एषा भवति॥८॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे।
घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः॥[8]

वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा। स्नुषा साधुसादिनीति वा। साधुसानिनीति वा। स्वपत्यं तत्सनोतीति वा।

प्राश्नातु त इन्द्र उक्षण एतान्माध्यमिकान्त्संस्त्यायान्। उक्षण उक्षतेर्वृद्धिकर्मणः। उक्षन्त्युदकेनेति वा। प्रियं कुरुष्व सुखाचयकरं हविः [सुखकरं हविः][9]। सर्वस्माद् य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यम्।[10]

---

१. RV. I. 92. 1; SV. 2. 1105.
२. Quoted by SRV. I. 2. 6; III. 58. 9. pp. i. 32; ii. 328.
३. RV. X. 34. 5.
४. Quoted by SRV. I. 92. 1. p. i. 410.
५. RV. X. 85. 20; cf. AV. 14. 1. 61.
६. सुकाशनं M 3.
७. Cf. AB. IV. 7. 1; cf. KB. XVIII. 1.
८. RV. X. 86. 13; AV. 20. 126. 13.
९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3. & SRV. X. 86. 13. p. IV. 269.
१०. The entire passage. वृषाकपायि रेवति...इन्द्र उत्तरः is quoted by SRV. loc. cit. The intervening words स्वपत्यं...उक्षन्त्युदकेनेति वा are omitted.

सरण्यूः सरणात् । तस्या एषा भवति ॥ ९ ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते । अप्यश्विनाभरत् यत्तदासीत् । अजहाद् द्वौ मिथुनौ सरण्यूः ।

मध्यमं च माध्यमिकां च वाचमिति नैरुक्ताः । यमं च यमीं चेत्यैतिहासिकाः ।

तत्रेतिहासमाचक्षते । त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद्यमौ मिथुनौ जनयाञ्चकार । स सवर्णामन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव । स विवस्वानादित्य आश्वमेव रूपं कृत्वा तामनुसृत्य संबभूव । ततोऽश्विनौ जज्ञाते । सवर्णायां मनुः । तदभिवादिन्येषर्ग्भवति ॥ १० ॥

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥

त्वष्टा दुहितुर्वहनं करोतीति [इदं विश्वं भुवनं समेति][10] । इमानि च सर्वाणि भूतान्यभिसमागच्छन्ति । यमस्य माता पर्युह्यमाना महतो जाया विवस्वतो ननाश । रात्रिरादित्यस्य । आदित्योदयेऽन्तर्धीयते ॥ ११ ॥

सविता व्याख्यातः[11] । तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति ।

तस्यैषा भवति ॥ १२ ॥

विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥[12]

सर्वाणि प्रज्ञानानि प्रतिमुञ्चते मेधावी । कविः क्रान्तदर्शनो भवति । कवतेर्वा । प्रसुवति भद्रं द्विपाद्भ्यश्च चतुष्पाद्भ्यश्च । व्यचिख्यपन्नाकं[13] सविता वरणीयः । प्रयाणमनूषसो[14] विराजति ।

१. RV. X. 17. 2.

२. अप्यगूहन् C 1, C 2, C 3, C 6, M 1, M 4, S; Roth & S'ivadatta.

३. Cf. BD. VII. 7.

४. Cf. op. cit. VI. 162, 163.

५. Cf. op. cit. VII. 1.

६. Cf. op. cit. VII. 3, 4.

७. Cf. op. cit. VII. 6.

८. Cf. op. cit. VII. 2.

९. RV. X. 17. 1; AV. 3. 31. 5; 18. 1. 53.

१०. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

११. N. 10. 31.

१२. RV. V. 81. 2; VS. 12. 3.

१३. व्यक्षपन्नाकं W 2.

१४. ०मनुपसो M 3; ०मुषसो C 4, C 5, C 7, Mi, W 1, W 2, W 3.

अधोरामः सावित्रः । इति पशुसमाम्नाये विज्ञायते ।

कस्मात्सामान्यादिति । अधस्तात्तद्वेलायां तमो भवत्येतस्मात्सामान्यात् । अधस्ताद्रामोऽधस्तात्कृष्णः । कस्मात्सामान्यादिति । अग्निं चित्वा न रामामुपेयात् । रामा रमणायोपेयते न धर्माय । कृष्णजातीयैतस्मात्सामान्यात् ।

कृकवाकुः सावित्रः । इति पशुसमाम्नाये विज्ञायते ।

कस्मात्सामान्यादिति । कालानुवादं परीत्य । कृकवाकोः पूर्वं शब्दानुकरणं वचेरुत्तरम् ।

भगो व्याख्यातः । तस्य कालः प्रागुत्सर्पणात् । तस्यैषा भवति ॥ १२ ॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥

प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता सर्वस्य । आध्रश्चिद्यं मन्यमान आढ्यांलुर्दरिद्रः । तुरश्चित् । तुर इति यमनाम । तरतेर्वा । त्वरतेर्वा । त्वरया तूर्णगतिर्यमः । राजा चिद्यं भगं भक्षीत्याह ।

अन्धो भग इत्याहुरनुत्सृप्तो न दृश्यते । प्राशित्रमस्याक्षिणी निर्जघानेति । इति च ब्राह्मणम् ।

जनं भगो गच्छतीति । इति [वा] विज्ञायते ।

जनं गच्छत्यादित्य उदयेन ।

१. TS. V. 5. 22. 1.
२. VS. 24. 1—40.
३. ०द्वेडायां Roth.
४. Cf. Vāsiṣṭha Dh. Sūt. XVIII. 17, 18: अथापि यमगीताञ्श्लोकानुदाहरन्ति । नाग्निं चित्वा रामामुपेयात् । कृष्णवर्णा या रामा रमणायैव न धर्मायेति । Cf. also Karka on Pāraskara gṛhya sū. I. 4:
तथा च यास्काचार्याः—रामा रमणायोपेयते न धर्मायेति ।...तथा चाह—अग्निं प्रथमं चित्वा न रामामुपेयादिति ।
Cf. Vis'varūpācārya in his *Bālakriḍā* on Yājñavalkya I. 56: कृष्णवर्णीया रामा रमणायैवोपेयत इति ब्राह्मणवादः ।
Cf. KS. XXII. 7: अग्निं चित्वा प्रथमं चित्वा न रामामुपेयात् ।
५. VS. 24. 35; TS. V. 5. 18. 1.
६. VS. 24. 1—40.
७. सामानादिति M 3.
८. N. 3. 16.
९. RV. VIII. 41. 2; VS. 34. 35; cf. AV. 3. 16. 2.
१०. आढ्याडुः Roth.
११. Cf. KB. VI. 13: तद् भगाय परिजहुः । तस्याक्षिणी निर्जघान । तस्मादाहुरन्धो भग इति । cf. S'B. I. 7. 4. 6: तद् भगाय दक्षिणत आसीनाय पर्याजहुः । तद् भगोऽवेक्षां चक्रे । तस्याक्षिणी निर्ददाह ।...तस्मादाहुरन्धो भग इति । Cf. GB. II. 1. 2: तस्मादाहुरन्धो वै भग इति ।
१२. Cf. MS. I. 6. 12: जनं भगोऽगच्छत् ।
१३. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.
१४. Omitted by Roth.

सूर्यः सर्तेर्वा। सुवतेर्वा। स्वीर्यतेर्वा। तस्यैषा भवति ॥ १४ ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम् ॥

उद्वहन्ति तं जातवेदसं रश्मयः केतवः। सर्वेषां भूतानां दर्शनाय सूर्यमिति। [कमन्यमादित्यादेवमवक्ष्यत्।]

तस्यैषापरा भवति ॥ १५ ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥

चायनीयं देवानामुदगमदनीकम्। ख्यानं मित्रस्य वरुणस्याग्नेश्च। आपूपुरद् द्यावापृथिव्यौ चान्तरिक्षं च महत्त्वेन [तेन]। सूर्य आत्मा जङ्गमस्य च स्थावरस्य च।

अथ यद्रश्मिपोषं पुष्यति तत्पूषा भवति।

तस्यैषा भवति ॥ १६ ॥

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥

शुक्रं ते अन्यत्। लोहितं ते अन्यत्। यजतं ते अन्यत्। यज्ञियं ते अन्यत्। विषमरूपे ते अहनी कर्म द्यौरिव चासि। सर्वाणि प्रज्ञानान्यवसि। अन्नवन्। भाजनवती ते पूषन्निह दत्तिरस्तु।

तस्यैषापरा भवति ॥ १७ ॥

---

१. Cf. PMbh. vol. II. p. 86: सूसर्तिभ्यां सर्तेरुत्वं सुवतेर्वा रुडागमः। सरणाद्वा सुवति वा कर्मणीति सूर्यः।

२. Cf. BD. VII. 128. (B).

३. RV. I. 50. 1; AV. 13. 2. 16; 20. 47. 13; SV. 1. 31; VS. 7. 41; 8. 41; 33. 31.

४. Cf. SRV. I. 50. 1. p. i. 248: उद्वहन्ति तं जातवेदसं देवमश्वाः केतवो रश्मयो वा सर्वेषां भूतानां संदर्शनाय सूर्यम्।

५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

६. RV. I. 115. 1; AV. 13. 2. 35; 20. 137. 14.

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

८. Cf. BD. ii. 63.

९. RV. VI. 58. 1; SV. 1. 75.

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळ्र्कम्[3] ।
स नो रासच्छुरुधश्चन्द्राग्रा[1] धियंधियं सीषधाति प्र पूषा[2] ॥

पथस्पथः । अधिपतिम् । वचनेन । कामेन कृतः । अभ्यानळ्र्कम्[3] । अभ्याप-श्नोऽर्कमिति वा । स नो ददातु चायनीयाग्राणि धनानि । कर्मकर्म च नः प्रसाधयतु पूषेति ।

अथ यद्विषितो भवति तद्विष्णुर्भवति । विष्णुर्विशतेर्वा । व्यश्नोतेर्वा[4] ।

तस्यैषा भवति ॥ १८ ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
समूळ्हमस्य पाँसुरे[5] ॥

यदिदं किं च तद्विक्रमते विष्णुः । त्रिधा निधत्ते पदम् । [त्रेधाभावाय[6] ।] पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः[7] । समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः । समूळ्हमस्य[8] [पाँसुरे[6]] प्यायने[9]ऽन्तरिक्षे पदं न दृश्यते । अपि वोपमार्थं स्यात् । समूळ्हमस्य[10] पाँसुल[11] इव पदं न दृश्यत इति । पाँसवः पादैः सूयन्त इति वा । पन्नाः शेरत इति वा । पंसनीया[12] भवन्तीति वा[13] ॥ १९ ॥

विश्वानरो व्याख्यातः[14] । तस्यैष निपातो भवत्यैन्द्र्यामृचि ॥ २० ॥

विश्वानरस्य वस्पतिमनानतस्य शवसः ।
एवैश्च चर्षणीनामूती हुवे रथानाम्[15] ॥

विश्वानरस्यादित्यस्य । अनानतस्य । शवसो महतो बलस्य । एवैश्च कामैरय-नैरवनैर्वा । चर्षणीनां मनुष्याणाम् । ऊत्या च पथा[16] रथानाम् । इन्द्रमस्मिन्यज्ञे ह्वयामि ।

---

१. रसच्छु° Roth.

२. RV. VI. 49. 8; VS. 34. 42.

३. अभ्यानडर्कम् C 1, C 2, C 3, C 6, M 4, S; Roth & S'ivadatta.

४. Cf. BD. ii. 69.

५. RV. I. 22. 17; AV. 7. 26. 4.

६. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

७. Cf. BD. ii. 64.

८. समूढमस्य C 1, C 2, C 3, C 6, M 4,

९. अप्यायने SRV. I. 22. 17. p. i. 120.

१०. Omitted by SRV. loc. cit. For the reading of the longer recension, see note ८.

११. पांसुर SRV. loc. cit.

१२. पिंसनीया: C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१३. The passage: विष्णुर्विशतेर्वा...... भवन्तीति वा is quoted by SRV. loc. cit.

१४. N. 7. 21.

१५. RV. VIII. 68. 4; SV. 1. 364.

१६. यथा Roth.

वरुणो व्याख्यातः । तस्यैषा भवति ॥ २१ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥

भुरण्युरिति क्षिप्रनाम । भुरण्युः शकुनिः । भूरिमध्वानं नयति । स्वर्गस्य लोकस्यापि वोळ्हा । तत्संपाती भुरण्युः । अनेन पावकख्यानेन । भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि । तत्ते वयं स्तुम इति वाक्यशेषः ।

अपि वोत्तरस्याम् ॥ २२ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः ।
पश्यञ्जन्मानि सूर्य ॥

व्येषि द्याम् । रजश्च । पृथु महान्तं लोकम् । अहानि च मिमानोऽक्तुभी रात्रिभिः सह । पश्यञ्जन्मानि जातानि सूर्य ।

अपि वा पूर्वस्याम् ॥ २३ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
प्रत्यङ् विश्वं स्वर्दृशे ॥

---

१. N. 10. 3.

२. RV. I. 50. 6; AV. 13. 2. 21; 20. 47. 18; VS. 33. 32.

३. नयन्ति M 3.

४. वोढा C 1, C 2, C 3, C 6, M 4, S; & S'ivadatta.

५. The passage भुरण्युः शकुनिः...तत्संपाती is omitted in W 2; but added on the margin.

६. Cf. SRV. I. 50. 6. p. i. 250: तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्यामन्वयस्तेन व्येषि ।

७. RV. I. 50. 6.

८. RV. I. 50. 7; AV. 13. 2. 22; 20. 47. 19.

९. वेषि C 4. C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१०. RV. I. 50. 6.

११. RV. I. 50. 5; AV. 13. 2. 20; 20. 47. 17.

प्रत्यङ्ङिदं सर्वम् । [उदेषि । प्रत्यङ्ङिदं ज्योतिरुच्यते[1] । प्रत्यङ्ङिदं सर्वम्][2] (इदम्[3]) अभिविपश्यसीति ।

अपि वैतस्यामेवं[4] ॥ २४ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥[5]

तेन नो जनानभिविपश्यसि ।

केशी केशा रश्मयः । तैस्तद्वान्भवति । काशनाद्वा[6] । [प्रकाशनाद्वा ।][7]

तस्यैषा भवति ॥ २५ ॥

केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी ।
केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥[8]

केश्यग्निं च विषं च । विषमित्युदकनाम । विष्णातेः । [विपूर्वस्य स्नातेः शुद्ध्यर्थस्य ।][9] विपूर्वस्य वा सचतेः । द्यावापृथिव्यौ च धारयति । केशीदं सर्वमिदमभिविपश्यति । केशीदं ज्योतिरुच्यत इत्यादित्यमाह ।

अथाप्येते इतरे ज्योतिषी केशिनी उच्येते । धूमेनाग्नी । रजसा च मध्यमः[10] ।

तयोरेषा[11] साधारणा भवति ॥ २६ ॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥[12]

---

१. प्रत्यङ्ङिदं ज्योतिरुच्यते is omitted by Durga.

२. उदेषि...सर्वम् is omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

३. Omitted by C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

४. °मिव W 2.

५. RV. I. 50. 6.

६. Cf. BD. ii. 65:

प्रकाशं किरणैः कुर्वंस्तेनैनं केशिनं विदुः ।

७. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

८. RV. X. 136. 1.

९. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

१०. Cf. BD. i. 94; ii. 65.

११. तेषामेषा C 1, C 2, C 3, C 6, M 1, M 4, R 2, R 3, R 5, S.

१२. RV. I. 164. 44; AV. 9. 10. 26.

त्रयः केशिन ऋतुथा विचक्षते । कालेकालेऽभिविपश्यन्ति । संवत्सरे वपत एक एषाम् । इत्यग्निः पृथिवीं दहति । सर्वमेकोऽभिविपश्यति कर्मभिरादित्यः । गतिरेकस्य दृश्यते न रूपं मध्यमस्य ।

अथ यद् रश्मिभिरभिप्रकम्पयन्नेति तद् वृषाकपिर्भवति । वृषाकम्पनः ।

तस्यैषा भवति ॥ २७ ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनः ।
विश्वस्मादिन्द्र उत्तरः ॥

पुनरेहि वृषाकपे सुप्रसूतानि वः कर्माणि कल्पयावहै । य एष स्वप्ननंशनः । स्वप्नान्नाशयति । आदित्य उदयेन । सोऽस्तमेषि पथा पुनः । सर्वस्माद् य इन्द्र उत्तरस्तमेतद् ब्रूम आदित्यम् ।

यमो व्याख्यातः । तस्यैषा भवति ॥ २८ ॥

यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः ।
अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥

यस्मिन्वृक्षे सुपलाशे स्थाने वृतक्षये वा । अपि वोपमार्थे स्यात् । वृक्ष इव सुपलाश इति । वृक्षो व्रश्चनात् । पलाशं पलाशनात् । देवैः संगच्छते यमः । रश्मिभिरादित्यः । तत्र नः सर्वस्य पाता वा पालयिता वा पुराणाननुकामयेत ।

अज एकपादजन एकः पादः । एकेन पादेन पातीति वा । एकेन पादेन पिबतीति वा । एकोऽस्य पाद इति वा ।

एकं पादं नोत्खिदति ।

इत्यपि निगमो भवति । तस्यैष निपातो भवति वैश्वदेव्यामृचि ॥ २९ ॥

१. The whole passage त्रयः...मध्यमस्य is quoted by SRV. I. 164. 44. p. i. 716.

२. Cf. BD. ii. 67.

३. कल्पयावहै Roth.

४. RV. X. 86. 21; AV. 20. 126. 21.

५. Omitted by W 2.

६. नाशयसि Roth & SRV. X 86. 21. p. iv. 271.

७. The passage सुप्रसूतानि...पथा पुनः is quoted by SRV. loc. cit.

८. N. 10. 19.

९. RV. X. 135. 1.

१०. पलाशदनात् M 3; पलाशं पलाशनात् is omitted by Durga.

११. AV. 11. 4. 21.

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरन्ध्या ॥

पविः शल्यो भवति । यद्विपुनाति कायम् । तद्वत् । पवीरमायुधम् । तद्वानिन्द्रः पवीरवान् ।

अतितस्थौ पवीरवान् ।

इत्यपि निगमो भवति । तद् देवता वाक्पावीरवी । पावीरवी च दिव्या वाक् । तन्यतुस्तनित्री वाचोऽन्यस्याः । अजश्चैकपाद् दिवो धारयिता । सिन्धुश्च । आपश्च समुद्रियाश्च । सर्वे च देवाः । सरस्वती च सह पुरन्ध्या स्तुत्या । प्रयुक्तानि धीभिः कर्मभिर्युक्तानि । शृण्वन्तु वचनानीमानीति ।

पृथिवी व्याख्याता । तस्या एष निपातो भवत्यैन्द्राग्न्यामृचि ॥ ३० ॥

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

इति सा निगदव्याख्याता ।

समुद्रो व्याख्यातः । तस्यैष निपातो भवति पावमान्यामृचि ॥ ३१ ॥

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥

पवित्रवन्तो रश्मिवन्तो माध्यमिका देवगणाः पर्यासते [माध्यमिकां वाचम्][11] । मध्यमः पितैषां प्रत्नः पुराणोऽभिरक्षति व्रतं कर्म । महः समुद्रं वरुणस्तिरोऽन्तर्दधाति । अथ धीराः शक्नुवन्ति धरुणेषूदकेषु कर्मण आरभमारब्धुम् ।

---

१. RV. X. 65. 13.

२. Cf. SRV. X. 65. 13. p. iv. 201: पविः शल्यो भवति…कायमित्यादि निरुक्तमनुसंधेयम् ।

३. RV. X. 60. 3. Durga remarks: निर्वचनस्यास्यामृच्युत्तरे पादे सम्यक् पाठोऽन्वेष्यः ।

४. च is omitted & added between धारयिता and सिन्धुः in M 3.

५. N. 1. 13, 14; cf. 9. 31; 11. 36.

६. RV. I. 108. 10.

७. N. 2. 10.

८. प्रजो W 2.

९. RV. IX. 73. 3.

१०. माध्यमकाः C 7. M 3.

११. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

१२. Omitted by Roth.

१३. प्रजो W 2.

१४. आरम्भम् M 3.

१५. आरब्धम् W 2.

अज एकपाद् व्याख्यातः[1]। पृथिवी व्याख्याता[2]। समुद्रो व्याख्यातः[3]। तेषामेष निपातो भवत्यपरस्यां बहुदेवतायामृचि ॥ ३२ ॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु[4] ॥

अपि च नोऽहिर्बुध्न्यः शृणोतु। अजश्चैकपात्पृथिवी च समुद्रश्च सर्वे च देवाः। सत्यवृधो वा। यज्ञवृधो वा। हूयमाना मन्त्रैः स्तुताः। मन्त्राः कविशस्ताः। अवन्तु। मेधाविशस्ताः।

दध्यङ् प्रत्यक्तो ध्यानमिति वा। प्रत्यक्तमस्मिन्[5]ध्यानमिति वा।

अथर्वा[6] व्याख्यातः। मनुर्मननात्[7]। तेषामेष निपातो भवत्यैन्द्र्यामृचि[8] ॥ ३३ ॥

यामथर्वा मनुष्पिता दध्यङ् धियमत्नत।
तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम्[9] ॥

यामथर्वा च। मनुश्च[10] पिता मानवानाम्। दध्यङ् च। धियमतनिषत। तस्मिन्ब्रह्माणि कर्माणि पूर्वेन्द्र उक्थानि[11] च संगच्छन्ताम्। अर्चन्योऽनूपास्ते स्वाराज्यम् ॥ ३४ ॥

अथातो द्युस्थाना देवगणाः। तेषामादित्याः प्रथमागामिनो भवन्ति। आदित्या व्याख्याताः[12]। तेषामेषा भवति ॥ ३५ ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः[13] ॥

घृतस्नूर्घृतप्रस्नाविन्यः[14]। घृतप्रस्नाविण्यः। [घृतसानिन्यः। घृतसारिण्यः][15] इति वा। आहुतीरादित्येभ्यश्चिरं जुह्वा जुहोमि। [चिरं जीवनाय।][15] चिरं राजभ्य इति वा। शृणोतु न इमा गिरो मित्रश्चार्यमा च भगश्च बहुजातश्च धाता दक्षो वरुणोऽंशश्च। अंशोऽंशुना व्याख्यातः।

---

१. N. 12. 29.

२. N. 12. 30.

३. loc. cit.

४. RV. VI. 50. 14; VS. 34. 53.

५. ०स्मिन्ध्यानमिति C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. N. 11. 18.

७. ०मरणात् M 3.

८. Cf. BD. iii. 121.

९. RV. I. 80. 16.

१०. मनुष्य M 3.

११. तस्मिन्कर्मणि ब्रह्माणीन्द्र उक्थानि C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

१२. N. 2. 13.

१३. RV. II. 27. 1; VS. 34. 54.

१४. ०प्रस्नाविन्य: C 6, C 7; S'ivadatta.

१५. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

सप्त ऋषयो व्याख्याताः । तेषामेषा भवति ॥ ३६ ॥

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ[3] ॥

सप्त ऋषयः प्रतिहिताः शरीरे । रश्मय आदित्ये । सप्त रक्षन्ति सदमप्रमादम् । संवत्सरमप्रमाद्यन्तः । सप्तापनास्त एव स्वपतो लोकमस्तमितमादित्यं यन्ति । तत्र जागृतोऽस्वप्नजौ सत्रसदौ च देवौ वाय्वादित्यौ । इत्यधिदैवतम् ।

अथाध्यात्मम् । सप्त ऋषयः प्रतिहिताः शरीरे । षडिन्द्रियाणि विद्या सप्तम्यात्मनि । सप्त रक्षन्ति सदमप्रमादम् । शरीरमप्रमाद्यन्ति । सप्तापनानीमान्येव स्वपतो लोकमस्तमितमात्मानं यन्ति । तत्र जागृतोऽस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्च । इत्यात्मगतिमाचष्टे ।

तेषामेषापरा भवति ॥ ३७ ॥

तिर्यग्बिलश्चमस ऊर्ध्वबुध्नो यस्मिन्यशो निहितं विश्वरूपम् ।
अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः ॥

तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा । यस्मिन्यशो निहितं विश्वरूपम् । अत्रासत ऋषयः सप्त सहादित्यरश्मयः । ये अस्य गोपा महतो बभूवुः । इत्यधिदैवतम् ।

अथाध्यात्मम् । तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा । यस्मिन्यशो निहितं विश्वरूपम् । अत्रासत ऋषयः सप्त सहेन्द्रियाणि । यान्यस्य गोप्तॄणि महतो बभूवुः । इत्यात्मगतिमाचष्टे ।

देवा व्याख्याताः । तेषामेषा भवति ॥ ३८ ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे[10] ॥

---

१. N. 10. 26.

२. सत्रसदौ च देवौ Roth.

३. VS. 34. 55.

४. अत्र C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

५. Cf. AV. 10. 8. 9. The accent of this stanza marked by Roth and S'ivadatta differs from that of the AV.

६. सर्वरूपम् C 1, C 2, C 3, C 6, M 1, M 4, S; Roth & S'ivadatta.

७. सर्वरूपम् C 1, C 2, C 3, C 6, M 1, M 4, S; Roth & S'ivadatta.

८. गोप्त्रीणि C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

९. N. 7. 15.

१०. RV. I. 89. 2; VS. 25. 15.

देवानां वयं [सुमतौ] कल्याण्यां मतौ । ऋजुगासिनाम् । ऋतुगासिनामिति[2] वा । देवानां दानमभि नो निवर्तताम् । देवानां सख्यमुपसीदेम वयम् । देवा न आयुः प्रवर्धयन्तु चिरं जीवनाय[3] ।

विश्वेदेवाः सर्वेदेवाः । तेषामेषा भवति ॥ ३९ ॥

ओमासश्चर्षणीधृतो विश्वे देवास आ गत ।
दाश्वांसो दाशुषः सुतम्[4] ॥

अवितारो वा । अवनीया वा । मनुष्यधृतः सर्वे च देवा इहागच्छत । दत्तवन्तः । दत्तवतः सुतमिति ।

तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते । यत्तु किंचिद् बहुदैवतं तद् वैश्वदेवानां स्थाने युज्यते[6] । यदेव विश्वलिङ्गमिति[7] शाकपूणिः । अनत्यन्तगतस्त्वेष उद्देशो भवति[8] ।

बभ्रुरेको[9] ।

इति दश द्विपदा अलिङ्गाः[10] । भूतांशः काश्यप[11] आश्विनमेकलिङ्गम्[12] । अभितष्टीयं[13] सूक्तमेकलिङ्गम्[14] ।

साध्या देवाः साधनात् । तेषामेषा भवति ॥ ४० ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः[15] ॥

यज्ञेन यज्ञमयजन्त देवाः । अग्निनाग्निमयजन्त देवाः[16] ।

अग्निः पशुरासीत् । तमालभन्त । तेनायजन्त[17] । इति च ब्राह्मणम् ।

---

१. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

२. ऋजु° W 2.

३. Quoted by SRV. I. 89. 2. p. i. 395.

४. RV. I. 3. 7; VS. 7. 33; 33. 47.

५. °मिव C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

६. Cf. BD. ii. 128, 132, 133.

७. The term विश्वलिङ्गम् is used in BD. iii. 43.

८. Cf. SRV. I. 3. 7. p. i. 38.

९. RV. VIII. 29.

१०. बभ्रुरेक...अलिङ्गाः is placed after आश्विनमेकलिङ्गम् in C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3; is omitted by Durga.

११. भूतांशः काश्यपः is the seer of RV. X. 106.

१२. Cf. BD. VIII. 18; cf. Sarvānu. VIII. 21.

१३. अभितष्टियं M 3.

१४. RV. III. 38.

१५. RV. I. 164. 50; X. 90. 16; AV. 7. 5. 1; VS. 31. 16.

१६. Quoted by SRV. I. 164. 50. p. i. 719.

१७. Cf. AB. i. 16. 36, 38-40; TS. V. 7. 26. 1: अग्निः पशुरासीत् । तेनायजन्त ।

तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः संसेव्यन्त[1] । यत्र पूर्वे साध्याः सन्ति देवाः साधनाः । द्युस्थानो[2] देवगण इति नैरुक्ताः । पूर्वं देवयुगमित्याख्यानम् ।

वसवो यद् विवसते सर्वम् । अग्निर्वसुभिर्वासव इति समाख्या । तस्मात्पृथिवीस्थानाः । इन्द्रो वसुभिर्वासव इति समाख्या । तस्मान्मध्यस्थानाः । वसव आदित्यरश्मयो विवासनात् । तस्माद् द्युस्थानाः ।

तेषामेषा भवति ॥ ४१ ॥

> सुगा वो देवाः सद॑ना[3]मकर्म य आ॑जग्मुः सवं॑नेमि॒दं[4] जुषाणाः ।
> ज॒क्षिवाँसः पपिवाँसश्च विश्वेऽस्मे धत्त वसवो वसूनि[5] ॥

स्वागमनानि वो देवाः सुपथान्यकर्म य आगच्छत सवनानीमानि । जुषाणाः खादितवन्तः । पीतवन्तश्च । सर्वेऽस्मासु धत्त वसवो वसूनि ।

तेषामेषापरा भवति ॥ ४२ ॥

> ज्मया अत्र[6] वस॑वो रन्त दे॒वा उ॒रावन्तरि॑क्षे मर्जयन्त शु॒भ्राः ।
> अ॒र्वाक्प॒थ उ॑रुज्रयः कृणुध्वं॒ श्रोता॑ दू॒तस्य॑ ज॒ग्मुषो॑ नो अ॒स्य[7] ॥

ज्मया अत्र वसवोऽरमन्त देवाः । ज्मा पृथिवी । तस्यां भवा उरौ चान्तरिक्षे मर्जयन्त गमयन्त रमयन्त[8] । शुभ्राः शोभमानाः । अर्वाच एनान्पथो बहुजवाः कुरुध्वम् । शृणुत दूतस्य जग्मुषो नोऽस्याग्नेः ।

वाजिनो व्याख्याताः[9] । तेषामेषा भवति[10] ॥ ४३ ॥

> शं नो॑ भवन्तु वा॒जिनो॑ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः ।
> ज॒म्भय॒न्तोऽहिं॒ वृकं॒ रक्षां॑सि सने॑म्य॒स्मद्यु॑यव॒न्नमी॑वाः[11] ॥

---

१. समसेवन्त C 1, C 2, C 3, C 6, M 3, Mi, R 2, R 3, R 5, S.

२. द्युस्थाणो Roth.

३. सुपथा अकर्म Durga & S'ivadatta.

४. सर्वनमिदं Roth.

५. Cf. TS. i. 4. 44. 2; cf. AV. 7. 97. 4: सुगा वो॑ देवाः सद॑ना अकर्म॒ य आ॑ज॒ग्म सव॑ने मा जुषाणाः । वह॑माना भर॑माणाः स्वा वसू॑नि॒ वसुं॑ घ॒र्मं दिव॒मा रो॑हतानु ॥ Cf. VS. 8. 18: सुगा वो॑ देवाः सद॑ना अकर्म॒ य आ॑ज॒ग्मेदं॑ सव॑नं जुषाणाः । भर॑माणा॒ वह॑माना ह॒वींषि॑ अ॒स्मे ध॑त्त वसवो॒ वसू॑नि॒ स्वाहा॑ ॥

६. अत्र Roth.

७. RV. VII. 39. 3.

८. रमयन्त is omitted in M 3, but is added on the margin; also omitted by Durga.

९. सर्वा M 3.

१०. N. 2. 28.

११. RV. VII. 38. 7; VS. 9. 16; 21. 10.

सुखा नो भवन्तु वाजिनो ह्वानेषु देवतातौ यज्ञे। मितद्रवः सुमितद्रवः। स्वर्काः स्वञ्चना इति वा। स्वर्चन इति वा। स्वर्चिष इति वा। जम्भयन्तोऽहिं च वृकं च रक्षाँसि च। क्षिप्रमस्मद्यावयन्तु। अमीवा देवाश्वा इति वा।

देवपत्न्यो देवानां पत्न्यः। तासामेषा भवति॥ ४४॥

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत॥

देवानां पत्न्य उशत्योऽवन्तु नः। प्रावन्तु नः। [तुजये] अपत्यजननाय चान्नसंसननाय च। याः पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्यः सुहवाः शर्म यच्छन्तु शरणम्।

तासामेषापरा भवति॥ ४५॥

उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट्।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम्॥

अपि च ग्ना व्यन्तु देवपत्न्यः। इन्द्राणीन्द्रस्य पत्नी। अग्नाय्यग्नेः पत्नी। अश्विन्यश्विनोः पत्नी। राड् राजते। रोदसी रुद्रस्य पत्नी। वरुणानी च वरुणस्य पत्नी। व्यन्तु देव्यः कामयन्तां य ऋतुकालो जायानां य ऋतुकालो जायानाम्॥ ४६॥

॥ इति द्वादशोऽध्यायः॥

---

१. ०वयत् C 4, C 5, C 7, M 3, Mi, W 1, W 2, W 3.

२. ताषामे०. M 3.

३. RV. V. 46. 7; AV. 7. 49. 1.

४. Omitted by BK, C 4, C 5, C 7, Kn, M 3, Mi, R 8, W 1, W 2, W 3.

५. कर्मणि व्रते M 3.

६. RV. V. 46. 8.

७. Quoted by SRV. V. 46. 8. p. ii. 602.

[[१]अथातो द्युस्थाना [२]वसातिषु स्मेहे[३]ह जाता [४]प्रातर्युजा [५]प्रातर्यजध्व[६]मुपस्तच्चित्रं[७]-मेता उत्याः [८]सुकिंशुकं [९]वृषाकपाय्य[१०]पागूहंस्त्व[११]ष्टा दुहित्रे [१२]सविता वि[१३]श्वारूपाणि [१४]प्रातर्जि[१५]तमुदुत्यं [१६]चित्रं [१७]शुक्रं ते प[१८]थस्पथ [१९]इदं विष्णुर्वै[२०]श्वानरो व्याख्यातो वि[२१]श्वानरस्य येना[२२-२५] पावकेति चतुष्कं केश्य[२६]ऽग्निं [२७]त्र्यः केशिनः [२८]पुनरेहि [२९]यस्मिन्वृक्षे [३०]पावीरवी [३१]यदि-न्द्राग्नी [३२]पवित्रवन्त [३३]उत नोऽहिर्[३४]यामथर्वा[३५]थातो द्युस्थाना देवगणा [३६]इमा गिरः [३७]सप्त ऋषयस्ति[३८]र्यग्बिलो दे[३९]वानां भद्रा[४०]मासो [४१]यज्ञेन [४२]सुगा वो देवा उ[४३]मया अत्र [४४]शं नो भवन्तु दे[४५]वानां पत्नीरु[४६]तग्ना व्यन्त्विति षट्चत्वारिंशत् ॥][१]

॥ इत्युत्तरषट्के षष्ठोऽध्यायः ॥

॥ इति निरुक्ते द्वादशोऽध्यायः समाप्तः ॥

॥ इति दैवतं काण्डमुत्तरार्धं च समाप्तम् ॥

---

1. Small figure within brackets represents the corresponding section of the twelfth chapter of the *Nirukta.*

अथ परिशिष्टम् ।

अथ[1] त्रयोदशोऽध्यायः ।

अथेमा[2] अतिस्तुतय इत्याचक्षते । अपि वा संप्रत्यय एव स्यात् । माहाभाग्याद्[3] देवतायाः । सोऽग्निमेव प्रथममाह ।

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः[4] । इति यथैतस्मिन्सूक्ते ।

न हि त्वदारे निमिशश्चन नेशे[5] । इति वरुणस्य ।

अथैषेन्द्रस्य ॥ १ ॥

यद्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।

न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी[6] ॥

यदि त इन्द्र शतं दिवः शतं भूमयः प्रतिमानानि स्युर्न त्वा वज्रिन्त्सहस्रमपि सूर्या न द्यावापृथिव्यावप्यभ्यश्नुवीतामिति ।

अथैषादित्यस्य ॥ २ ॥

---

१. MS. Wilson 475 dated Saṃvat 1443 (=1387 A. D.), which gives Durga's comm. on ch. 7–12 of the *Nirukta*, does not contain the *paris'iṣṭa*. Another MS. (Mill. 142.) of Durga's comm. on both parts of the *Nirukta* ends with ch. 12th which is finished on f. 123. (355). The colophon is as follows: sic. समाप्तग्रन्थः This MS. is dated 1839 A. D. & does not contain the *paris'iṣṭa*.

२. The 13th ch. is written continuously: ॥ श्री ६ ॥ ॐ अथेमा etc. in M 1; with simply ॐ in M 4, C 2; with ॥ ६ ॥ in C 6 and S. C 1 is incomplete; and C 3 separates the 13th ch. from the previous part; the numbering of the leaves which contain the 13th is from the beginning of the MSS. of the shorter recension, M 3, C 5, W 2 and Mi, write the 13th ch. continuously, with श्री or ॐ at the beginning. C 4 separates the 13th & begins ॐनमो गणेशाय; W 1 separates & begins: श्री गणेशाय नमः ॥; W 3 separates & begins: ॐनमो यास्काय ॥.

३. महाभाग्याद् Mi; Roth.

४. RV. II. 1. 1.

५. RV. II. 28. 6.

६. RV. VIII. 59. 5.

७. ॰श्नं. C 3.

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ।
क[1]स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः[2] ॥

यदुदञ्चो वृषाकपे गृहमिन्द्राजगमत । क स्य पुल्वघो मृगः । क स बह्वादी मृगः । मृगो मार्ष्टेर्[3]गतिकर्मणः । कमगमद्देशं जनयोपनः[4] । सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यम् ।

अथैषादित्यरश्मीनाम् ॥ ३ ॥

वि हि सोतोरसृक्षत नेन्द्रं[6] देवममंसत ।
यत्रा[7]मदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः[5] ॥

व्यसृक्षत हि प्रसवाय । न चेन्द्रं देवममंसत । यत्रामाद्यद्[8]वृषाकपिः । अर्य[9] ईश्वरः । पुष्टेषु पोषेषु । मत्सखा मम सखा । मदनसखा । ये नः सखायस्तैः सहेति वा । सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यम् । अ[10]थैषाश्विनोः ॥ ४ ॥

सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरा[11]यु ॥

सृण्येवेति द्विविधा सृणिर्भवति । भर्ता च हन्ता च । तथाश्विनौ चापि भर्तारौ । जर्भरी भर्तारावित्यर्थः । तुर्फरीतू हन्तारौ[12] । नैतोशेव तुर्फरी पर्फरीका । नितोशस्यापत्यं नैतोशम् । नैतोशेव तुर्फरी क्षिप्रहन्तारौ । उदन्यजेव जेमना मदेरू । उदन्यजेवेत्युदकजे इव । रत्ने सामुद्रे चा[13]न्द्रमसे वा । जेमने जयमने । जेमना मदेरू । ता मे जरा[14]य्वजरं मरायु । एतज्जरायुजं शरीरं शरदमजीर्णम् ।

अथैषा सोमस्य[15] ॥ ५ ॥

---

१. कमगं जनयोपनो. Mi, C 3, C 4.

२. RV. X. 86. 22.

३. Identical with the explanation given in N. 1. 20.

४. Quoted SRV. X. 86. 22. p. iv. 271.

५. RV. X. 86. 1.

६. Quoted in N. 1. 4. to illustrate the use of the particle *na*.

७. यत्रामतद्वृषा०. C 5; यत्रामाद्यद्वृषा०. M 1, M 3.

८. ०मद्यद्वृषा. C 3.

९. ईश्वरः Mi; omitted by C 4.

१०. Omitted by Durga.

११. RV. X. 106. 6.

१२. SRV. X. 106. 6. p. iv. 354.

१३. चान्द्रमसीति वा M 3, Mi, W 2, C 4, C 5; चान्द्रमसेति वा. B.

१४. जराय्वजरं M 3, Mi, W 2, C 4, C 5.

१५. This entire section together with 6th 7th and 8th is omitted by the commentary attributed to Durga.

तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
तरत्स मन्दी धावति ॥[1]

तरति स पापं सर्वं मन्दी यः स्तौति धावति गच्छत्यूर्ध्वां गतिम् । धारा सुतस्यान्धसः । धारयाभिषुतस्य सोमस्य मन्त्रपूतस्य वाचा स्तुतस्य । अथैषा[2] यज्ञस्य ॥ ६ ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश[3] ॥

चत्वारि शृङ्गेति[4] वेदा वा एत उक्ताः । त्रयोऽस्य पादा इति सवनानि त्रीणि । द्वे शीर्षे प्रायणीयोदयनीये । सप्त हस्तासः सप्त छन्दाँसि । त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैः । वृषभो रोरवीति । रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसन्ति[5] यजुर्भिर्यजन्ति सामभिः स्तुवन्ति । महो देव इत्येष हि महान्देवो यद्यज्ञो मर्त्याँ आविवेशेति । एष हि मनुष्यानाविशति[6] यजनाय । तस्योत्तरभूयसे निर्वचनाय[7] ॥ ७ ॥

स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वाँसो वितेनिरे[8] ॥

स्वर्गच्छन्त ईजाना वा नेक्षन्ते । तेऽमुमेव लोकं गतवन्तमीक्षन्तसिति[9] । आ द्यां रोहन्ति रोदसी । यज्ञं ये विश्वतोधारं सर्वतोधारं सुविद्वांसो वितेनिर इति । अथैषा[10] वाचः प्रवल्हितेव ॥ ८ ॥

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति[11] ॥

१. RV. IX. 58. 1.

२. SRV. IX. 58. 1. p. iii. 664.

३. RV. IV. 58. 3.

४. शृङ्गे. C 3. cf. SRV. IV. 58. 3. p. ii. 492.

५. शंसति. C 3.

६. मनुष्याणा°. M 3.

७. Cf. Gopatha Brāh. I. 2. 16. It appears that the passage in the Nirukta is an adaptation of the Brāhmaṇa.

The stanza is quoted by Patañjali in the introductory part of the *Mahābhāṣya* and is interpreted with reference to grammar i. e. 4, horns are the four parts of speech, noun, verb, preposition & particle; 3 feet are the 3 tenses; seven hands are the seven cases and so on.

Cf. S'abara on *Mīmāmsā I. 2. 46.* Cf. also Kumārila in his *Tantravārtika* on the same sūtra.

८. AV. 4. 14. 4; VS. 17. 68.

९. गतवन्त ईक्षन्त W 2, C 5; C 4 reads इच्छन्त, a क्ष being added on the margin.

१०. The commentary attributed to Durga is resumed on the 13th ch. from अथैषा etc.

११. RV. I. 164. 45.

चत्वारि वाचः परिमितानि पदानि । तानि विदुर्ब्राह्मणा ये मेधाविनः । गुहायां त्रीणि निहितानि नार्थं वेदयन्ते । गुहा गूहतेः । तुरीयं त्वरतेः । कतमानि तानि चत्वारि पदानि । ओंकारो महाव्याहृतयश्चेत्यार्षम् । नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः । मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः । ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः । सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके[1] । पशुषु तूणवेषु[2] मृगेष्वात्मनि चेत्यात्मप्रवादाः । अथापि ब्राह्मणं भवति । सा वै वाक्सृष्टा चतुर्धा व्यभवत् । एष्वेव लोकेषु त्रीणि पशुषु तुरीयम् । या पृथिव्यां साग्नौ सा रथन्तरे । यान्तरिक्षे सा वायौ सा वामदेव्ये । या दिवि सादित्ये सा बृहति[3] सा स्तनयित्नौ[4] । अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुः । तस्माद्ब्राह्मणा उभयीं वाचं वदन्ति[5] या च देवानां या च मनुष्याणाम्[6] । इति । अथैतस्याक्षरस्य ॥ ९ ॥

ऋचो॑ अ॒क्षरे॑ प॒र॒मे व्यो॑म॒न्यस्मि॒न्दे॒वा अधि॒ विश्वे॑ नि॒षे॒दुः ।
यस्तन्न वेद॒ किमृ॒चा क॑रिष्यति॒ य इत्तद्वि॒दुस्त इ॒मे समा॑सते[7] ॥

ऋचो अक्षरे परमे व्यवने यस्मिन्देवा अधिनिषण्णाः[8] सर्वे । यस्तन्न वेद किं स ऋचा करिष्यति । य इत्तद्विदुस्त इमे समासत इति विदुष उपदिशति । कतमत्तदेतदक्षरम् । ओमित्येषा वागिति शाकपूणिः । ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेषु । एतद्ध वा एतदक्षरं यत्सर्वां त्रयीं विद्यां प्रतिप्रति । इति च ब्राह्मणम्[9] ॥ १० ॥

आदित्य इति पुत्रः शाकपूणेः[10] । एष ऋग्भवति यदेनमर्चन्ति प्रत्यृचः[11] सर्वाणि भूतानि तस्य यदन्यन्मन्त्रेभ्यस्तदक्षरं[12] भवति । रश्मयोऽत्र देवा उच्यन्ते य एतस्मिन्नधिनिषण्णा इत्यधिदैवतम् ।

अथाध्यात्मम् । शरीरमत्र ऋगुच्यते यदेनेनार्चन्ति प्रत्यृचः सर्वाणीन्द्रियाणि तस्य यदविनाशिधर्म तदक्षरं भवति । इन्द्रियाण्यत्र देवा उच्यन्ते यान्यस्मिन्नात्मन्येकं[13] भवन्तीत्यात्मप्रवादाः ॥ ११ ॥

---

१. Cf. S'B. IV. 1. 3. 15, 16.

२. तूणवे M 3, W 2, Mi, C 4.

३. बृहती. M 3.

४. स्तन इत्नावथ M 3, C 3; स्तनयित्नाथ Mi, C 4; स्तनयित्नावथ M 1, M 4, C 2, C 5, C 6, W 1, W 2, W 3; R, B. and Gune in the Bhand. comm. vol. p. 50.

५. Cf. PMbh. i. 1. 1. p. i. 3.

६. Cf. MS. I. 11. 5. Also cf. KS. XIV. 5, where also this quotation occurs with small variants.

७. RV. I. 164. 39.

८. अधिनिषणः C 3.

९. KB. 6. 12.

१०. शाकपूणिः Mi, W 2, C 4, C 5.

११. प्रत्यृचं M 3, W 2, C 4, C 5.

१२. ०न्मात्रेभ्य० M 3, Mi, W 2, C 4, C 5.

१३. यान्यस्मिन्नधिनिषणानीत्यात्मप्रवादः M 3, W 2, C 3, C 4, C 5; यान्यस्मिन्नधिषणानी० Mi; यान्यस्मिन्नात्मन्नेकं M 1; यान्यस्मिन्नधिनिषणानीत्यात्मप्रवादाः B; यान्यस्मिन्नेकं भवन्तीत्यात्मप्रवादाः is another variant given in B.

अक्षरं न क्षरति। न क्षीयते वा[1]। क्षयं भवति। वाचोऽक्ष इति वा। अक्षो यान[2]स्याञ्जनात्। तत्प्रकृतीतरद्वर्तनसामान्यादिति। अयं मन्त्रार्थचिन्ताभ्यूहोऽभ्यूळ्हः। अपि श्रुतितोऽपि तर्कतः[3]। न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः। प्रकरणश एव तु निर्वक्तव्याः[4]। न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वा[5]। पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवतीत्युक्तं पुरस्तात्[6]। मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्। को न ऋषिर्भविष्यतीति। तेभ्य एतं तर्कमृषिं प्रायच्छन्मन्त्रार्थचिन्ताभ्यूहमभ्यूळ्हम्। तस्माद्यदेव[7] किंचानूचानोऽभ्यूहत्यार्षं तद्भवति[8] ॥ १२ ॥

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ॥[9]

हृदा तष्टेषु मनसां[10] प्रजवेषु[11] यद्ब्राह्मणाः संयजन्ते समानाख्याना ऋत्विजः। अत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिः। ओहब्रह्माण ऊहब्रह्माणः। ऊह एषां ब्रह्मेति वा। सेयं विद्या श्रुतिमतिबुद्धिः। तस्यास्तपसा पारमीप्सितव्यम्। तदिदमायुरिच्छता न निर्वक्तव्यम्। तस्माच्छन्दस्सु शेषा उपेक्षितव्याः। अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति[12] ॥ १३ ॥[13]

---

१. वाक्क्षरं M 1, C 3; वाक्षरं M 4, C 2, C 6, W 1, W 3; Roth.

२. पादानस्यां M 3, Mi, W 2, C 4, C 5.

३. तर्कितो C 3.

४. Cf. N. 1. 20; 2. 4.

५. Cf. BD. VIII. 129. न प्रत्यक्षमनृषेरस्ति मन्त्रम्। Cf. also उव्वट on RVP. तथा चोक्तं। नहि प्रत्यक्षमस्त्यनृषेर्मन्त्र इति.

६. N. 1. 16.

७. ०देवं B.

८. Cf. Kumārila Bhaṭṭa, *Tantravārtika*. Benares ed. p. 132. or I. 3. 7.

बहुकालाभ्यस्तवेदतदर्थज्ञानाहितसंस्काराणां वेदनियतमार्गानुसारिप्रतिभानां नोन्मार्गेण प्रतिभानं सम्भवतीत्याश्रित्योच्यते यदेव किं चानूचानोऽभ्यूहत्यार्षं तद्भवतीति।

९. RV. X. 71. 8.

१०. मनसां प्रजवेषु is missing in M 1, added on the margin in a different handwriting.

११. SRV. X. 71. 8. p. iv. 222.

१२. Roth does not repeat अनुभवति, which should be done as the evidence of Mss. shows. Mss. of both recensions without any exception repeat *anubhavati* which is a sure indication that the chapter is concluded.

१३. M 4, has the colophon: sic. ॥ इति १३ ध्याय: ॥; C 2, has the colophon: sic. ॥ इति निरुक्ते उत्तरषट्के सप्तमोऽध्याय: ॥ ६ ॥ शुभं भवतु ॥

S & C 6, have the Colophon: sic. ॥ इति निरुक्ते उत्तरषट्के सप्तमोध्याय: ॥; Mss. of the shorter recension have the following colophon: ।१३। प्रथमः पादः। M 3; C 5, W 2, W 3; ॥ १३ ॥ त्रयोदशाध्यायस्य प्रथमः पादः ॥ C 4, W 1; sic. ॥ त्रयोदशोध्याये प्रथमः पादः ॥

In the introduction to his commentary on the Ṛgvéda, Sāyaṇa describes the Nirukta as foll ws: तद्व्याख्यानं च समाम्नायः समाम्नात इत्यारभ्य तस्यास्तस्यास्ताद्भाव्यमनुभवत्य-

[1]व्याख्यातं दै[2]वतं य[3]ज्ञाङ्गं च। अथात ऊर्ध्वमार्गगतिं व्याख्यास्यामः।

सू[4]र्य आत्मा।

इत्युदितस्य हि क[5]र्मद्रष्टा। अथैतदनुप्रवदन्ति। अ[6]थैतं महान्तमात्मानमे[7]ष-गणः प्र[8]वदति।

इन्द्रं मित्रं वरुणमग्निमा[9]हुः। इति।

अथैष महानात्मात्मजिज्ञासयात्मानं प्रोवाच।

अग्निरस्मि[10] जन्मना जातवेदाः[11]।

अहमस्मि प्रथमजा[12] इत्येताभ्याम्॥ १४[13]॥

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।

अर्कस्त्रिधातू रजसो विमानोऽजस्रो घ[14]र्मो हविरस्मि नाम[11]॥

नुभवत्यत्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे। This shows that by the time of Sāyaṇa, the 13th section was regarded as an integral part of the Nirukta. That this was Sāyaṇa's genuine belief is further supported by his frequent quotations from these sections.

Madhusūdana Sarasvatī (C. 1560 A. D.) writes in his com. on the *Mahimnastotra*, s'loka 7 भगवता यास्केन 'समाम्नायः समाम्नातः इत्यादि त्रयोदशाध्यायात्मकं निरुक्तमारचितम्।

A summary of the thirteen sections is added as follows:— अ[1]थेमा य[2]द्यावो य[3]दुदञ्चो वि हि स[4]तोः से[5]ण्येव त[6]रत्स च[7]त्वारि शृङ्गा स्व[8]र्यन्तश्च[9]त्वारि वा[10]गृचो अक्षर आ[11]दित्य इ[12]त्येक्षरं न क्षरति हृ[13]दा तष्टेषु त्रयोदश॥ M 4, C 2, C 6, S. C 2 include this summary in that of the following 37 sections given at the end of the last section of the next chapter. Although according to the colophon of C 2 the 13th ch. comes to an end, yet no summary of its contents is made. This shows that, in reality, the 13th ch. is not ended.

१. M 1 begins with ॐ but it does not begin every ch. with ॐ. M 4 begins with ॐ, and every ch. is commenced with ॐ. The text is not written continuously but is separated from the previous part in C 6.

२. See N. 7–12. chapters.

३. See N. 13. 1–13.

४. Fragment of RV. I. 115. 1.

५. कर्मद्रष्टा M 3, C 5, See. Bib. Ind. IV. 368.

६. Cf. N. 7. 18.

७. ०मेषगणः Bib. Ind.

८. प्रवदन्ति M 1, M 4, C 2, C 3, C 6, S; R. B. Bib. Ind.

९. RV. I. 164. 46.

१०. रश्मि C 3.

११. RV. III. 26. 7.

१२. ARS. 1. 9; TB. 2. 8. 8. 1; TA. 9. 10. 6; TU. 3. 10. 6; Nṛp. U. 2. 4.

१३. ॥ १४ ॥ १ ॥ M 1; ॥ १४ ॥ C 2, C 3; ॥ १ ॥ M 4, C 6, S; ॥ १ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; W 2 places the figure ॥ १४ ॥ although the words इति प्रथमः पादः are written after the 13th section. Mi has the figure ॥ १ ॥ १४ ॥. This will indicate the method used by various Mss. in numbering the following sections.

१४. घर्मो R. See Bib. Ind. IV. 368.

अ॒हम॑स्मि प्रथम॒जा ऋ॒तस्य॒ पूर्वं॑ दे॒वेभ्यो॑ अ॒मृत॑स्य॒ नाम॑।
यो मा॒ ददा॑ति॒ स इदे॒वमाव॑द॒ अ॒हमन्न॒मन्न॑म॒दन्त॑मद्मि॥

इति स ह ज्ञात्वा प्रादुर्बभूव। एवं तं व्याजहारायन्तमात्मानमध्यात्मजमन्तिकमन्यस्मा आचक्ष्वेति॥ १५[६]॥

अप॑श्यं गो॒पामनि॑पद्यमान॒मा च॒ परा॑ च प॒थिभि॒श्चर॑न्तम्।
स स॒ध्रीची॒: स विषू॑ची॒र्वसा॑न॒ आ व॑रीवर्ति॒ भुव॑नेष्व॒न्तः[७]॥

आवरीवर्ति भुवनेष्वन्तरिति। अथैष महानात्मा सत्त्वलक्षणस्तत्परं तद्ब्रह्म तत्सत्यं तत्सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगन्धं तदमृतं तच्छुक्लं तन्निष्ठो भूतात्मा। सैषा भूतप्रकृतिरित्येके। तत्क्षेत्रं तज्ज्ञानात्क्षेत्रज्ञमनुप्राप्य निरात्मकम्। अथैष महानात्मा त्रिविधो भवति। सत्त्वं रजस्तम इति। सत्त्वं तु मध्ये विशुद्धं तिष्ठति। अभितो रजस्तमसी इति कामद्वेषस्तम इत्यविज्ञातस्य विशुध्यतो विभूतिं कुर्वतः क्षेत्रज्ञपृथक्त्वाय कल्पते। प्रतिभातिलिङ्गो महानात्मा तमोलिङ्गो विद्या प्रकाशलिङ्गस्तमः। अपि निश्चयलिङ्ग आकाशः॥ १६[११]॥

आकाशगुणः शब्दः[१२]। आकाशाद्वायुर्द्विगुणः स्पर्शेन। वायोर्ज्योतिस्त्रिगुणं रूपेण। ज्योतिष आपश्चतुर्गुणा रसेन। अद्भ्यः पृथिवी पञ्चगुणा गन्धेन। पृथिव्या भूतग्रामस्थावरजङ्गमाः। तदेतदहर्युगसहस्रं[१३] जागर्ति। तस्यान्ते सुषुप्स्यन्नङ्गानि प्रत्याहरति। भूतग्रामाः पृथिवीमपि यन्ति। पृथिव्यपः। आपो ज्योतिषम्। ज्योतिर्वायुम्। वायुराकाशम्। आकाशो मनः। मनो विद्याम्। विद्या महान्तमात्मानम्। महानात्मा प्रतिभाम्। प्रतिभा प्रकृतिम्। सा स्वपिति युगसहस्रं[१४] रात्रिः। तावेतावहोरात्रावजस्रं परिवर्तेते। स कालस्तदेतदहर्भवति।

युगसहस्रपर्यन्तमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ इति॥ १७[१६]॥

---

१. नाभिः M 1, M 4, C 2, C 6, W 1, S. cf. SV. See. Bib. Ind. loc. cit.

२. इदेवमावा M 1, M 4, C 2, C 6, S. Roth, B; इवेदमावाद C 3, see Bib, Ind. loc. cit.

३. ARS. I. 9; TB. 2. 8. 8. 1; TA. 9. 10. 6; TU. 3. 10. 6; Nṛp. U. 2. 4.

४. व्याजहारायतम etc. R. ते व्याजहारायन्तम° L.

५. °मभ्यात्म° R.

६. ॥ २ ॥ M 4, C 6, S; ॥ २ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ २ ॥ १५ ॥ Mi, ॥ १५ ॥ M 1, C 2, C 3; W 2.

७. RV. I. 164. 31; X. 177. 3.

८. Missing in the text but added on the margin in a different handwriting in M 1.

९. तदज्ञाना° Roth. see Bib. Ind. IV. 370.

१०. निरात्मजम् M 1, Roth. see Bib. Ind. loc. cit.

११. ॥ ३ ॥ M 4, C 6, S; ॥ ३ ॥ of the second pāda, M 3, C 4, C 5, W 1, W 3; ॥ ३ ॥ १६ ॥ Mi; ॥ १६ ॥ M 1, C 2, C 3; W 2.

१२. Cf. Manu. I. 75.

१३. Cf. Bh. Gītā. VIII. 16-19.

१४. Omitted by M 1.

१५. Cf. Bh. Gītā. VIII. 17; cf. Manu i. 73; cf. BD. VIII. 98.

१६. ॥ ४ ॥ M 4, C 6, S; ॥ ४ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ ४ ॥ १७ ॥ Mi; ॥ १७ ॥ M 1, C 2, C 3; W 2.

तं परिवर्तमानमन्योऽनुप्रवर्तते । स्रष्टा द्रष्टा विभक्तातिमात्रोऽहमिति गम्यते । स मिथ्यादर्शनेदं पावकं महाभूतेषु चिरोण्वाकाशाद्वायोः [1]प्राणश्चक्षुश्च वक्तारं च तेजसोऽद्भ्यः स्नेहं पृथिव्या मूर्तिः । [2]पार्थिवाँस्त्वष्टौ गुणान्विद्यात् । त्रीन्मातृतस्त्रीन्पितृतः । अस्थिस्नायुमज्जानः पितृतः । त्वङ्मांसशोणितानि मातृतः । अन्नपानमित्यष्टौ । सोऽयं पुरुषः सर्वमयः सर्वज्ञानोऽपि क्लृप्तः ॥ १८[3] ॥

स यद्यनुरुध्यते तद्भवति । यदि [4]धर्ममनुरुध्यते तद्देवो भवति । यदि ज्ञानमनुरुध्यते तदमृतो भवति । यदि काममनुरुध्यते संच्यवते । इमां योनिं संदध्यात् । तदिद[5]मत्र मतम् । श्लेष्मा रेतसः संभवति । श्लेष्मणो रसः । रसाच्छोणितम् । शोणितान्माँसम् । माँसान्मेदः । मेदसः स्नावा । स्नाव्नोऽस्थीनि । अस्थिभ्यो मज्जा । मज्जातो रेतः । तदिदं योनौ रेतः सिक्तं पुरुषः संभवति । [6]शुक्रातिरेके पुमान्भवति । शोणितातिरेके स्त्री भवति । द्वाभ्यां समेन नपुंसको भवति । [7]शुक्रेण भिन्नेन यमो भवति । शुक्रशोणितसंयोगान्मातृपितृसंयोगाच्च । तत्कथमिदं शरीरं परं संयम्यते । सौम्यो भवति । एकरात्रोषितं कललं भवति । पञ्चरात्राद् बुद्बुदाः । सप्तरात्रात्पेशी । द्विसप्तरात्रादर्बुदः । पञ्चविंशतिरात्रः स्वस्थितो घनो भवति । मासमात्रात्[8]कठिनो भवति । द्विमासाभ्यन्तरे शिरः संपद्यते । मासत्रयेण ग्रीवाव्यादेशः । मासचतुष्केण त्वग्व्यादेशः । पञ्चमे मासे नखरोमव्यादेशः । षष्ठे मुखनासिकाक्षिश्रोत्रं च संभवति । सप्तमे चलनसमर्थो भवति । अष्टमे बुध्याध्यवस्यति । नवमे सर्वाङ्गसंपूर्णो भवति ।

मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ।
नाना योनिसहस्राणि मयोषितानि यानि वै[9] ॥
आहारा विविधा भुक्ताः पीता नानाविधाः स्तनाः ।
मातरो विविधा दृष्टाः पितरः सुहृदस्तथा[10] ॥
अवाङ्मुखः पीड्यमानो जन्तुश्चैव समन्वितः ।
सांख्यं योगं समभ्यस्येत्पुरुषं वा पञ्चविंशकम्[11] ॥ इति ।

ततश्च दशमे मासे प्रजायते । जातश्च वायुना [12]स्पृष्टो न स्मरति जन्ममरणम् । अन्ते च शुभाशुभं[13] कर्मैतच्छरीरस्य प्रामाण्यम् ॥ १९[14] ॥

---

१. प्राणं चक्षुश्च M 3, C 4, C 5, W 1, W 2, W 3, Mi

२. See Bib. Ind. IV. 372.

३. ॥ ५ ॥ M 4, C 6, S; ॥ ५ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ ५ ॥ १५ ॥ Mi; ॥ १५ ॥ M 1, C 2, C 3; W 2.

४. धर्मोऽनु॰ Bib. Ind. loc. cit.

५. ॰दभन्नवतम् M 3, Mi, W 1, W 2, C 4; ॰दभन्नमतम् C 5.

६. Cf. AB. ii. 5. 5; iii. 3. 13. see Bib. Ind. IV. 373.

७. शुक्रभिन्नेन M 1, M 4, C 2, C 3, C 6, S, R. see Bib. Ind. IV. 373.

८. कठिणो R.

९. Cf. the *Garbhopaniṣat*. 4.

१०. „

११. Untraced.

१२. स्पृष्टस्तत्र. M 1, M 4, C 2, C 3, C 6, S, R. B.

१३ The passage: रसाच्छोणितम्...शुभाशुभं कर्म is almost identical with the *Garbhopaniṣat*. 2–4.

१४. ॥ ६ ॥ M 4, C 6, S; ॥ ६ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ ६ ॥ १९ ॥ Mi, ॥ १९ ॥ M 1, C 2, C 3; W 2.

अष्टोत्तरं संधिशतमष्टाकपालं शिरः संपद्यते । षोडश वपापलानि । नव स्नायुशतानि । सप्त शतं पुरुषस्य मर्मणाम् । अर्धचतस्रो रोमाणि कोट्यः । हृदयं ह्यष्टकपालानि । द्वादशकपालानि जिह्वा । वृषणौ ह्यष्टसुपर्णौ । तथोपस्थगुदपाय्वेतन्मूत्रपुरीषं[2] कस्मादाहारपानसिक्तत्वादनुपचितकर्मणावन्योन्यं[3] जयेते इति । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च । महत्यज्ञानतमसि मग्नौ जरामरणक्षुत्पिपासाशोकक्रोधलोभमोहमदभयमत्सरहर्षविषादेर्ष्यासूयात्मकैर्द्वन्द्वैरभिभूयमानः सोऽस्मादार्जवं[4] जवीभावानां तन्निर्मुच्यते । सोऽस्मात्पान्नं[5] महाभूमिकावच्छरीरान्निमेषमात्रैः प्रक्रम्य प्रकृतिरधिपरीत्य तैजसं शरीरं कृत्वा कर्मणोऽनुरूपं फलमनुभूय तस्य संक्षये पुनरिमँल्लोकं प्रतिपद्यते ॥ २०[6] ॥

अथ ये हिंसामाश्रित्य विद्यामुत्सृज्य महत्तपस्तेपिरे चिरेण वेदोक्तानि वा कर्माणि कुर्वन्ति ते धूममभिसंभवन्ति । धूमाद्रात्रिम् । रात्रेरपक्षीयमाणपक्षम् । अपक्षीयमाणपक्षाद् दक्षिणायनम् । दक्षिणायनात्पितृलोकम् । पितृलोकाच्चन्द्रमसम् । चन्द्रमसो वायुम् । वायोर्वृष्टिम् । वृष्टेरोषधयश्चैतद्भूत्वा तस्य संक्षये पुनरेवेमँल्लोकं प्रतिपद्यते ॥ २१[9] ॥

अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति तेऽर्चिरभिसंभवन्ति । अर्चिषोऽहः । अह्न आपूर्यमाणपक्षम् । आपूर्यमाणपक्षादुदगयनम् । उदगयनाद्देवलोकम् । देवलोकादादित्यम् । आदित्याद्वैद्युतम् । वैद्युतान्मानसम् । मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसंभवन्ति । ते न पुनरावर्तन्ते । शिष्टा दन्दशूका यत इदं न जानन्ति तस्मादिदं वेदितव्यम् । अथाप्याह ॥ २२ ॥[10]

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति[11] ॥

न तं विद्यया विदुषो यमेवं विद्वाँसो वदन्ति । अक्षरं ब्रह्मणस्पतिमन्यद्युष्मा-

---

१. ततो M 1, C 2, C 3, C 6.

२. पाय्वेत० M 3, Mi, C 4, C 5, W 1, W 2.

३. कर्मणा M 3, Mi, C 4, C 5, W 1, W 2; see Bib. Ind. IV. 375.

४. ०दार्जवजर्वा० M 1, M 4, C 2, C 3, C 6, S; B.

५. सोऽस्मात्पान्नमहा० M 3, Mi, W 1, W 2, W 3, C 4, C 5.

६. ॥ ९ ॥ M 4, C 6, S; ॥ ९ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ ७ ॥ २० ॥ Mi; ॥ २० ॥ M 1, C 2, C 3; W 2.

७. तस्य संक्षये is omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.

८. पुनरिमँल्लोकं L.

९. ॥ ८ ॥ M 4, C 6, S; ॥ ८ ॥ of the second pāda M 3, C 4, C 5, W 1, W 3; ॥ ८ ॥ २१ ॥ Mi; ॥ २१ ॥ M 1, C 2, C 3; W 2.

१०. ॥ ९ ॥ M 4, C 6, S; ॥ ९ ॥ of the second pāda M 3, C 4, C 5, W 3; ॥ ९ ॥ २२ ॥ Mi; ॥ २२ ॥ M 1, C 2, C 3; W 2. The इति द्वितीयः पादः ॥ ९ ॥ २२ ॥ W 1.

११. RV. X. 82. 7; VS. 17. 31; TS. 4. 6. 2. 2; Ks. 18. 1; Ms. 2. 10 3: 135. 1.

कमन्तरमन्यदेषामन्तरं वभूवेति । नीहारेण प्रावृतास्तमसा जल्या[1] चासुतृप उक्थशासः प्राणं सूर्यं यत्पथगामिन[2]श्चरन्ति । अविद्वाँसः क्षेत्रज्ञमनुप्रवदन्ति । अथाहो विद्वाँसः क्षेत्रज्ञोऽनुकल्पते । तस्य तपसा महाप्रमादमेति । अथास्तव्यो भवति । तेनासन्ततमिच्छेत् । तेन सख्यमिच्छेत् । एष हि सखा श्रेष्ठः संजानातिभूतं भवद्भविष्यदिति । ज्ञाता कस्मात् । ज्ञायते[3]: । सखा कस्मात् । सख्यतेः । सह भूतेन्द्रियैः शेरते । महाभूतानि सेन्द्रियाणि । प्रज्ञया कर्म कारयतीति । तस्य यत्तपः[4] प्रतिष्ठाशीलमुपशम आत्मा ब्रह्मेति स ब्रह्मभूतो भवति । साक्षिमात्रो व्यवतिष्ठतेऽबन्धो ज्ञानकृतः ॥

अथात्मनो महतः प्रथमं भूतनामधेया[5]न्यनुक्रमिष्यामः ॥ २३ ॥[6]

हंसः । घर्मः[7] । यज्ञः[8] । वेनः[9] । मेधः[10] । कृमिः । भूमिः[11] । विभुः । प्रभुः । शंभुः । राभुः । वृषकर्मा । सोमः[12] । भूतम्[13] । भुवनम्[13] । भविष्यत्[13] । आपः[14] । महत्[15] । व्योम[16] । यशः[17] । महः[13] । स्वर्णीकम् । स्मृतीकम्[13] । स्वृतीकम्[13] । सतीकम्[13] । सतीनम्[13] । गहनम्[13] । गभीरम्[13] । गह्वरम्[13] । कम्[18] । अन्नम्[13] । हविः[13] । सद्म[19] । सदनम्[13] । ऋतम्[20] । योनिः[21] । ऋतस्य योनिः[13] । सत्यम्[13] । नीरम्[22] । हविः[13] । रयिः[23] ।

---

१. जल्या M 3, Mi, C 4, C 5, W 1, W 3.

२. पथगामिन्यः M 3.

३. जानते: C 5, C 4, W 2; जायते: M 1, M 4, C 2, C 3, C 6, S; R. see Bib. Ind. IV. 380.

४. यत्तप: M 3.

५. ०धेयान्युत्क्रमिष्यामः R.

६. ॥ १० ॥ M 4, C 6, S; ॥ १० ॥ of the second pāda M 3, C 4, C 5, W 3; ॥ १० ॥ २३ ॥ Mi; ॥ २३ ॥ M 1, C 2, C 3; W 2; ॥ १ ॥ of the third pāda W 1.

७. Cf. Ngh. synonym of day. I. 9; synonym of sacrifice III. 17.

८. Ngh. III. 17.

९. Synonym of wise, Ngh. III. 15; synonym of sacrifice, Ngh. III. 17.

१०. Synonym of wise, Ngh. III. 15.

११. Synonym of earth, Ngh. I. 1.

१२. Ngh. V. 5.

१३. Synonym of water, Ngh. I. 12.

१४. Synonym of atmosphere, Ngh. I. 3; of water, I 12; terrestrial deities, V. 3.

१५. Synonym of water, Ngh. I. 12; of great, III. 3.

१६. Synonym of atmosphere, Ngh. I. 3; of quarter, I. 6; of water, I. 12.

१७. Synonym of water, Ngh. I 12; of food, II. 7; of wealth II. 10.

१८. Synonym of water, Ngh. I. 12; of happiness, III. 6.

१९. Synonym of water, Ngh. I. 12; of battle, II. 17; of house, III. 4.

२०. Synonym of wealth, Ngh. II. 10; of truth, III. 10.

२१. Synonym of water, Ngh. I. 12; of house, III. 4.

२२. See note १३. Omitted by M 3, C 4, C 5, W 1, W 2, W 3.

२३. Synonym of water, Ngh. I. 12; of wealth, II. 10.

सत् । पूर्णम्[1] । सर्वम्[2] । अक्षितम् । बर्हिः[3] । नाम । सर्पिः[3] । अपः[4] । पवित्रम्[5] । अमृतम्[6] । इन्दुः[7] ।
हेम[8] । स्वः । सर्गाः । शम्बरम्[9] । अम्बरम्[10] । वियत्[11] । व्योम[12] । बर्हिः[3] । धन्व[11] । अन्तरिक्षम्[11] ।
आकाशम्[11] । आपः[13] । पृथिवी[14] । भूः[15] । स्वयम्भूः[11] । अध्वा[16] । पुष्करम्[11] । सगरः[17] । समुद्रः[11] । तपः[18] ।
तेजः[19] । सिन्धुः[20] । अर्णवः । नाभिः । ऊधः[21] । वृक्षः । तत् । यत् । किम् । महः[22] । वरेण्यम् । हंसः ।
आत्मा । भवन्ति[23] । वर्धन्ति[24] । अध्वानम् । यद्वाहिष्ठ्या[25] । शरीराणि । अध्ययं च संस्कुरुते[26] । यज्ञः ।
आत्मा । भवति । यदेनं तन्वते ।

अथैतं महान्तमात्मानमेतानि सूक्तान्येता ऋचो ऽनुप्रवदन्ति ॥ २४ ॥[27]

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥[28]

---

१. Synonym of water, Ngh. I. 12.

२. सवम् B. see १.

३. Synonym of atmosphere, Ngh. I. 3; of water, I. 12; terrestrial diety, V. 2.

४. Synonym of water Ngh. I. 12; of action, II. 1.

५. Synonym of water, Ngh. I. 12; of pure, IV. 2.

६. Synonym of gold, Ngh. I. 2; of water, I. 12.

७. Synonym of water, Ngh. I. 12; of sacrifice, III. 17; atmospheric deity, V. 4.

८. Synonym of water, Ngh. I. 12; of celestial deity, V. 5.

९. Synonym of water, Ngh. I. 12; of strength, II. 9.

१०. Synonym of atmosphere, Ngh. I. 3; of near, II. 16.

११. Synonym of atmosphere, Ngh. I. 3.

१२. Synonym atmosphere, Ngh. I. 3; of quarter, I. 6; of water, Ngh. I. 12.

१३. Synonym of water, Ngh. I. 12.

१४. Cf. Ngh. I. 1; synonym of atmosphere, I. 2; terrestrial deity, V. 1; atmospheric deity V. 4; celestial deity V. 5.

१५. Synonym of earth, Ngh. I. 1; of atmosphere, I. 3.

१६. अध्व. B. and Bib. Ind. see ११.

१७. सगरं M 3, C 4, C 5, W 1, W 2, W 3, see ११.

१८. Synonym of flame, Ngh. I. 17.

१९. Synonym of flame, Ngh. I. 17; of water, I. 12.

२०. Cf. Ngh. I. 13.

२१. Omitted by च. छ. ज. Mss., see Bib. Ind. IV. 381. ऊर्ध्वः R. synonym of night, Ngh. I. 7.

२२. Synonym of water, Ngh. I. 12; of food, II. 7; of wealth, II. 10.

२३. भवति R. Bib. Ind.

२४. वधन्त्यध्वानम् R.

२५. यद्वाहिष्ठ्या R.

२६. अध्ययं संस्कुरुते M 3, C 4, C 5; अध्ययं च सङ्कुरुते W 2, Mi; see Bib. Ind. IV. 381.

२७. ॥ ११ ॥ M 4, C 6, S; ॥ ११ ॥ of the second pāda M 3, C 4, C 5, W 3; ॥ ११ ॥ २४ ॥ Mi; ॥ २४ ॥ M 1, C 2, C 3; W 2; ॥ २ ॥ of the third pāda W 1.

२८. RV. IX. 96. 5.

सोमः पवते जनयिता मतीनां जनयिता दिवो जनयिता पृथिव्या जनयिताग्नेर्जनयिता सूर्यस्य जनयितेन्द्रस्य जनयितोत विष्णोः ॥ २५[2] ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्[3] ॥

ब्रह्मा देवानामिति । एष हि ब्रह्मा भवति । देवानां देवनकर्मणामादित्यरश्मीनाम् । पदवीः कवीनामिति । एष हि पदं वेत्ति । कवीनां कवीयमानानामादित्यरश्मीनाम्[4] । ऋषिर्विप्राणामिति । एष हि ऋषिणो[5] भवति । विप्राणां व्यापनकर्मणामादित्यरश्मीनाम् । महिषो मृगाणामिति । एष हि महान्भवति । मृगाणां मार्गणकर्मणामादित्यरश्मीनाम् । श्येनो गृध्राणामिति । श्येन आदित्यो भवति । श्यायतेर्गतिकर्मणः । गृध्र आदित्यो भवति । गृध्यतेः स्थानकर्मणः । यत एतस्मिंस्तिष्ठति । स्वधितिर्वनानामिति । एष हि स्वयं कर्माण्यादित्यो धत्ते । वनानां वननकर्मणामादित्यरश्मीनाम् । सोमः पवित्रमत्येति रेभन्निति । एष हि पवित्रं रश्मीनामत्येति । स्तूयमान एष एवैतत्सर्वमक्षरम् । इत्यधिदैवतम् ।

अथाध्यात्मम् । ब्रह्मा देवानामिति । अयमपि ब्रह्मा भवति । देवानां देवनकर्मणामिन्द्रियाणाम् । पदवीः कवीनामिति । अयमपि पदं वेत्ति । कवीनां कवीयमानानामिन्द्रियाणाम्[6] । ऋषिर्विप्राणामिति । अयमपि ऋषिणो भवति[7] । विप्राणां व्यापनकर्मणामिन्द्रियाणाम् । महिषो मृगाणामिति । अयमपि महान्भवति । मृगाणां मार्गणकर्मणामिन्द्रियाणाम् । श्येनो गृध्राणामिति । श्येन आत्मा भवति । श्यायतेर्ज्ञानकर्मणः । गृध्राणीन्द्रियाणि । गृध्यतेर्ज्ञानकर्मणः । यत एतस्मिंस्तिष्ठन्ति[8] । स्वधितिर्वनानामिति । अयमपि स्वयं कर्माण्यात्मनि धत्ते । वनानां वननकर्मणामि-

१. This is the reading of the Mss. of the shorter recension; those of the longer recension read the text as follows:

सोमः पवते । सोमः सूर्यः प्रसवनात् । जनिता मतीनां प्रकाशकर्मणामादित्यरश्मीनाम् । दिवो द्योतनकर्मणामादित्यरश्मीनाम् । पृथिव्याः प्रथमनकर्मणामादित्यरश्मीनाम् । अग्नेर्गतिकर्मणामादित्यरश्मीनाम् । सूर्यस्य स्वीकरणकर्मणामादित्यरश्मीनाम् । इन्द्रस्यैश्वर्यकर्मणामादित्यरश्मीनाम् । विष्णोर्व्याप्तिकर्मणामादित्यरश्मीनाम् । इत्यधिदैवतम् ।

अथाध्यात्मम् । सोम आत्मा । अप्येतस्मादेवेन्द्रियाणां जनितेत्यर्थः । अपि वा सर्वाभिर्विभूतिभिर्विभूतत आत्मा । इत्यात्मगतिमाचष्टे ॥ २५ ॥

२. ॥ १२ ॥ M 4, C 6, S; ॥ १२ ॥ of the second pāda M 3, C 4, C 5, W 3; ॥ १२ ॥ २५ ॥ Mi; ॥ २५ ॥ M 1, C 2, C 3; W 2; ॥ ३ ॥ of the third pāda W 1.

३. RV. IX. 96. 6; VS. 37. 7. TA. 10. 10. 4.

४. कवीयमाणाना° ख. ग. ज. see Bib. Ind. IV. 383.

५. ऋषिणा. ग. हि ऋषिणा. ख. ज. loc. cit.

६. कवीयमाणा° loc. cit.

७. अयमप्यृषिणो. Bib. Ind. IV. 384; B.

८. °तिष्ठति. Bib. Ind. loc. cit.

न्द्रियाणाम्। सोमः पवित्रमत्येति रेभन्निति। अयमपि पवित्रमिन्द्रियाण्यत्येति। स्तूयमानोऽयमेवैतत्सर्वमनुभवति। इत्यात्मगतिमाचष्टे ॥ २६[2] ॥

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम्।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः[3] ॥

वह्निरादित्यो भवति। स तिस्रो वाचः प्रेरयति। ऋचो यजूंषि सामान्यृतस्यादित्यस्य कर्माणि ब्रह्मणो मतानि। एष एवैतत्सर्वमक्षरम्। इत्यधिदैवतम्।

अथाध्यात्मम्। वह्निरात्मा भवति। स तिस्रो वाच ईरयति [प्रेरयति[4]।] विद्यामतिबुद्धिमतामृतस्यात्मनः कर्माणि ब्रह्मणो मतानि। अयमेवैतत्सर्वमनुभवति। इत्यात्मगतिमाचष्टे ॥ २७[5] ॥

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः।
सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते[6] ॥

एत एव सोमं गावो धेनवो रश्मयो वावँश्यमानाः[7] कामयमाना आदित्यं यन्ति। एवमेव सोमं विप्रा रश्मयो मतिभिः पृच्छमानाः कामयमाना आदित्यं यन्ति। एवमेव सोमः सुतः पूयते अज्यमानः। एतमेवार्काश्च त्रिष्टुभश्च संनवन्ते। तत एतस्मिन्नादित्य एकं भवन्ति। इत्यधिदैवतम्।

अथाध्यात्मम्। एत एव सोमं गावो धेनव इन्द्रियाणि वावश्यमानानि कामयमानान्यात्मानं यन्ति। एवमेव सोमं विप्रा इन्द्रियाणि मतिभिः पृच्छमानानि कामयमानान्यात्मानं[8] यन्ति। एवमेव सोमः सुतः पूयते अज्यमानः। इममेवात्मा च सप्त ऋषयश्च संनवन्ते। तान्येतस्मिन्नात्मन्येकं[9][10] भवन्ति। इत्यात्मगतिमाचष्टे ॥ २८[11] ॥

---

१. इति is omitted by Roth.

२. ॥ १३ ॥ M 4, C 6, S; ॥ १३ ॥ of the 2nd pāda M 3, C 4, C 5, W 3; ॥ १३ ॥ २६ ॥ Mi; ॥ २६ ॥ M 1, C 2, C 3; W 2; ॥ ४ ॥ of the 3rd pāda W 1.

३. RV. IX. 97. 34.

४. प्रेरयति is omitted M 3, C 4, C 5, Mi, W 1, W 2, W 3.

५. ॥ १४ ॥ M 4, C 6, S; ॥ १४ ॥ of the 2nd pāda. M 3, C 4, C 5, W 3; ॥ १४ ॥ २७ ॥ Mi; ॥ २७ ॥ M 1, C 2, C 3, W 2; ॥ ५ ॥ of the 3rd pāda. W 1.

६. RV. IX. 97. 35.

७. वावाश्य॰ ख. ग. झ. see Bib. Ind. IV. 386.

८. कामयमानान्यात्मानं omitted by M 3, C 4, C 5.

९. तानीमान्येत॰ M 3, C 4, C 5, W 1, W 2, W 3, Mi; Bib. Ind.

१०. ॰स्मन्नेकं C 5.

११. ॥ १५ ॥ M 4, C 6, S; ॥ १५ ॥ of the 2nd pāda. M 3, C 4, C 5, W 3; ॥ १५ ॥ २८ ॥ Mi; ॥ २८ ॥ M 1, C 2, C 3, W 2; ॥ ६ ॥ of the 3rd pāda. W 1.

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥

अत्यक्रमीत्समुद्र आदित्यः परमे व्यवने वर्षकर्मणा जनयन्प्रजा भुवनस्य राजा सर्वस्य राजा। वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः। इत्यधिदैवतम् ।

अथाध्यात्मम् । अत्यक्रमीत्समुद्र आत्मा परमे व्यवने ज्ञानकर्मणा जनयन्प्रजा भुवनस्य राजा सर्वस्य राजा । वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः । इत्यात्मगतिमाचष्टे ॥ २९[3] ॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवानामाधिपत्यम् । अदधादिन्द्रे पवमान ओजः । अजनयत्सूर्ये ज्योतिरिन्दुरादित्यः । इन्दुरात्मा ॥ ३०[6] ॥

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥

विधुं विधमनशीलम् । दद्राणं दमनशीलम् । युवानं चन्द्रमसम् । पलित आदित्यो गिरति । सद्यो म्रियते । स दिवा समुदिता । इत्यधिदैवतम् ।

अथाध्यात्मम् । विधुं विधमनशीलम् । दद्राणं दमनशीलम् । युवानं महान्तम् । पलित आत्मा गिरति । रात्रौ म्रियते । रात्रिः समुदिता । इत्यात्मगतिमाचष्टे ॥ ३१[9] ॥

साकञ्जानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥

---

१. RV. IX. 97. 40.

२. महत्सोमो. Bib. Ind.

३. ॥ १६ ॥ M 4, C 6, S ; ॥ १६ ॥ of the 2nd pāda M 3, C 4, C 5, W 3 ; ॥ १६ ॥ २९ ॥ Mi ; ॥ २९ ॥ M 1, C 2, C 3, W 2 ; ॥ ७ ॥ of the 3rd pāda. W 1.

४. RV. IX. 97. 41.

५. देवानाधिपत्य° Roth ; च. छ. ज. See Bib. Ind. IV. 387.

६. ॥ १७ ॥ M 4, C 6, S ; ॥ १७ ॥ of the 2nd pāda. M 3, C 4, C 5, W 3 ; ॥ १७ ॥ ३० ॥ Mi; ॥ ३० ॥ M 1, C 2, C 3, W 2; ॥ ८ ॥ of the 3rd pāda. W 1.

७. RV. X. 55. 5; AV. 9. 27, 9.

८. द्रमनशीलम् M 3, C 4, C 5, Mi; W 1, W 2, W 3.

९. ॥ १८ ॥ M 4, C 6, S; ॥ १८ ॥ of the 2nd pāda. M 3; C 4, C 5, W 3, ॥ १८ ॥ ३१ ॥ Mi; ॥ ३१ ॥ M 1, C 2, C 3, W 2; ॥ ९ ॥ of the 3rd pāda W 1.

१०. RV. I. 164. 15; AV. 9. 25. 16.

सहजातानां षण्णामृषीणामादित्यः सप्तमः। तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वा। अद्भिः सह संमोदन्ते। यत्रैतानि सप्तऋषीणानि ज्योतींषि तेभ्यः पर आदित्यः। तान्येतस्मिन्नेकं भवन्ति। इत्यधिदैवतम्।

अथाध्यात्मम्। सहजातानां षण्णामिन्द्रियाणामात्मा सप्तमः। तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वा। अन्नेन सह संमोदन्ते। यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः पर आत्मा। तान्येतस्मिन्नेकं भवन्ति। इत्यात्मगतिमाचष्टे ॥ ३२[3] ॥

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥

स्त्रिय एवैताः शब्दस्पर्शरूपरसगन्धहारिण्यस्ता अमुं पुंशब्दे निराहारः प्राण इति पश्यन्कष्टान्न विजानात्यन्धः। कविर्यः पुत्रः स इमा जानाति। यः स ईमा जानाति स पितुष्पितासत्। इत्यात्मगतिमाचष्टे ॥ ३३[8] ॥

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥

सप्तैतानादित्यरश्मीनयमादित्यो गिरति। मध्यस्थानोर्ध्वशब्दः। यान्यस्मि-

---

१. See Roth's edition, p. 195.

२. From तेषामिष्टानि... to आचष्टे, the whole passage is taken from 10. 26.

३. ॥ १९ ॥ M 4, C 6, S; ॥ १९ ॥ इति द्वितीयः पादः M 3, C 4; ॥ १९ ॥ of the 2nd pāda. C 5, W 3; ॥ १९ ॥ ॥ ३२ ॥ Mi; ॥ ३२ ॥ M 1, C 2, C 3, W 2; ॥ १० ॥ of the 3rd pāda. W 1.

४. RV. I. 164. 16; AV. 9. 25. 16.

५. एषेति ताः M 1, M 4, C 2, C 3, C 6, S; R. च. छ. ज. See Bib. Ind. IV. 391.

६. पुंशब्देन. Bib. Ind. IV. 391.

७. ईमा. loc. cit.

८. ॥ २० ॥ M 4, C 6, S; ॥ १ ॥ of the 3rd pāda M 3, C 4; ॥ २० ॥ इति द्वितीयः पादः C 5, W 3; ॥ २० ॥ ३३ ॥ Mi; ॥ ३३ ॥ M 1, C 2, C 3, W 2; ॥ ११ ॥ ३३ ॥ इति तृतीयः पादः W 1.

९. RV. I. 164. 36; AV. 9. 28. 7.

१०. यत एतस्मिंस्तिष्ठति M 1, M 4, C 2, C 3, C 6, S; R; यत एतस्मिंस्तिष्ठति च. छ. ज. (see Bib. Ind. IV. 392); यान्यस्मिंस्तिष्ठन्ति Bib. Ind. & Bom. The text preserved in Mss. of both recensions is corrupt. The correct reading can however be restored, for the commentary relating to soul *i. e.* the passage following अथाध्यात्मम् supplies evidence for the text preceeding the same. A comparison of these two parts shows that the same words are repeated, except that इन्द्रियाणि corresponds to rays & actions, आत्मा to the sun and इदम् is used in the latter whereon अदस् is used in the former. From this comparison, it is clear that the passage should be यान्येतस्मिंस्तिष्ठन्ति। I have adopted the reading of the Mss. of the shorter recension, because it is closer to the suggested restoration than the other.

स्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययन्ति परिभुवः परिभवन्ति सर्वाणि[1] कर्माणि वर्षकर्मणा । इत्यधिदैवतम् ।

अथाध्यात्मम् । सप्तेमानीन्द्रियाण्ययमात्मा गिरति मध्यस्थानोर्ध्वशब्दः । यान्यस्मिंस्तिष्ठन्ति तानि धीतिभिश्च मनसा च विपर्ययन्ति परिभुवः परिभवन्ति सर्वाणीन्द्रियाणि[1] ज्ञानकर्मणा । इत्यात्मगतिमाचष्टे ॥ ३४[2] ॥

न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि[3] ।

न[4] विजानामि यदि वेदमस्मि निण्यः संनद्धो मनसा चरामि । न हि जान[5]न्बुद्धिमतः[6] परिवेदयन्तेऽयमादित्योऽयमात्मा ॥ ३५[7] ॥

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ॥

अपाञ्चयति प्राञ्चयति स्वधया गृभीतो ऽमर्त्य आदित्यो मर्त्येन चन्द्रमसा सह । तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा । पश्यत्यादित्यं न चन्द्रमसम् । इत्यधिदैवतम् ।

अथाध्यात्मम् । अपाञ्चयति प्राञ्चयति स्वधया गृभीतोऽमर्त्य आत्मा मर्त्येन

---

१. सर्वाणि कर्माणि वर्षकर्मणे० M 3; सर्वाणि कर्माणि ज्ञानकर्मणे० C 5.

२. ॥ २१ ॥ M 4, C 6, S; ॥ २ ॥ of the 3rd pāda M 3, C 4, ॥ १ ॥ of the 3rd pāda, C 5, W 3; ॥ २१ ॥ ३४ ॥ Mi; ॥ ३४ ॥ M 1, C 2, C 3, W 2; ॥ १ ॥ of the 4 th pāda, W 1.

३. RV. I. 164. 37; AV. 9. 28. 5. The Mss. of the longer recension except M 1 and C 6, add the second hemistich of the stanza also, *i. e.* यदा मागन् प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः । Even the first hemistich is not fully given in C 6, which writes only न वि जानामि and then adds: अर्धर्चः ।.

४. The text is corrupt. I have again adopted the text of the shorter recension for it alone has any pretension of being a comment on the vedic quotation. The passage: न विजानामि...चरामि is omitted by all Mss. of the longer recension.

५. विजानन् M 1, M 4, C 2; विजानान् C 6, S; R; L.

६. ०मतः पुष्टिः पुत्रः परिवेदयन्ते. C 4; ०मतः पुत्रः परिवेदयन्ते M 1, M 4, C 2, C 6, S, R; Bib. Ind; Bom; L.

७. ॥ २२ ॥ M 4, C 6, S; ॥ ३ ॥ of the 3rd pāda M 3, C 4; ॥ २ ॥ of the 3rd pāda C 5, W 3; ॥ २२ ॥ ३५ ॥ Mi; ॥ ३५ ॥ M 1, C 1, C 3, W 2; ॥ ३ ॥ of the 4th pāda W 1.

८. RV. I. 164. 38; AV. 9. 28. 6.

९. मनसा Bib. Ind. IV. 395, which is obviously a mistake. मनसा be associated with आत्मा only as is done in the explanation, relating to soul, and not with the sun. The editor adopts the same reading in both the parts of the comm. which are intended to contrast each other.

मनसा सह । तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा । पश्यत्यात्मानं न मनः । इत्यात्मगतिमाचष्टे ॥ ३६[1] ॥

तदिदा॑स॒ भुव॑नेषु॒ ज्येष्ठं॒ यतो॑ ज॒ज्ञ उ॒ग्रस्त्वे॒षनृ॑म्णः ।
स॒द्यो ज॑ज्ञा॒नो नि रि॑णाति॒ शत्रू॒ननु॒ यं विश्वे॒ मद॒न्त्यूमाः॑ ॥[2]

तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तिनृम्णः । सद्यो जज्ञानो निरिणाति शत्रूनिति । रिणातिः[3] प्रीतिकर्मा दीप्तिकर्मा वा । अनुमदन्ति यं विश्व ऊमाः । इत्यधिदैवतम् ।

अथाध्यात्मम् । तद्भवति भूतेषु भुवनेषु ज्येष्ठमव्यक्तं यतो जायत उग्रस्त्वेषनृम्णो ज्ञाननृम्णः । सद्यो जज्ञानो निरिणाति शत्रूनिति । रिणातिः[3] प्रीतिकर्मा दीप्तिकर्मा वा । अनुमदन्ति यं सर्वे ऊमाः । इत्यात्मगतिमाचष्टे ॥ ३७[4] ॥

को अ॒द्य यु॑ङ्क्ते धु॒रि गा ऋ॒तस्य॒ शिमी॑वतो भा॒मिनो॑ दुर्हृणा॒यून् ।
आ॒सन्नि॑षून्हृ॒त्स्वसो॑ मयो॒भून्य ए॑षां भृ॒त्यामृ॒णध॒त्स जी॑वात् ॥[5]

क आदित्यो धुरि गा युङ्क्ते । रश्मीन्कर्मवतो भानुमतो दुराधर्षानसून्यसुनवन्तीषूनिषुणवन्ति[6] मयोभूनि सुखभूनि । य इमं संभृतं वेद कथं स जीवति । इत्यधिदैवतम् ।

अथाध्यात्मम् । क आत्मा धुरि गा युङ्क्ते । इन्द्रियाणि कर्मवन्ति[7] भानुमन्ति[8] दुराधर्षानसून्यसुनवन्तीषूनिषुणवन्ति मयोभूनि सुखभूनि । य इमं[9] संभृतं[10] वेद चिरं जीवति । इत्यात्मगतिमाचष्टे ॥ ३८[11] ॥

क ई॑षते तु॒ज्यते॒ को बि॑भाय॒ को मं॑सते॒ सन्त॒मिन्द्रं॒ को अन्ति॑ ।
कस्तो॒काय॒ क इभा॑यो॒त रा॒येऽधि॑ ब्रव॒त्तन्वे॒३ को जना॑य[12] ॥

१. ॥ २३ ॥ M 4, C 6, S; ॥ ४ ॥ of the 3rd pāda M 3, C 4; ॥ ३ ॥ of the 3rd pāda C 5, W 3; ॥ २३ ॥ ३६ ॥ Mi; ॥ ३६ ॥ M 1, C 1, C 3, W 2; ॥ ३ ॥ of the 4th pāda W 1.

२. RV. X. 120. 1.

३. निरिणाति M 3, C 4, C 5, Mi, W 1, W 2, W 3; Bib. Ind.

४. ॥ २४ ॥ M 4, C 6, S; ॥ ५ ॥ of the 3rd pāda M 3, C 4; ॥ ४ ॥ of the 3rd pāda C 5, W 3; ॥ २४ ॥ ३७ ॥ Mi; ॥ ३७ ॥ M 1, C 1, C 3, W 2; ॥ ४ ॥ of the 4th pāda W 1.

५. RV. I. 84. 16.

६. °सुनसूनवन्ती°. ख. ग. झ. see Bib. Ind. IV. 397.

७. कर्मवतो M 1, M 4, C 2, C 6, 4; R, च. छ. ज. see op. cit. 398.

८. भानुवन्ति M 3; भानुवतो M 1, M 4, C 2, C 6, S; R, च. छ. ज. see loc. cit.

९. इमानि M 3, W 1, W 2, W 3, C 4, C 5, Mi; Bib. Ind.

१०. संभृतानि M 3, W 1, W 2, W 3, C 4, C 5, Mi; Bib. Ind.

११. ॥ २५ ॥ M 4, C 6, S; ॥ ६ ॥ of the 3rd pāda M 3, C 4; ॥ ५ ॥ of the 3rd pāda C 5, W 3; ॥ ५ ॥ of the 4th pāda W 1; ॥ २५ ॥ ३८ ॥ Mi; ॥ ३८ ॥ M 1, C 1, C 3, W 2.

१२. RV. I. 84. 17.

क एव गच्छति को ददाति को बिभेति को मंसते सन्तमिन्द्रम्। कस्तो-कायापत्याय महते च नो रणाय रमणीयाय दर्शनीयाय ॥ ३९[1] ॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥[2]

क आदित्यं पूरयति[3] हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्ध्रुवेभिरिति। कस्मै देवा आवहानाशु होमार्थान्को मंसते वीतिहोत्रः सुदेवः कल्याणदेवः। इत्य-धिदैवतम्।

अथाध्यात्मम्। क आत्मानं पूरयति[3] हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्ध्रुवेभिरिति। कस्मै देवा आवहानाशु होमार्थान्को मंसते[4] वीतिहोत्रः सुप्रज्ञः कल्याणप्रज्ञः। इत्यात्मगतिमाचष्टे ॥ ४०[5] ॥

त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥[6]

त्वमङ्ग प्रशंसीर्देवः शविष्ठ मर्त्यं न त्वदन्योऽस्ति मघवन्पाता वा पालयिता वा जेता वा सुखयिता[7] वा। इन्द्र ब्रवीमि ते वचः स्तुतियुक्तम्[8] ॥ ४१[9] ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति[10] ॥

द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारौ[11]। दुष्कृतं पापं परिसारकमित्याचक्षते। सुपर्णा सयुजा साखायेत्यात्मानं [दुरात्मानं[12]] परमात्मानं प्रत्युत्तिष्ठति। शरीर

---

१. ॥ २६ ॥ M 4, C 6, S; ॥ ७ ॥ of the 3rd pāda M 3, C 4; ॥ ६ ॥ of the 3rd pāda C 5, W 3; ॥ ६ ॥ of the 4th pāda W 1; ॥ २६ ॥ ३९ ॥ Mi; ॥ ३९ ॥ M 1, C 1, C 3, W 2.

२. RV. I. 84. 18.

३. पूजयति M 3, C 4, C 5, W 1, W 2, W 3, Mi.

४. संसते R.

५. ॥ २७ ॥ M 4, C 6, S; ॥ ८ ॥ of the 3rd pāda M 3, C 4; ॥ ७ ॥ of the 3rd pāda C 5, W 3, ॥ ७ ॥ of the 4th pāda W 1; ॥ २७ ॥ ४० ॥ Mi; ॥ ४० ॥ M 1, C 1, C 3, W 2.

६. RV. I. 84. 19.

७. सुखयिता is repeated in C 5.

८. इति स्तुतिसंयुक्तम् M 3, W 1, W 2, W 3, Mi, C 4; इति स्तुतिसंप्रयुक्तम् C 5.

९. ॥ २८ ॥ M 4, C 6, S; ॥ ९ ॥ इति तृतीयः पादः M 3, C 4; ॥ ८ ॥ of the 3rd pāda C 5, W 3; ॥ ८ ॥ of the 4th pāda W 1; ॥ २८ ॥ ४१ ॥ Mi; ॥ ४१ ॥ M 1, C 1, C 3, W 2.

१०. RV. I. 164. 20; AV. 9. 26. 10.

११. Cf. SRV. I. 164. 20. p. i. 704.

१२. Omitted by MSS. of the shorter recension M 3, Mi, W 1, W 2, W 3, C 4, C 5.

एव तज्जायते वृक्षम् । ऋक्षं[१] शरीरम् । वृक्षे[२] पक्षौ प्रतिष्ठापयति । तयोरन्यद्भुक्त्वा-न्यद[३]नश्नन्नन्यां सरूपतां सलोकतामश्नुते । य एवं वेदा[४]नश्नन्नन्योऽभिचाकशीति । इत्यात्मगतिमाचष्टे[५] ॥ ४२ ॥

[आ याहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व ।
तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव[६] ॥

आगमिष्यन्ति शक्रो देवतास्तास्त्रिभिस्तीर्थैभिः शक्रप्रतरैरीळितेभिस्त्रिभिस्ती-र्थैर्यज्ञमिमं नो यज्ञभागमग्नीषोमभागाविन्द्रो जुषस्व । तृप्तामेवं मातुलयोगकन्या भागं सतृकेव सा या देवतास्तास्तत्स्थाने शक्रं निदर्शनम्[७] ॥][८]

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये ।
अग्निं गीर्भि[९]र्हवा[१०]महे ॥

विप्रं विप्रासो ऽवसे विदुः । [वेदं] विन्दतेर्वेदितव्यम् । विमलं[११] शरीरं वायुना । विप्रस्तु पद्म[१२]निलयं हृदिस्थितमकारसंहारितमु[१३]कारं पूरयेन्[१४]मकारनिलयं गमयति[१५] । विप्रं प्राणेषु बिन्दुः[१६] सिक्तं विकसितं वह्नितेजः प्रभुं[१७] कनकं[१८] पद्मे[१९]ष्वमृतशा-रीरममृतजातस्थितममृतवा[२०]दममृतमुखा[२१] वदन्ति । अग्निं गीर्भिर्हवामहे । अग्निं संबोधयेत् । अग्निः सर्वा देवताः[२२] । इति । तस्योत्तरा भूयसे निर्वचनाय ॥ ४३ ॥

---

१. रक्षशरीरं M 1, M 4, C 2, C 3, C 6, C 7, S; R. Bib. Ind.

२. वृक्षं M 1, M 4, C 2, C 3, C 6, C 7, S; R. Bib. Ind.

३. ०रन्यो भुक्त्वा० Mi; ०रन्यद्भुक्त्वाश्नम० M 1, M 4, C 2, C 3, C 6, C 7, S; Bib. Ind. ०रन्यद्भुक्त्वाश्नम० R.

४. वेदाश्नन० M 1, M 4, C 2, C 3, C 6, C 7, S; R; विद्वानन० Bib. Ind.

५. ॥ १ ॥ of the 4th pāda M 3, C 5; ॥ १ ॥ ४४ ॥ Mi.

६. RVKh. VII. 55. 8.

७. निदर्शितम् Bib. Ind.

८. The entire section is omitted by MSS. of the shorter recension: M 3, Mi, W 1, W 2, W 3, C 4, C 5.

९. RV. VIII. 11. 6.

१०. Omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.

११. विमलशरीरेण. M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

१२. हृत्पद्मनिलयस्थितमकारसंहितमुकारं M1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

१३. ०मकारं M 3.

१४. पूरयेत् M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

१५. गतं M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

१६. बिन्दुसिक्तं M 1, M 4, C 2, C 3, C 6, C 7, S; Bib. Ind; बिन्दुसिक्तं R.

१७. प्रभं M 1, etc.

१८. कनकपद्म०. M 1, etc.

१९. परमेश्वरमृत० M 3.

२०. ०वाचा० Mi, M 3; M 1 etc.

२१. मुखे. M 1 etc.

२२. KS. XII. 1. p. 162.

हंसः[1] शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥

हंसं[2] इति हंसाः सूर्य[3]रश्मयः । परमात्मा परं ज्योतिः । पृथि[4]व्याप्तेति व्याप्तं सर्वं व्याप्तं वनन[5]कर्माभ्यासेनादित्यमण्डलेनेति । त्यज[6]तीति लोकः । त्यज[6]तीति हंसः[7] । त्यज[8]न्तीति हंसाः । [प[9]रमहंसाः] परमात्मा सूर्यरश्मिभिः प्रभूतग[10]भीतश्वसतीति । त्रिभिर्वसतीति वा । [11]वह्निर्वस[12]तीति वा । [13]रश्मिभिर्वसतीति वा । सुवर्णरेताः पूर्[14]णो गर्भाः । रिफि[15]रिति रिफता [16]वमकुटिलानि कुर्वन्ता रेफ[17]न्तान्[18]तरिक्षं [19]चरेदर्थेति । अन्तरिक्षं [20]चरतीति दिवि । भूमि[21]गमनं वा । [22]स्वर्भानुः [23]सुप्रसूतो (होता[24]) । होतादित्यस्यगता भवन्ति । अतिथिर्दुरोणसत् । [25]रवन्ति सर्वे र[26]साश्चिकीर्षयन्ति [27]रश्मिभिश्चिकीर्षयन्तीति वा । [वह्निर्विकर्ष[28]यति ।] [29]नेतं भवतीत्यश्वगोजा अद्रिगोजा [30]धनगोजा [31]सर्वगोजातिर्ऋक्च इति तेजो बहुजो शब्दो भवति । निगमो नि[32]गमभ्यो भवत्यृ[33]षिनिर्वचनाय ॥ ४४ ॥

---

१. RV. IV. 40. 5; VS. 10. 24; 12. 14.

२. हंसेति MSS. of the shorter recension.

३. सूर्यरश्मिभिः C 5.

४. पृथिवी व्याप्तेति. M 1, etc.

५. वननकर्मणानभ्या॰. M 1, etc.

६. त्ययतीति M 1, etc.

७. हंसयन् M 1, M 4, etc.

८. त्यजतीति C 5; त्ययतीति M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

९. Omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.

१०. ॰गभीर॰ M 1, M 4 etc.

११. वह्निर्वसतीति वा comes after रश्मि... वा in M 1, M 4, etc.

१२. वसन्तीति वा C 5.

१३. रश्मिसर्व॰ M 1, M 4, etc.

१४. पुरुषाः M 3, Mi, W 1, W 2, W 3, C 4.

१५. रिभेति रिभन्ता M 1, M 4, etc.; रिभीरिति रेफता M 3.

१६. वन॰ M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

१७. रिफन्ता॰ Mi; रिभन्ता॰ M 1, etc.

१८. अन्तरिक्षात् Mi ; अन्तरिक्षा M 1, M 4, etc.

१९. चरत्पथान्तरिक्षा, M 1, M 4, etc.

२०. चरदिति M 1, M 4, अन्तरिक्षा चरदिति R.

२१. भुवि M 1, M 4, etc.

२२. सुभानुः M 1, M 4, etc.

२३. सुप्रभूतो M 1, M 4, etc.

२४. Omitted by M 1, M 4, etc.

२५. द्रवन्ति Mi, C 4, W 1, W 2, W 3; सर्वे दुरोणसद् द्रवं, M 1, M 4, etc.

२६. विकर्षयति. M 1, M 4, etc.

२७. रश्मिर्विकर्षयति वह्निः॰ M 1, M 4, etc.

२८. Omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.

२९. वननं M 1, M 4, etc.

३०. धरित्रिगोजा M 1, M 4, etc.

३१. ऋतगोजाः इत्यृतेति C 5; सर्वगोजा ऋतगोजा ऋतजो, Mi; सर्वे गोजा ऋतजा बहुशब्दा भवन्ति. M 1, M 4, etc.

३२. निगन्तव्यो Mi; निगमव्यति. M 1, M 4, etc.

३३. भवत्यृषे M 1, M 4, etc.

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।[१]
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

त्र्यम्बको रुद्रः । तं त्र्यम्बकं यजामहे । [सुगन्धिम्[२]] सुगन्धिं सुष्ठुगन्धिं पुष्टिवर्धनं पुष्टिकारकमिव । उर्वारुकमिव [फलं[३]] बन्धनादारोधनान्मृत्योः सकाशान्मुञ्चस्व मां कस्मादित्येषापरा[४] भवति ॥ ४५ ॥

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।[५]
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

जातवेदस इति जातमिदं सर्वं सचराचरं स्थित्युत्पत्ति[६]प्रलयं[७]न्यायेन[८] (जातवेदस्यां[९] वैवं[१०] जातवेदसेऽर्चाय)[११] सुनवाम सोममिति । प्रसवायाभिषवाय[१२] सोमं राजानममृतम् । अरातीयतो यज्ञार्थमनिस्रो[१३] निर्दहति[१४] निश्चयेन दहति भस्मीकरोति । सोमो ददद्दित्यर्थः । स नः पर्षदति दुर्गाणि (विश्वानि) दुर्गमानि[१५] स्थानानि नावेव[१६] सिन्धुम् । (नावा सिन्धुं)[११] यथा (यः) कश्चित्कर्णधारो नावा सिन्धोः[१७] स्यन्दमानानां नदीं[१८] जलदुर्गां महाकुलां[१९] तारयति दुरितात्यग्निरिति[२०] दुरितानि[२१] तारयति । तस्यैषापरा भवति ॥ ४६ ॥

[इदं तेऽन्याभिरसमानमद्भिर्याः काश्च सिन्धुं प्र वहन्ति नद्यः ।
सर्पो जीर्णामिव त्वचं जहाति पापं सशिरस्कोऽभ्युपेत्य[२२] ॥

इदं तेऽन्याभिरसमानाभिर्याः काश्च सिन्धुं पतिं कृत्वा नद्यो वहन्ति । सर्पो जीर्णामिव सर्पस्त्वचं त्यजति । पापं त्यजन्ति । आप आप्नोतेः । तासामेषा भवति ॥ १४ ॥ ३४ ॥][२३]

---

१. RV. VII. 59. 12.
२. Omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.
३. Omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.
४. कस्मादित्येषापरा. R.
५. RV. I. 99. 1.
६. ०युत्पत्तिः M 3.
७. ०प्रलयं M 3.
८. ०न्यायेनाम्नाय M 1, M 4, C 2, C 3, C 6, C 7.
९. जातवेदस्या इदं जातं Mi.
१०. वैवं M 3.
११. The passage within brackets is omitted by M 2, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.
१२. प्रसवेनाभि०. M 1, M 4, etc.
१३. ०मितिस्रो M 1, M 4, etc.
१४. निदहाति C 5; निश्चयेन निदहाति M 1, M 4, निश्चये निदहाति R.
१५. दुर्गमनानि M 1, M 4, etc.
१६. नावेव M 1, M 9, etc.
१७. सिन्धुः Mi.
१८. स्यन्दमिमां Mi; स्यन्दनान्नदीं M 1, M 4, etc.
१९. महाकूलां. M 1, M 4, etc.
२०. दुरितान्य० M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.
२१. तानि. M 1, M 4, C 2, etc.
२२. Untraced.
२३. The whole section is omitted by M 3, Mi, C 4, C 5, W 1, W 2, W 3.

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः[१] ॥

शतं जीव शरदो वर्धमानः। इत्यपि निगमो भवति। शतमिति शतं दीर्घमायुः। मरुतो मां[२] वर्धयन्ति। शतमेव[३] शतमात्मानं[४] भवति। [शतमनन्तं भवति। शतमैश्वर्यं भवति।][५] शतमिति शतं दीर्घमायुः ॥ ४७ ॥

मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन्।
विश्वा च न उप मिमीहि मानुष वसूनि चर्षणिभ्य आ[६] ॥

मा च ते धनानि[७] मा च ते कदाचन[८] संरिषुः[९] सर्वाणि प्रज्ञानान्युपमानय[१०]। मनुष्यहितो[११]ऽयमादित्योऽयमात्मा। अथैतदनुप्रवदति[१२]। अथैनं[१३] महान्तमात्मानमेषर्गणः[१४] प्रवदति। वैश्वकर्मणो[१५] देवानां नु वयं जाना नासदासीन्नो सदासीत्तदानीम्[१६]। इति च। सैषात्मजिज्ञासा। सैषा सर्वभूतजिज्ञासा। ब्रह्मणः सार्ष्टिं[१७] सरूपतां सलोकतां गमयति य एवं वेद।

नमो[१८] ब्रह्मणे। नमो महते भूताय। नमो यास्काय। ब्रह्मशुक्लमसीय ब्रह्मशुक्लमसीय ॥ ४८ ॥

॥ इति परिशिष्टम् ॥

---

१. RV. X. 161. 4; AV. 3. 11. 4; 7. 53. 2; 20. 96. 9.

२. पुना M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

३. शतमेनमेव M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

४. शतात्मानं M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

५. The passage within brackets is omitted by M 3, Mi, W 1, W 2, W 3, C 4, C 5.

६. RV. I. 84. 20.

७. धामानि M 1, M 4, C 2, C 3, C 6, C 7, S; R; Bib. Ind.

८. कदा चिन. M 1, M 4, C 2, etc.

९. सर्षुः C 5.

१०. प्रज्ञान्युपमानय M 3; प्रज्ञानान्युपमानाय M 1, M 4, etc.

११. मनुष्याहितो MSS. of the longer recension.

१२. ०प्रवदन्ति M 1, M 4, etc.

१३. अथैतं M 1, M 4, etc.

१४. ०मेषर्गणः M 1, M 4, etc.

१५. विश्वकर्मणो Mi, वैश्वकर्मणे M 1, M 4, etc.

१६. RV. X. 129. 1.

१७. सारिष्टं C 5, M 1, M 4, etc.

१८. In the MSS. of the longer recension, M 1, M 4, C 2, C 3, C 6, C 7, S, the line runs thus: नमो ब्रह्मणे महते भूताय नमः पारस्कराय नमो यास्काय। ब्रह्मशुक्लमसीय etc. This is ignored by Roth. The evidence of the MSS. of both the recensions shows that this passage should form an integral part of the last section. The section should be ended after ब्रह्मशुक्लमसीय, the repetition of this word indicates that the section comes to an end here, but not after य एवं वेद.

APPENDIX I

APPENDIX I

Relation OF THE NIRUKTA TO THE FOLLOWING texts.

(1)	Taittirīya Saṃhitā.	तैत्तिरीयसंहिता ।
(2)	Maitrāyaṇī Saṃhitā.	मैत्रायणीसंहिता ।
(3)	Kāṭhaka Saṃhitā.	काठकसंहिता ।
(4)	Aitareya Brāhmaṇa.	ऐतरेयब्राह्मणम् ।
(5)	Kauṣītaki Brāhmaṇa.	कौषीतकिब्राह्मणम् ।
(6)	Ṣaḍviṃs'a Brāhmaṇa.	षड्विंशब्राह्मणम् ।
(7)	Taittirīya Brāhmaṇa.	तैत्तिरीयब्राह्मणम् ।
(8)	S'atapatha Brāhmaṇa.	शतपथब्राह्मणम् ।
(9)	Mantra Brāhmaṇa.	मन्त्रब्राह्मणम् ।
(10)	Daivata Brāhmaṇa.	दैवतब्राह्मणम् ।
(11)	Gopatha Brāhmaṇa.	गोपथब्राह्मणम् ।
(12)	Aitareya Āraṇyaka.	ऐतरेयारण्यकम् ।
(13)	Taittirīya Āraṇyaka.	तैत्तिरीयारण्यकम् ।
(14)	Sarvānukramaṇī and Vedārthadīpikā of Ṣaḍguruśiṣya.	सर्वानुक्रमणी षड्गुरुशिष्यस्य वेदार्थदीपिका च ।
(15)	Bṛhat Sarvānukramaṇikā.	बृहत्सर्वानुक्रमणिका ।
(16)	Ṛgveda Prātis'ākhya.	ऋग्वेदप्रातिशाख्यम् ।
(17)	Atharva Veda ,,	अथर्ववेदप्रातिशाख्यम् ।
(18)	Vājasaneya ,,	वाजसनेयप्रातिशाख्यम् ।
(19)	Taittirīya ,,	तैत्तिरीयप्रातिशाख्यम् ।
(20)	Bṛhaddevatā.	बृहद्देवता ।
(21)	Aṣṭādhyāyī of Pāṇini.	अष्टाध्यायी ।
(22)	Arthas'āstra of Kauṭalya.	कौटल्यस्यार्थशास्त्रम् ।
(23)	Mahābhāṣya of Patañjali.	महाभाष्यम् ।
(24)	Pūrva Mīmāṃsā.	पूर्वमीमांसा ।
(25)	Sarvadars'anasaṃgraha.	सर्वदर्शनसंग्रहः ।

The Nirukta.	The Taittirīya Saṃhitā.
1. 5: वायुर्वा त्वा मनुर्वा त्वा ।	I. 7. 7. 2: वायुर्वा त्वा मनुर्वा त्वा ।
1. 15: उरु प्रथस्व ।	I. 1. 8. 1; I. 2. 12. 2; VI. 2. 7. 3: उरु प्रथस्व ।
ओषधे त्रायस्वैनम् ।	I. 2. 1. 1; I. 3. 5. 1; VI. 3. 3. 2: ओषधे त्रायस्वैनम् ।
स्वधिते मैनं हिंसीः ।	I. 2. 1. 1; I. 3. 5. 1; VI. 3. 3. 2: स्वधिते मैनं हिंसीः ।
एक एव रुद्रोऽवतस्थे न द्वितीयः ।	I. 8. 6. 1: एक एव रुद्रो न द्वितीयाय तस्थे ।
अग्नये समिध्यमानायानुब्रूहीति ।	VI. 3. 7. 1: अग्नये समिध्यमानायानुब्रूहीत्याह ।
2. 17: यदवृणोतद् वृत्रस्य वृत्रत्वमिति विज्ञायते ।	II. 4. 12. 2: स इमाँल्लोकानवृणोद् यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम् ।
4. 17: सुविते मा धाः ।	I. 2. 10. 2: सुविते मा धाः ।
4. 21: नाभ्या सन्नद्धा गर्भा जायन्त इत्याहुः ।	VI. 1. 7. 2: यदबद्धमवदध्यात् । गर्भाः प्रजानां परापातुकाः स्युः । बद्धमवदधाति । गर्भाणां धृत्यै । निष्टर्क्यं बध्नाति प्रजानां प्रजननाय ।
अथापि शंयुर्बार्हस्पत्य उच्यते । तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।	II. 6. 10. 2–3: शंयोरावृणीमह इत्याह । शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति । गातुं यज्ञाय गातुं यज्ञपतय इत्याह ।
5. 11: यमक्षितिमक्षितयः पिबन्ति……… यथा देवा अंशुमाप्याययन्ति ।	II. 4. 14. 1: यमादित्या अंशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति ।
6. 8: सा मे सत्याशीर्देवेषु ।	III. 2. 7. 2: सा मे सत्याशीर्देवेषु ।
7. 24: अग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि[खलु वै] भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति यदा[खलु वै] असावादित्योऽग्निं रश्मिभिः पर्यावर्ततेऽथ वर्षति ।	II. 4. 10. 2: अग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षति ।
8. 22: आत्मा वै प्रयाजा आत्मा वा अनुयाजाः ।	VI. 1. 5. 4: आत्मा वै प्रयाजाः प्रजानुयाजाः ।
10. 5: यदरोदीत्तद्रुद्रस्य रुद्रत्वम् । इति हारिद्रविकम् ।	I. 5. 1. 1: सोऽरोदीत् । यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ।

THE NIRUKTA.	THE TAITTIRĪYA SAṂHITA.
11. 33: कुहूमहं सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि ।	III. 3. 11. 4: कुहूमहं सुभगां विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि ।
सा नो ददातु श्रवणं पितॄणां तस्यास्ते देवि हविषा विधेम ॥	सा नो ददातु श्रवणं पितॄणान्तस्यास्ते देवि हविषा विधेम ।
12. 13: अधोरामः सावित्रः ।	V. 5. 22. 1: अधोरामः सावित्रः ।
......कृकवाकुः सावित्रः ।	V. 5. 18. 1: कृकवाकुः सावित्रः ।
12. 41: अग्निः पशुरासीत् । तमालभन्त । तेनायजन्त । इति च ब्राह्मणम् ।	V. 7. 26. 1: अग्निः पशुरासीत् । तेनायजन्त । स एतं लोकमयजत् ।

THE NIRUKTA.	THE MAITRĀYAṆĪ SAṂHITĀ.
1. 5: वायुर्वा त्वा मनुर्वा त्वा ।	I. 11. 6. Vol. I. p. 168: वायुर्वा त्वा मनुर्वा त्वा ।
1. 15: उरु प्रथस्व ।	I. 1. 9: उरु प्रथस्व ।
1. 15: ओषधे त्रायस्वैनम् ।	I. 2. 1; III. 9. 3: ओषधे त्रायस्वैनम् ।
स्वधिते मैनं हिंसीः । इत्याह हिंसन् ।	I. 2. 1; III. 9. 3: स्वधिते मैनं हिंसीरिति ।
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।	II. 9. 9: असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
अग्नये समिध्यमानायानुब्रूहीति ।	I. 4. 11: अग्नये समिध्यमानायानुब्रूहि ।
2. 14: न वा अमुं लोकं जग्मुषे किं च नाकम् ।	III. 3. 1: न वै तत्र किं चन जग्मुषे कम् ।
3. 4: तस्मात् पुमान्दायादः । अदायादा स्त्री । इति विज्ञायते । तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम् । इति च ।	IV. 6. 4: अथ यत्स्थालीं रिञ्चन्ति न दारुमयं तस्मात् पुमान्दायादः । स्त्र्यदायादाथ यत्स्थालीं परास्यन्ति न दारुमयं-तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम् । अथ स्त्रिय एवातिरिच्यन्ते ।
	IV. 7. 9: यदेषातिरिच्यते तस्मात् स्त्रियः पुंसोऽतिरिच्यन्ते । तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम् ।
3. 20: नेमे देवा नेमेऽसुराः ।	I. 11. 9: नेमे देवा आसन्नेमेऽसुराः ।
3. 21: म्रास्त्वाकृन्तन्नपसोऽतन्वत ।	I. 9. 4: म्रास्त्वाकृन्तन्नपसोऽतन्वत ।
कृत्तिवासाः पिनाकहस्तोऽवततधन्वा ।	I. 10. 4: पिनाकहस्तः कृत्तिवासा अवततधन्वा ।
4. 6: एकतो द्वितस्त्रित इति त्रयो बभूवुः ।	IV. 1. 9: सोऽपोऽङ्गारेणाभ्यपातयत्तत एकतोऽजायत द्वितीयं ततो द्वितस्तृतीयं ततस्त्रितः ।

THE NIRUKTA.	THE MAITRĀYAṆĪ SAṂHITĀ.
4. 17: सुविते मा धाः ।	I. 2. 7: सुविते मा धाः ।
नवेन पूर्वं दयमानाः स्याम ।	IV. 13. 8: नवेन पूर्वं दयमानाः स्याम ।
4. 21: तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।	IV. 13. 10: तञ्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।
5. 5: तं मरुतः क्षुरपविना व्ययुः ।	I. 10. 14: तं मरुतः क्षुरपविना व्ययुः ।
5. 11: अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगो ।	IV. 13. 4: अध्रिगो शमीध्वं सुशमि शमीध्वमध्रिगो ।
6. 16: तं मेदस्तः प्रति पचताग्रभीष्टाम् ।	IV. 13. 9: तं मेदस्तः प्रतिपचताग्रभीष्टाम् ।
7. 13: इन्द्राय वृत्रघ्ने ।	II. 2. 11: इन्द्राय वृत्रघ्न एकादशकपालम् ।
इन्द्राय वृत्रतुरे ।	इन्द्राय वृत्रतुरा एकादशकपालम् । ...यद्वृत्रघ्ने......यद्वृत्रतुरे...।
इन्द्रायाँहोमुचे ।	II. 2. 10: इन्द्रायाँहोमुचा एकादशकपालम् ।
7. 17: अथापि ब्राह्मणं भवति । अग्निः सर्वा देवता इति ।	I. 4. 14: अग्निर्वै सर्वा देवताः ।
7. 19: यत्तज्जातः पशूनविन्दत[इति] तज्जातवेदसो जातवेदस्त्वम् । इति ब्राह्मणम् ।	I. 8. 2: यज्जातः पशूनविन्दत तज्जातवेदसो जातवेदस्त्वम् ।
तस्मात्सर्वानृतून्पशवोऽग्निमभिसर्पन्ति । इति च ।	तस्मात्सर्वानृतून्पशवोऽग्निमभिसर्पन्ति ।
7. 23: अथापि वैश्वानरीयो द्वादशकपालो भवति ।	II. 1. 2: अग्नये वैश्वानराय द्वादशकपालं निर्वपेत् ।
असौ वा आदित्योऽग्निर्वैश्वानरः ।	II. 1. 2: असौ वा आदि ३ त्योऽग्निर्वैश्वानरः ।
अयमेवाग्निर्वैश्वानर इति शाकपूणिः ।	II. 1. 2: अग्निर्वैश्वानरः ।
7. 24: अग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि [खलु वै] भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति । यदा [खलु वै] असावादित्योऽग्नि रश्मिभिः पर्यावर्ततेऽथ वर्षति ।	II. 4. 8: अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्ति तां सूर्यो रश्मिभिर्वर्षति ।
8. 19: देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् । प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥	IV. 13. 7: देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् । प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥
8. 20: वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् । वह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥	वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् । वहा देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥

THE NIRUKTA.	THE MAITRĀYAṆĪ SAṂHITĀ.
8. 20: स्वाहाकृतयः। स्वाहेत्येतत्सु आहेति वा। स्वा वागाहेति वा।	I. 8. 1. तं स्वा वागभ्यवदज्जुहुधीति...स्वाहा। इति स्वा ह्येनं वागभ्यवदत्तत्स्वाहाकारस्य जन्म।
8. 22: ऋतवो वै प्रयाजाः।	I. 4. 12: ऋतवो वै प्रयाजाः।
9. 42: देवी जोष्ट्री...वीतां यज।	IV. 13. 8.
9. 43: देवी ऊर्जाहुती...वीतां यज।	IV. 13. 8.
12. 13: कृकवाकुः सावित्रः।	III. 14. 15: कृकवाकुः सावित्रः।
12. 14: जनं भगो गच्छति।	I. 6. 12: जनं भगोऽगच्छत्।

THE NIRUKTA.	THE KĀṬHAKA SAṂHITĀ.
1. 5: वायुर्वा त्वा मनुर्वा त्वा।	XIII. 14: वायुर्वा त्वा मनुर्वा त्वा।
1. 10: सु विदुरिव।	VIII. 3: न वै सु विदुरिव।
सु विज्ञायेते इव।	VI. 2: सु विज्ञायेते इव।
1. 14: प्रथनात्पृथिवीत्याहुः।	VIII 2: यदप्रथत तत्पृथिवी।
1. 15: उरु प्रथस्व।	I. 8: उरु प्रथस्व।
ओषधे त्रायस्वैनम्।	II. 1: ओषधे त्रायस्वैनम्।
स्वधिते मैनं हिंसीः।	II. 1: स्वधिते मैनं हिंसीः।
2. 14: न वा अमुं लोकं जग्मुषे किं च नाकम्।	XXI. 2: न वा अमुं लोकं जग्मुषे किञ्च नाकम्।
3. 4: तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसम्।	XXVII. 9: तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसम्।
3. 21: ग्नास्त्वाकृन्तन्नपसोऽतन्वत।	IX. 9: ग्नास्त्वाकृन्तन्नपसोऽतन्वत।
कृत्तिवासाः पिनाकहस्तोऽवततधन्वा।	IX. 7: कृत्तिवासाः पिनाकहस्तोऽवततधन्वा।
4. 6: एकतो द्वितस्त्रित इति त्रयो बभूवुः।	XXXI. 7: सोऽपोऽङ्गारेणाभ्यपातयत्तत एकतोऽजायत द्वितीयं ततो द्वितस्तृतीयं ततस्त्रितः।
4. 17: सुविते मा धाः।	II. 8: सुविते मा धाः।
नवेन पूर्वं दयमानाः स्याम।	XIX. 13: नवेन पूर्वं दयमानाः स्याम।
5. 5: तं मरुतः क्षुरपविना व्ययुः।	XXXVI. 8: देवा वै वृत्रस्य मर्म नाविन्दँस्तं मरुतः क्षुरपविना व्ययुः।
7. 13: इन्द्रायाँहोमुच इति।	X. 9: इन्द्रायाँहोमुच एकादशकपालम्।
7. 24: अग्निर्वा इतो वृष्टिं समीरयति धामच्छद्दिवि [खलु वै] भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति यदा [खलु वै] असावादित्योऽग्निं रश्मिभिः पर्यावर्ततेऽथ वर्षति।	XI. 10: अग्निर्वा इतो वृष्टिमुदीरयति धामच्छदिव भूत्वा वर्षति मरुतस्सृष्टां वृष्टिं नयन्ति। यदासा आदित्योऽर्वाङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति।

THE NIRUKTA.	THE KĀṬHAKA SAṂHITĀ.
8. 4: आप्रीभिराप्रीणातीति च ब्राह्मणम् ।	XXVI. 9: स एता आप्रीरपश्यत्ताभिरात्मानमाप्रीणीत ।
8. 19: देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् । प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥	XVIII. 21: देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् । प्रदक्षिणिद्रशनया नियूय- र्तस्य वक्षि पथिभी रजिष्ठैः ॥
8. 20: वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् । वह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥	वनस्पते रशनयाभिधाय पिष्टतमया वयुनानि विद्वान् । वहा देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥
स्वाहाकृतयः । स्वाहेत्येतत्सु आहेति वा । स्वा वागाहेति वा ।	VI. 1: स्वा वागैह जुहुधीति स इतः पर्यमृष्ट तत्स्वाहेत्यजुहोत्तस्मादेषैवमाहुतिस्स्वा ह्येनं वागैह ।
8. 22: प्राणा वै प्रयाजाः प्राणा वा अनुयाजाः ।	XXVI. 9: प्राणा वै प्रयाजाः ।
आत्मा वै प्रयाजा आत्मा वा अनुयाजाः ।	XXIII. 9: आत्मा वै प्रयाजाः प्रजानुयाजाः ।
9. 42: देवी जोष्ट्री...वीतां यज ।	XIX. 13.
9. 43: देवी ऊर्जाहुती...वीतां यज ।	XIX. 13.
10. 5: यदरुदत्तद्रुद्रस्य रुद्रत्वम् ।	XXV. 1: यत्समरुजत्तद्रुद्रस्य रुद्रत्वम् ।
11. 29: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राका ।	XII. 8: या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका ।
11. 31: या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूः ।	या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूः ।
12. 13: अग्निं चित्वा न रामामुपेयात् । रामा रमणायोपेयते न धर्माय ।	XXII. 7: अग्निं चित्वा प्रथमं चित्वा न रामामुपेयात् । द्वितीयं चित्वा नान्येषां स्त्रियस्तृतीयं चित्वा न कांचन ।

THE NIRUKTA.	THE AITAREYA BRĀHMAṆA.
1. 8: तद् यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते ।	V. 7. 3: यदिमाँल्लोकान्प्रजापतिः सृष्ट्वेदं सर्वमशक्नोद् यदिदं किंच तच्छक्वर्योऽभवंस्तच्छक्वरीणां शक्वरीत्वम् ।
1. 16: एतद् वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् ।	I. 4. 9: एतद् वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत् कर्म क्रियमाणमृगभिवदति ।
2. 24: विश्वामित्रः सर्वमित्रः ।	XXIX. 4. 18: तदु वैश्वामित्रम् । विश्वस्य ह वै मित्रं विश्वामित्र आस । विश्वं ह्यस्मै मित्रं भवति ।

THE NIRUKTA.	THE AITAREYA BRĀHMAṆA.
3. 17: अङ्गारेष्वङ्गिराः ।	XIII. 10. 2: येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् ।
4. 27: पंचर्तवः संवत्सरस्येति च ब्राह्मणं हेमन्तशिशिरयोः समासेन ।	I. 1. 14: पंचर्तवो हेमन्तशिशिरयोः समासेन । तावान्संवत्सरः ।
4. 27: षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन ।	II. 17. 2: त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि ।
4. 27: सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन ।	II. 17. 4: सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ।
5. 11: अध्रिगो शमीध्वं सुशमी शमीध्वं शमीध्वमध्रिगविति ।	II. 7. 11: अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा ३ उ इति ।
7. 5. 8: तिस्र एव देवता इति नैरुक्ताः ।	II. 17. 17: तिस्रो देवता अन्वाह । II. 17. 17: त्रयो वा इमे त्रिवृतो लोका एषामेव...
7. 5: अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः ।	V. 32. 1; तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतीँष्यजायंत । अग्निरेव पृथिव्या अजायत वायुरंतरिक्षादादित्यो दिवः ।
7. 8: अथैतान्यग्निभक्तीनि,। अयं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत् स्तोमो रथन्तरं साम ये च देवगणाः समाम्नाताः प्रथमे स्थाने ।	II. 32. 1: अग्निरिति प्रातःसवनस्य चक्षुषी... III. 13. 1: प्रजापतिर्वै...छंदांसि...व्यभजत् स गायत्रीमेवाग्नये...प्रातःसवनेऽभजत् । IV. 29. 1: अग्निर्वै देवता प्रथममहर्वहति त्रिवृत् स्तोमो रथंतरं साम गायत्री छंदः... यत्प्रथमे पदे देवता निरुच्यते । यदयं लोकोऽभ्युदितो यद्राथंतरं यद्गायत्रं...एतानि वै प्रथमस्याह्नो रूपाणि । VIII. 12. 4:...त्वा गायत्रेण छंदसा त्रिवृता स्तोमेन रथन्तरेण साम्ना रोहन्तु ।
7. 10: अथैतानीन्द्रभक्तीनि । अन्तरिक्षलोको माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् पञ्चदशः स्तोमो बृहत्साम ये च देवगणाः समाम्नाता मध्यमे स्थाने ।	II. 32. 1: इन्द्र इति माध्यंदिनस्य । III. 13. 1: त्रिष्टुभमिन्द्राय...माध्यंदिने । IV. 31. 1: इन्द्रो वै देवता द्वितीयमहर्वहति । पञ्चदशः स्तोमो बृहत् साम त्रिष्टुप् छन्दः... यन्मध्ये पदे देवता निरुच्यते । यदंतरिक्षमभ्युदितं यद्बार्हतं यत्त्रैष्टुभं...एतानि वै द्वितीयस्याह्नो रूपाणि । VIII. 12. 4: रुद्रास्त्वा त्रैष्टुभेन छंदसा पंचदशेन स्तोमेन बृहता साम्ना रोहन्तु ।

The Nirukta.	The Aitareya Brāhmaṇa.
7. 11: अथैतान्यादित्यभक्तीनि । असौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशः स्तोमो वैरूपं साम ये च देवगणाः समाम्नाता उत्तमे स्थाने...।	II. 32. 1: सूर्य इति तृतीयसवनस्य । III. 13. 1: जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने । V. 1. 1: विश्वे वै देवा देवतास्तृतीयमहर्वहन्ति । सप्तदशः स्तोमो वैरूपं साम जगती छंदः...यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितो यद्वैरूपं यज्जागतं...एतानि वै तृतीयस्याह्नो रूपाणि । VIII. 12. 4: आदित्यास्त्वा जागतेन छंदसा सप्तदशेन स्तोमेन वैरूपेण साम्ना रोहन्तु ।
7. 11: शरदनुष्टुबेकविंशः स्तोमो वैराजं सामेति पृथिव्यायतनानि ।	V. 4. 1: एकविंशः स्तोमो वैराजं सामानुष्टुप् छंदः...यद्वैराजं यदानुष्टुभं...प्रथमस्याह्नो रूपम् । VIII. 12. 4: विश्वे त्वा देवा आनुष्टुभेन छंदसैकविंशेन स्तोमेन वैराजेन साम्ना रोहन्तु ।
7. 11: हेमन्तः पंक्तिस्त्रिणवः स्तोमः शाक्वरं सामेत्यन्तरिक्षायतनानि ।	V. 6. 1: त्रिणवः स्तोमः शाक्वरं साम पंक्तिश्छंदः...यच्छाक्वरं यत्पांक्तं...द्वितीयस्याह्नो रूपम् । VIII. 12. 4: आप्त्याश्च देवाः पांक्तेन छंदसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना रोहन्तु ।
7. 11: शिशिरोऽतिछंदास्त्रयस्त्रिंशः स्तोमो रैवतं सामेति द्युभक्तीनि ।	V. 12. 1: त्रयस्त्रिंशः स्तोमो रैवतं सामातिछंदाश्छंदः...यद्रैवतं यदतिछंदा...तृतीयस्याह्नो रूपम् । VIII. 12. 4: मरुतश्च त्वांगिरसश्च देवा अतिछंदसा छंदसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना रोहन्तु ।
7. 12: पंक्तिः पञ्चपदा ।	V. 19. 6: पञ्चपदा पंक्तिः...
7. 17: अथापि ब्राह्मणं भवति । अग्निः सर्वा देवताः । इति	I. 1. 4. अग्निर्वै सर्वा देवताः ।
7. 23: तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते ।	XII. 3. 4: स वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत ।
7. 23: अथापि वैश्वानरीयो द्वादशकपालो भवति ।	VII. 9. 1: सोऽग्नये वैश्वानराय द्वादशकपालं पुरोळाशं निर्वपेत् ।

The Nirukta.	The Aitareya Brāhmaṇa.
7. 26: मातरिश्वा वायुः ।	X. 6. 7: प्राणो मातरिश्वा ।
8. 4: आप्रीभिराप्रीणातीति च ब्राह्मणम् ।	II. 4. 1: आप्रीभिराप्रीणाति ।
8. 22: प्राणा वै प्रयाजाः प्राणा वा अनुयाजा इति च ब्राह्मणम् ।	I. 11. 3: प्राणा वै प्रयाजाः प्रयाजानुयाजाः ।
	I. 17. 14: प्राणा वै प्रयाजानुयाजास्ते य इमे शीर्षन् प्राणास्ते प्रयाजा येऽवाञ्चस्तेऽनुयाजाः ।
8. 22: यस्य देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट् करिष्यन् ।	III. 8. 1: यस्य देवतायै हविर्गृहीतं स्यात् तां ध्यायेद् वषट् करिष्यन् ।
11. 29: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राकेति विज्ञायते ।	VII. 11. 2: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राका ।
11. 31: या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते ।	VII. 11. 3: या पूर्वामावास्या सा सिनी-वाली । योत्तरा सा कुहूः ।
12. 8: सविता सूर्यां प्रायच्छत् सोमाय राज्ञे प्रजापतये वा । इति च ब्राह्मणम् ।	IV. 7. 1: प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम् ।
12. 41: अग्निनाग्निमयजन्त देवाः ।	I. 16. 36: यदग्निनाग्निमयजन्त ।
अग्निः पशुरासीत् । तमालभन्त । तेनायजन्त ।	I. 16. 38: तेऽग्नेऽग्निनाग्निमयजन्त ।
इति च ब्राह्मणम् ।	I. 16. 39: तेऽग्नेऽग्निनाग्निमयजन्त ।
	I. 16. 12: रक्षांसि वा एनं तर्ह्यालभन्ते ।
	I. 16. 40: सैषा स्वर्ग्याहुतिर्यदग्न्याहुतिः ।

The Nirukta.	The Kauṣītaki Brāhmaṇa.
1. 8: तद् यदाभिर्वृत्रमशकद्धन्तुं तच्छक्करीणां शक्करीत्वमिति विज्ञायते ।	XXIII. 2: एताः शक्वर्य एताभिर्वा इन्द्रो वृत्रमशकद्धन्तुं तद्याभिर्वृत्रमशकद्धन्तुं तस्मा-च्छक्वर्यः ।
1. 9: पर्याया इव त्वदाश्विनम् ।	XVII. 4: पर्याया इव त्वदाश्विनम् ।
4. 27: षष्टिश्च ह वै त्रीणि च शतानि संवत्सर-स्याहोरात्रा इति च ब्राह्मणं समासेन ।	III. 2: त्रीणि वै षष्टिशतानि संवत्सरस्याह्नां तत्सामिधेनीभिः संवत्सरस्याहान्याप्नोति ।
6. 31: अदन्तकः पूषेति च ब्राह्मणम् ।	VI. 13: तस्मादाहुरदन्तकः पूषा करम्भभाग इति ते देवा ऊचुः ।
7. 5. 8: तिस्र एव देवता इति नैरुक्ताः ।	VIII. 8: ता वै तिस्रो देवताः ।
7. 5: यथा पृथिव्यां मनुष्याः पशवो देवा इति	I. 1: अस्मिन् वै लोके उभये देवमनुष्या आसुः ।

THE NIRUKTA.	KAUṢĪTAKI BRĀHMAṆA.
7. 8: अथैतान्यग्निभक्तीनि । अयं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत् स्तोमो रथन्तरं साम ।	VIII. 9: गायत्र्यावाग्नेय्यौ गायत्रोऽयं लोकः...।
	XII. 4: गायत्री प्रातःसवनं वहति ।
	XIV. 1: अग्निर्ज्योतिः...तदिमं लोकं लोकानामाप्नोति प्रातःसवनं यज्ञस्य ।
	XIV. 3: अस्मिँल्लोके गायत्रोऽयमग्निरध्यूढः ।
	XIV. 5: अग्नेरग्रे प्रातःसवनमासीत् ।
	XXII. 1: प्रथममहरयमेव लोक आयतनेनाग्निर्गायत्री त्रिवृत्स्तोमो रथन्तरं साम...
ये च देवगणाः समाम्नाताः प्रथमे स्थाने ।	प्रथमे पदे सदेवम् ।......
	प्रथमस्याह्नो रूपमिमं लोकं...गायत्री छन्दस्त्रिवृतं स्तोमं रथन्तरं साम प्राचीं दिशं वसन्तमृतूनां वसून्देवान्देवजातमग्निमधिपतिम् ॥ १ ॥
7. 10: अथैतानीन्द्रभक्तीनि । अन्तरिक्षलोको माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् ।	VIII. 9: त्रिष्टुभा सौम्यौ त्रैष्टुभोऽन्तरिक्षलोकः...
	XIV. 1: इन्द्रो ज्योतिः...तदन्तरिक्षलोकं लोकानामाप्नोति माध्यंदिनं सवनं यज्ञस्य ।
	XIV. 3: त्रैष्टुभेऽन्तरिक्षलोके त्रैष्टुभो वायुरध्यूढः ।
	XIV. 5: इन्द्रस्य माध्यन्दिनं सवनम् ।
	XXII. 2: द्वितीयमहरन्तरिक्षलोकं आयतनेनेन्द्रस्त्रिष्टुप् ।
पञ्चदशः स्तोमो बृहत्साम ये च देवगणाः समाम्नाता मध्यमे स्थाने ।	पञ्चदशः स्तोमो बृहत्साम...मध्यमे पदे सदेवम् ...अन्तरिक्षलोकं द्वितीयेनाह्नाप्नुवन्ति त्रिष्टुभं छन्दः पञ्चदशं स्तोमं बृहत्साम दक्षिणां दिशं ग्रीष्ममृतूनां मरुतो देवान्देवजातमिन्द्रमधिपतिम् ॥
	XVI. 1: बलं वै वीर्यं त्रिष्टुब्बलमेव तद्वीर्यं यजमाने दधाति ।
अथास्य कर्म रसानुदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्मैव तत् ।	XXII. 2: यद्वै प्रत्यक्षमस्पृष्टं तत्कुर्वद्धतवद्वज्रवद्वृत्रहवद्वृषण्वदुद्वद्विवत्स्थितम् ।
7. 11: अथैतान्यादित्यभक्तीनि । असौ लोकस्तृतीयसवनं वर्षा जगती ।	VIII. 9: जगत्यौ वैष्णव्यौ जागतोऽसौ लोकः...
	XIV. 1: सूर्यो ज्योतिः...तदमुं लोकं लोकानामाप्नोति तृतीयसवनं यज्ञस्य ।

THE NIRUKTA.	KAUṢĪTAKI BRĀHMAṆA.
	XIV. 3: जागतेऽमुष्मिँल्लोके जागतोऽसावादित्योऽध्यूढः ।
	XVI. 1; XXX. 1:...आदित्यानां तृतीयसवनम् ।
7. 11: सप्तदशः स्तोमो वैरूपं साम ये च देवगणाः समाम्नाता उत्तमे स्थाने ।	XXII. 3: तृतीयमहरसावेव लोक आयतनेन वरुणो जगती सप्तदशः स्तोमो वैरूपं साम... उत्तमे पदे सदेवम् ।
	XXII. 5: यथा वै...अमुं लोकं तृतीयेनाह्नाप्नुवन्ति जगतीं छन्दः सप्तदशं स्तोमं वैरूपं साम प्रतीचीं दिशं वर्षा ऋतूनामादित्यान्देवान्देवजातं वरुणमधिपतिम् ।
शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायतनानि ।	XXII. 9: चतुर्थेनाह्नाप्नुवन्त्यनुष्टुभं छन्द एकविंशं स्तोमं वैराजं सोमोदीचीं दिशं शरदमृतूनां...बृहस्पतिं च चन्द्रमसं चाधिपती ।
हेमन्तः पंक्तिस्त्रिणवस्तोमः शाक्वरं सामेत्यन्तरिक्षायतनानि ।	XXIII. 3: पञ्चमेनाह्नाप्नुवन्ति पंक्तिं छन्दस्त्रिणवं स्तोमं शाक्वरं साम...हेमन्तमृतूनां मरुतो देवान्देवजातं रुद्रमधिपतिम् ।
7. 12: पंक्तिः पञ्चपदा ।	XI. 2: अथ वै पंक्तेः पञ्चपदानि ।
	I. 3, 4. XIII. 2; XIX. 4. 7: पञ्चपदा पंक्तिः ।
7. 23: अथापि वैश्वानरीयो द्वादशकपालो भवति।	IV. 3: द्वादशकपालमसौ वै वैश्वानरः ।
7. 23: असौ वा आदित्योऽग्निर्वैश्वानरः । इति ।	IV. 3: असौ वै वैश्वानरो योऽसौ तपति ।
7. 24: अस्ति हि सौर्य एककपालः...।	V. 8: अथ यत्सौर्य एककपालः ।...
7. 17: समुद्राद्ध्येषोऽद्भ्य उदेति । इति च ब्राह्मणम् ।	XXV. 1: समुद्राद्ध्येषोऽद्भ्य उदेति ।
8. 4: आप्रीभिराप्रीणातीति च ब्राह्मणम् ।	X. 3: आप्रीभिराप्रीणाति...तमस्यैताभिराप्रीभिराप्रीणाति तद्यदाप्रीणाति तस्मादाप्रियो नाम ।
8. 22: ऋतवो वै प्रयाजा ऋतवोऽनुयाजाः । इति च ब्राह्मणम् । पशवो वै प्रयाजाः पशवोऽनुयाजाः । इति च ब्राह्मणम् ।	III. 4: ऋतवो वै प्रयाजा ऋतूनेव तत्प्रीणाति ।......पशवो वै प्रयाजाः ।
प्राणा वै प्रयाजाः प्राणा वा अनुयाजाः । इति च ब्राह्मणम् ।	VII. 1: प्राणा वै प्रयाजा अपाना अनुयाजाः । x. 3: प्राणा वै प्रयाजा अपाना अनुयाजाः ।
10. 32: आदित्योऽपि सवितोच्यते ।	VII, 6: असौ वै सविता योऽसौ तपति ।

THE NIRUKTA.	THE KAUṢĪTAKI BRĀHMAṆA.
11. 29: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राकेति विज्ञायते ।	iii. 1: पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यमुत्तरामिति कौषीतकम्...उत्तरां पौर्णमासीमुपवसेत्। अनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपवसति तेन पूर्वां प्रीणाति यद्यजते तेनोत्तरामुत्तरामुपवसेत् । उत्तरामु ह वै समुद्रो विजते सोममनु...
11. 31: या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूरिति विज्ञायते ।	
12. 8: सविता सूर्यां प्रायच्छत् सोमाय राज्ञे प्रजापतये वेति ब्राह्मणम् ।	xviii. 1: अथ यत्र ह तत् सविता सूर्यां प्रायच्छत् सोमाय राज्ञे यदि वा प्रजापतेः ।
12. 14: अन्धो भग इत्याहुरनुत्सृप्तो न दृश्यते प्राशित्रमस्याक्षिणी निर्जघानेति च ब्राह्मणम् ।	vi. 13: तद् भगाय परिजह्रुस्तस्याक्षिणी निर्जघान तस्मादाहुरन्धो भग इति ।

THE NIRUKTA.	THE ṢAḌVIṂS'A BRĀHMAṆA.
7. 17: अथापि ब्राह्मणं भवति । अग्निः सर्वा देवताः । इति ।	iii. 7: अग्निर्वै सर्वा देवताः ।
11. 29: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राकेति विज्ञायते ।	IV. 6: या पूर्वा पौर्णमासी सानुमतिः । योत्तरा सा राका ।
11. 31: या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूरिति विज्ञायते ।	IV. 6: या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूः ।......पुष्ये चानुमतिर्ज्ञेया सिनीवाली तु द्वापरे । खार्वायां तु भवेद्राका कृतपर्वे कुहूर्भवेत् । [नूतने ?] चानुमतिं विद्याद् यस्मिन् दृश्येत् सा सिनीवाली । राकायां तु सम्पूर्णश्चन्द्रस्तु कुहूर्न दृश्येत् ।

THE NIRUKTA.	THE TAITTIRĪYA BRĀHMAṆA.
1. 15: ऊरु प्रथस्वेति प्रथयति ।	III. 2. 8. 4: उरु प्रथस्व ।
1. 15: अथापि जानन्तं संप्रेषयति । अग्नये समिध्यमानायानुब्रूहीति ।	III. 3. 7. 1: अग्नये समिध्यमानायानुब्रूहीत्याह ।
3. 8: सोर्देवानसृजत तत् सुराणां सुरत्वम् । असोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते ।	II. 3. 8. 2: तेनासुनाऽसुरानसृजत । तदसुराणामसुरत्वम् । II. 3. 8. 4: दिवा देवत्राऽभवत् । तदनु देवानसृजत । तद्देवानां देवत्वम् ।
3. 20: नक्षत्राणि नक्षतेर्गतिकर्मणः ।	I. 5. 2. 5, 6: अमुँ स लोकं नक्षते । तन्नक्षत्राणां नक्षत्रत्वम् । देवगृहा वै नक्षत्राणि ।... यानि वा इमानि पृथिव्याश्चित्राणि तानि नक्षत्राणि ।
3. 20: नेमानि क्षत्राणि ।	II. 7. 18. 3: न वा इमानि क्षत्राण्यभूवन्निति । तन्नक्षत्राणां नक्षत्रत्वम् ।

THE NIRUKTA.	THE S'ATAPATHA BRĀHMAṆA.
1. 7: दक्षिणा दक्षतेः समर्धयतिकर्मणः । व्यृद्धं समर्धयतीति ।	II. 2. 2. 2. p. 146: स एष यज्ञो हतो न ददक्षे । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद् दक्षिणा नाम ।... अथ समृद्ध एव यज्ञो भवति तस्माद् दक्षिणा ददाति ।
1. 15: प्रथनात्पृथिवीत्याहुः ।	VI. 1. 3. 7. p. 505: तद् भूमिरभवत् । तामप्रथयत् । सा पृथिव्यभवत् ।
1. 15: ओषधे त्रायस्वैनम् ।	III. 1. 2. 7: ओषधे त्रायस्वेति वज्रो वै क्षुरः । तथो हैनमेष वज्रः क्षुरो न हिनस्ति । अथ क्षुरेणाभिनिदधाति ।
स्वधिते मैनँ हिंसीः । इत्याह हिंसन् ।	III. 1. 2. 7: स्वधिते मैनꣳहिंसीरिति वज्रो वै क्षुरः । तथो हैनमेष वज्रः क्षुरो न हिनस्ति । The passage is repeated in III. 6. 4. 10. and III. 8. 2. 12. verbatim reading परशुः and असिः for क्षुरः respectively.
अग्नये समिध्यमानायानुब्रूहीति ।	II. 5. 2. 9: अथाध्वर्युरेवाह । अग्नये समिध्यमानायानुब्रूहीति ।
2. 6: अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते ...आदित्यतोऽस्य दीप्तिर्भवति । सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः ।	IX. 4. 1. 9: सुषुम्ण इति । सुयज्ञिय इत्येतत् सूर्यरश्मिरिति सूर्यस्येव हि चन्द्रमसो रश्मयश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरस इति चन्द्रमा ह गन्धर्वः ।
2. 10: समुद् द्रवन्त्यस्मादापः । समभिद्रवन्त्ये-नमापः ।	XIV. 2. 2. 2. p. 1035: अयं वै समुद्रो योऽयं पवत एतस्माद्वै समुद्रात्सर्वे देवाः सर्वाणि भूतानि समुद्द्रवन्ति ।
3. 4: अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥	XIV. 9. 4. 8. p. 1106: स यामिच्छेत् । कामयेत मेति तस्यामर्थं निष्ठाप्य मुखेन मुखं संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात्स-म्भवसि हृदयादधि जायसे । स त्वमङ्गकषायो-ऽसि दिग्धविद्धामिव मादयेति ।
3. 16: तथा पशुः पश्यतेः ।	VI. 2. 1. 4: यदपश्यत्तस्मादेते पशवस्तेष्वे-तमपश्यत्तस्माद्वेवैते पशवः ।
4. 21: अथापि शंयुर्बार्हस्पत्य उच्यते । तच्छं-योरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।	I. 9. 1. 24–27: अथ शम्योराह । शम्यु-र्ह वै बार्हस्पत्यः ।...तच्छंयोरावृणीमहे... गातुं यज्ञाय गातुं यज्ञपतयऽइति ।

THE NIRUKTA.	THE S'ATAPATHA BRĀHMAṆA.
4. 27: पञ्चर्तवः संवत्सरस्येति च ब्राह्मणं हेमन्तशिशिरयोः समासेन ।	I. 7. 2. 8: पञ्चर्तवः संवत्सरस्य । and also in XII. 3. 2. 1.
षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन ।	XII. 3. 2. 3: त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयः ।...अत्र तत्समं त्रीणि च शतानि षष्टिश्च संवत्सरस्याहानि ।
सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन ।	XII. 3. 2. 4: सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राणि ।
6. 31: पूषेत्यपरम् । सोऽदन्तकः । अदन्तकः पूषा । इति च ब्राह्मणम् ।	I. 7. 4. 7: तत्पूष्णे पर्योजहुस्तत्पूषा प्राश तस्य दतो निर्जघान तथेन्नूनं तदास तस्मादाहुरदन्तकः पूषेति ।
7. 5: अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः ।	XI. 2. 3. 1: तद् देवान् सृष्ट्वा...व्यारोहादस्मिन्नेव लोकेऽग्निं वायुमन्तरिक्षे दिव्येव सूर्यम् ।
7. 14: अग्निः कस्मात् । अग्रणी भवति । अग्रं यज्ञेषु प्रणीयते ।	II. 2. 4. 2: तद्वाऽएनमेतदग्रे देवानामजनयत । तस्मादग्निरग्निर्ह वै नामैतद्यदग्निरिति स जातः पूर्वः प्रेयाय यो वै पूर्व एत्यग्रऽएतीति वै तमाहुः सोऽएवास्याग्निता ।
	VI. 1. 1. 11: सोऽग्निरसृज्यत स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निरग्निर्ह वै तमग्निरित्याचक्षते ।
7. 17: अथापि ब्राह्मणं भवति । अग्निः सर्वा देवताः ।	I. 6. 2. 8: सोऽग्निमेव प्राप्य संबभूव...सर्वा विद्याः सर्वं यशः सर्वमन्नाद्यं सर्वां श्रीम् ।
7. 23: अथासावादित्य इति पूर्वे याज्ञिकाः ।	IX. 3. 1. 25: स यः स वैश्वानरोऽसौ स आदित्यः ।
अथापि वैश्वानरीयो द्वादशकपालो भवति ।	VI. 6. 1. 5: वैश्वानरो द्वादशकपालः ।
7. 24: बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति। पृथिवी वैश्वानरः। संवत्सरो वैश्वानरः। ब्राह्मणो वैश्वानरः ।	XIII. 3. 8. 3: इयं(पृथिवी) वै वैश्वानरः । V. 2. 5. 15; VI. 6. 1. 5. संवत्सरो वैश्वानरः ।
7. 26: मातरिश्वा वायुः ।	VI. 4. 3. 4: अयं वै वायुर्मातरिश्वा योऽयं पवते ।
8. 10: उषासानक्ता । उषाश्च नक्ता च ।	VI. 7. 2. 3: अहोरात्रे वै नक्तोषासा ।
8. 22: छन्दांसि वै प्रयाजाश्छन्दांस्यनुयाजा इति च ब्राह्मणम् ।	I. 3. 2. 9: छन्दोभ्यस्तद् गृह्णाति । अनुयाजेभ्यो हि तद् गृह्णाति । छन्दांसि ह्यनुयाजाः ।
ऋतवो वै प्रयाजा ऋतवोऽनुयाजा इति च ब्राह्मणम् ।	I. 3. 2. 8: ऋतुभ्यस्तद् गृह्णाति । प्रयाजेभ्यो हि तद् गृह्णाति । ऋतवो हि प्रयाजाः ।

THE NIRUKTA.	THE S'ATAPATHA BRĀHMAṆA.
8. 22: प्राणा वै प्रयाजाः प्राणा वा अनुयाजा इति च ब्राह्मणम् ।	XI. 2. 7. 27: प्राणा वै प्रयाजाः । अपाना अनुयाजाः ।
9. 20: उरु मे कुर्वित्यब्रवीत् । तदुलूखलमभवत् । उरुकरं वैतत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणम् ।	VII. 5. 1. 22: उरु मे करदिति तस्मादुरुकरम् । उरुकरं ह वै तदुलूखलमित्याचक्षते परोक्षम् ।
9. 24: पितुरित्यन्ननाम ।	I. 9. 2. 20: अन्नं वै पितुः ।
9. 26: आप आप्नोतेः ।	VI. 1. 1. 9: यदाप्नोत्तस्मादापः ।
10. 5: यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम् ।	IX. 1. 1. 6: सोऽरोदीत्तस्य यान्यश्रूणि प्रास्कन्दंस्तान्यस्मिन्मन्यौ प्रत्यतिष्ठन्त्स एव शतशीर्षा रुद्रः समभवत् ।
10. 7: अग्निरपि रुद्र उच्यते ।	V. 2. 4. 13: यो वै रुद्रः सो अग्निः ।
10. 8: तद् यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वम् । इति विज्ञायते ।	VI. 1. 1. 2: एष एवेन्द्रस्तानेष प्राणान्मध्यत इन्द्रियेणैन्द्ध यदैन्द्ध तस्मादिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते ।
10. 26: विश्वकर्मा...सर्वमेधे सर्वाणि भूतानि जुहवांचकार । स आत्मानमप्यन्ततो जुहवांचकार ।	XIII. 7. 1. 1: तदैक्षत न वै तपस्यानन्त्यमस्ति हन्ताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति । तत्सर्वेषु भूतेष्वात्मानं हुत्वा भूतानि चात्मनि...सर्वमेधे सर्वान्मेधान्हुत्वा सर्वाणि भूतानि...पर्यैति ।
10. 31: सविता सर्वस्य प्रसविता ।	I. 1. 2. 17: सविता वै देवानां प्रसविता ।
12. 14: अन्धो भग इत्याहुरनुत्सृप्तो न दृश्यते । प्राशित्रमस्याक्षिणी निर्जघान । इति च ब्राह्मणम् ।	I. 7. 4. 6: तद् भगाय दक्षिणत आसीनाय पर्याजहुः । तद् भगोऽवेक्षांचक्रे । तस्याक्षिणी निर्ददाह ।...तस्मादाहुरन्धो भग इति ।

THE NIRUKTA.	THE MANTRA BRĀHMAṆA.
1. 15: ओषधे त्रायस्वैनम् ।	I. 6. 5: ओषधे त्रायस्वैनम् ओषध इति । दर्भरूप उषधिर्देवता ।
स्वधिते मैनं हिंसीः । इत्याह हिंसन् ।	I. 6. 6: स्वधिते मैनं हिंसीः । स्वधित इति । स्वधितिर्देवता ।

The following 2 stanzas are quoted by Sāyanācārya in the introductory remarks of his commentary on the Mantra Brāhmaṇa.

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥
Cf. N. 1. 18.

Daivata Brāhmaṇa of the Sāmaveda

III. Khaṇḍa

The Nirukta.

N. 7. 12: गायत्री गायतेः स्तुतिकर्मणः । त्रिगमना वा विपरीता । गायतो मुखादुदपतदिति च ब्राह्मणम् । उष्णिगुत्स्नाता भवति । स्निह्यतेर्वा स्यात्कान्तिकर्मणः । उष्णीषिणी वेत्यौपमिकम् । उष्णीषं स्नायतेः । ककुप् ककुभिनी भवति । ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वा । अनुष्टुबनुष्टोभनात् । गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति च ब्राह्मणम् । बृहती परिबर्हणात् । पङ्क्तिः पञ्चपदा । त्रिष्टुप् स्तोभत्युत्तरपदा । का तु त्रिता स्यात् । तीर्णतमं छन्दः । त्रिवृद्वज्रस्तस्य स्तोभतीति वा । यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमिति विज्ञायते ॥ १२ ॥

Khaṇḍa iii.

अथातो निर्वचनम् । १ । गायत्री गायतेः स्तुतिकर्मणः । २ । गायतो मुखादुदपतदिति ह ब्राह्मणम् । ३ । उष्णिगुत्स्नानात्स्निह्यतेर्वा कान्तिकर्मणोऽपि वोष्णीषिणी वेत्यौपमिकम् ।४। ककुप् ककुद्रूपिणीत्यौपमिकम् । ५ । ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वा । ६ । अनुष्टुबनुष्टोभनात् । ७ । अन्वस्तौदिति ह ब्राह्मणम् । ८ । पिपीलिका पेलतेर्गतिकर्मणः । ९ । पिपीलिकमध्येत्यौपमिकम् । १० । बृहती बृंहतेर्वृद्धिकर्मणः ।११। विराड् विरमणाद्विराजनाद्वा ।१२। पङ्क्तिः पञ्चिनी पञ्चपदा । १३ । त्रिष्टुप् स्तोभ इत्युत्तरपदा । १४ । का तु त्रिता स्यात्तीर्णतमं छन्दो भवति । १५ । त्रिवृद्वज्रस्तस्य स्तोभमित्यौपमिकम् । १६ ।

N. 7. 13: जगती गततमं छन्दः । जलचरगतिर्वा । जल्गल्यमानोऽसृजदिति च ब्राह्मणम् । विराड्विराजनाद्वा विराधनाद्वा विप्रापणाद्वा । विराजनात्संपूर्णाक्षरा विराधनादूनाक्षरा विप्रापणादधिकाक्षरा । पिपीलिकामध्येत्यौपमिकम् । पिपीलिका पेलतेर्गतिकर्मणः ।

जगती गततमं छन्दो जज्जगतिर्भवति क्षिप्रगतिर्जज्मला(?) कुर्वन्नसृजतेति ह ब्राह्मणम् । १७ । This passage is cited by Guṇe in Bhand. Comm. Vol. p. 51.

The Nirukta.

1. 16: एतद् वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् ।

2. 10: समुद्द्रवन्त्यस्मादापः । समभिद्रवन्त्येनमापः ।

4. 27: त्र्यृतुः संवत्सरः ।

Gopatha Brāhmaṇa.

II. 2. 6; p. 171: एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्मक्रियमाणमृग्यजुर्वाभिवदति ।

I. 1. 7; p. 7: तद् यत्समवद्रवन्त तस्मात् समुद्र उच्यते ।

I. 5. 5: त्रयो वा ऋतवः संवत्सरस्य ।

The Nirukta.	Gopatha Brāhmaṇa.
4. 27: षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन । सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ।	I. 5. 5; p. 119: त्रीणि च ह वै शतानि षष्टिश्च संवत्सरस्याहोरात्राणि ।...सप्त च ह वै शतानि विंशतिश्च संवत्सरस्याहानि च रात्रयश्च ।
7. 8: अथैतान्यग्निभक्तीनि । अयं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत् स्तोम रथन्तरं साम ।	I. 1. 29; p. 21: किं दैवतमिति । ऋचामग्निर्देवतम् । तदेव ज्योतिर्गायत्रं छन्दः पृथिवीस्थानम् । I. 1. 17; p. 13: तस्य प्रथमया...पृथिवीमग्निम्...गायत्रं छन्दस्त्रिवृतं स्तोमं...वसन्तमृतुम्......। I. 2. 24; p. 62: पृथिवी वा ऋचामायतनमग्निर्देवता गायत्रं छन्दः......। II. 3. 12; p. 199: अथातः...प्रातःसवनम्......स आग्नेय्या गायत्र्याज्यं प्रत्यपद्यत । II. 3. 10; p. 196: पुरस्तात् प्रातःसवने...उक्थं...शस्त्वा चतुरक्षरम्......चतुरक्षरं तदष्टाक्षरं संपद्यते । अष्टाक्षरा वै गायत्री गायत्रीमेवैतत् । II. 3. 16; p. 202: गायत्रं हि प्रातःसवनं...परिदधाति ।......अयं वै लोकः प्रातःसवनम् । तस्य...पञ्चोक्थानि ।
7. 10: अथैतानीन्द्रभक्तीनि । अन्तरिक्षलोको माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् पञ्चदश स्तोमो बृहत्साम ।	I. 1. 29: यजुषां वायुर्देवतम् । तदेव ज्योतिस्त्रैष्टुभं छन्दोऽन्तरिक्षं स्थानम् । I. 1. 18: तस्य द्वितीयया...अन्तरिक्षम् । I. 1. 17: वायुं...त्रैष्टुभं छन्दः पञ्चदशं स्तोमं...ग्रीष्ममृतुम् । I. 2. 24: अन्तरिक्षं वै...आयतनं वायुर्देवता त्रैष्टुभं छन्दः......। II. 3. 10: माध्यन्दिने...त्रिष्टुभमेवैतत् । II. 3. 12: तं माध्यन्दिने पवमाने...स ऐन्द्र्या त्रिष्टुभा मरुत्वतीयं प्रत्यपद्यत । II. 4. 4: ऐन्द्रं हि त्रैष्टुभं माध्यन्दिनꣳ सवनम् ।...अन्तरिक्षलोको माध्यन्दिनं सवनम् ।...पञ्चोक्थानि माध्यन्दिनस्य सवनस्य ।

THE NIRUKTA.	GOPATHA BRĀHMAṆA.
7. 11: अथैतान्यादित्यभक्तीनि । असौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशः स्तोमः ।	I. 1. 29: साम्नामादित्यो दैवतम् तदेव ज्योतिर्जागतं छन्दो द्यौः स्थानम् ।
	I. 1. 19: तस्य तृतीयया...दिवमादित्यं... जागतं छन्दः सप्तदशं स्तोमं...वर्षा ऋतुम्...।
	I. 2. 24: द्यौर्वै...आयतनमादित्यो देवता जागतं छन्दः......।
	II. 3. 10: तृतीयसवने...जगतीमेवैतत् ।
	II. 4. 18: जागतं हि तृतीयसवनम्...असौ वै लोकस्तृतीयसवनम् ।
7. 12: पङ्क्तिः पञ्चपदा ।	I. 3. 8: अथ यः पङ्क्तिं पञ्चपदाम् ।
	I. 3. 10: अथ या पङ्क्तिः पञ्चपदा ।
	I. 4. 24: इति होवाच पञ्चपदा पङ्क्तिः ।
7. 17: अथापि ब्राह्मणे भवति । अग्निः सर्वा देवता इति ।	II 1. 12: अग्निर्वै सर्वा देवताः ।
7. 23: अयमेवाग्निर्वैश्वानर इति शाकपूणिः ।	I. 2. 20: ब्राह्मणो ह वा इममग्निं वैश्वानरं बभार । सोऽयमग्निर्वैश्वानरः...। अथायमीक्षतेऽग्निर्जातवेदा ब्राह्मणद्वितीयो ह वा अयमिदमग्निर्वैश्वानरो ज्वलति ।
8. 22: यस्यै देवतायै हविर्गृहीतं तां मनसा ध्यायेद् वषट्करिष्यन् ।	II. 3. 4: यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायन् वषट्कुर्यात् ।
11. 29: या पूर्वा पौर्णमासी सानुमतिः। योत्तरा सा राकेति विज्ञायते ।	II. 1. 10: या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका ।
11. 31: या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते ।	या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूः ।
12. 14: अन्धो भग इत्याहुः ।	II. 1. 2: तस्मादाहुरन्धो वै भग इति ।

THE NIRUKTA.	THE AITAREYA ĀRAṆYAKA.
4. 27: सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन ।	III. 2. 1: सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ।

THE NIRUKTA.	THE TAITTIRĪYA ĀRAṆYAKA.
2. 11: तद् यदेनांस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋषयोऽभवन् । तदृषीणामृषित्वमिति विज्ञायते ।	II. 9: तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋषयोऽभवन् । तदृषीणामृषित्वम् ।

The Nirukta.	Sarvānukramaṇī.
N. 1. 2: कर्मसंपत्तिर्मन्त्रो वेदे ।	Paribhāṣā 1. न ह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिः ।
N. 1. 15: अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते...स्वार्थसाधकं च ।	मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्यां श्रेयोऽधिगच्छति ।
N. 1. 20: नास्मै कामान्दुग्धे वाग्दोह्यान्देवमनुष्यस्थानेषु ।	
N. 2.10,11: cf.	61. 98: बृहस्पते द्वादशार्ष्टिषेणो देवापिर्वृष्टिकामो देवांस्तुष्टाव ।
N. 2. 11: ऋषिर्दर्शनात्	paribhāṣā 2. 4: यस्य वाक्यं स ऋषिः ।
N. 2. 24: स विश्वामित्रो नदीस्तुष्टाव गाधा भवतेति ।	18. 33: प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोः ।
N. 5. 13: उर्वश्यप्सरा...तस्या दर्शनान्मित्रावरुणयो ... न्द ।	I. 166. p. 12....मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोऽपतत् ।
N. 7. 1: तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते.	paribhāṣā 2. 5: या तेनोच्यते सा देवता ।
N. 7. 1: यत्काम ऋषिर्यस्यां देवतायामर्थपत्यमिच्छन्स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति ।	paribhāṣā 2. 7: अर्थेप्सव ऋषयो देवताश्छन्दोभिरुपाधावन् ।
N. 7. 3: एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति ।	
N. 7. 3: एवमक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा च ।	56. 34: प्रावेपाः षळूना मौजवान्वाक्षोऽक्षकृषिप्रशंसा चाक्षकितवनिन्दा च सप्तमी जगती ।
N. 7. 4: माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते । एवमस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति...आत्मजन्मान आत्मैवैषां रथो भवत्यात्माश्व आत्मायुधमात्मेषव आत्मा सर्वं देवस्य ।	paribhāṣā 2. 14: एकैव वा महानात्मा देवता. । pari° 2. 16: स हि सर्वभूतात्मा. pari° 2. 18: तद्विभूतयोऽन्या देवताः pari° 2. 12: तत्तत्स्थाना अन्यदेवतास्तद्विभूतयः ।
N. 7. 5: तिस्र एव देवता इति नैरुक्ताः । अग्निः पृथिवीस्थानः । वायुर्वेन्द्रो वान्तरिक्षस्थानः । सूर्यो द्युस्थानः ।......अपि वा कर्मपृथक्त्वात्...अपि ना पृथगेव स्युः पृथग्घि स्तुतयो भवन्ति तथाभिधानानि ।	paribhāṣā. 2. 8: तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थाना अग्निर्वायुः सूर्य इति । pari° 2. 13: कर्मपृथक्त्वाद्धि पृथगभिधानस्तुतयो भवन्ति ।
N. 7. 12: छन्दांसि छादनात्	paribhāṣā. 2. 6: यदक्षरपरिमाणं तच्छन्दः

THE NIRUKTA.	VEDĀRTHA DĪPIKĀ.
N. 2. 10. अन्तरिक्षं कस्मात् । अन्तरा क्षान्तं भवत्यन्तरेमे इति वा । शरीरेष्वन्तरक्षयमिति वा ।	Ved. dīp. 2. 8; p. 60: भूमिस्वर्गयोरंतरा मध्येऽमूर्ततयानुपलंभादंतरा क्षांतमित्येवमंतरिक्षम् ।
N. 2. 11. ऋषिर्दर्शनात् ।	Ved. dīp. 2. 4; p. 60: उक्तं च । ऋषिर्दर्शनादिति ॥
	Ved. dīp. 1. 1; p. 57: अर्तेः सनोतेश्च ऋषिशब्दो निरुच्यते ।
N. 7. 12: छन्दांसि छादनात् ।	Ved. dīp. 1. 1; p. 57: छन्दः पापेभ्यश्छादनात् ।
N. 9. 32. कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मण उद्गततमो भवति ।	Ved. dīp. 1. 2; p. 58: कण्टकाः पीडकाः कण्टयन्तीति निरुक्तितः ।

THE NIRUKTA.	R. PRĀTIS'ĀKHYA.
1. 1: तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।	12. 5: 699: नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शब्दाः ।
भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि ।	12. 5: 700–701: तन्नाम येनाभिदधाति सत्त्वं तदाख्यातं येन भावं स धातुः ॥
	12. 8: 707: क्रियावाचकमाख्यातम्...सत्त्वाभिधायकं नाम...।
1. 3: न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति । उच्चावचाः पदार्थाः...तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम् । आ...प्र परा...अभि...प्रति...अति सु...निर्दुर्...न्यव...उद्...सम्...व्यप...अनु...अपि...उप...परि...अधि...।	12. 8: 707: उपसर्गो विशेषकृत् । 12. 6: 702–703: प्राभ्यापरानिर्दुरनुव्युपापसंपरिप्रतिन्यत्यधिसूदवापि । उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्याम्...॥
1. 4: अथ निपाता...पदपूरणाः ।	12. 8: 707: निपातः पादपूरणः ।
1. 9: अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः...।	12. 9: 708: निपातानामर्थवशान्निपातनादनर्थकानामितरे च सार्थकाः । नेयंत इत्यस्ति संख्येह वाङ्मये मिताक्षरे चाप्यमिताक्षरे च ये ॥
1. 17: पदप्रकृतिः संहिता ।	2. 1: 105: संहिता पदप्रकृतिः ।

THE NIRUKTA.	ATHARVA-VEDA PRATIS'ĀKHYA.
1. 1: तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।	1. 1: चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपद्यौ गुणौ प्रातिज्ञम् । The following verses are cited by the commentator in the begining of the fourth chapter (see J. A. O. S. vol. 7. p. 591): समासावग्रहविग्रहान्पदे यथोवाच छन्दसि शाकटायनः । तथा वक्ष्यामि चतुष्टयं पदं नामाख्यातोपसर्गनिपातानाम् ॥
भावप्रधानमाख्यातम्। सत्त्वप्रधानानि नामानि।	II. 1: आख्यातं यत्क्रियावाचि नाम सत्त्वाख्यमुच्यते। निपाताश्चादयः सर्वे उपसर्गास्तु प्रादयः॥
cf. N. 1. 3.	II. 17: प्रपराणिसमादुर्णिरवाधिपरिवीनि च । अत्यभ्यपिसूदपा य उपानुप्रतिविंशतिः ॥

THE NIRUKTA.	THE VĀJA. PRĀTIS'ĀKHYA.
1. 1: तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।	8. 52: तच्चतुर्धा नामाख्यातोपसर्गनिपाताः ।
1. 1: भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि।	8. 54–55: क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्त्वाभिधायकं नाम निपाताः पादपूरणाः॥
1. 3: नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ।...आ...प्र...अधि...।	
1. 4: अथ निपाता...ऽपि पदपूरणाः ॥	VI. 24: परोपापावप्रतिपर्यन्वभ्यध्याङ्प्रसभिर्दुरुन्निविस्वभि ।

THE NIRUKTA.	THE TAITTIRĪYA PRĀTIS'ĀKHYA.
1. 3: आ...प्र परा...अभि...प्रति...अति सु ...निर्दुर्...न्यव...उद्...सम्...व्यप..... अनु...अपि...उप...परि...अधि...।	1. 15: आप्रावोपाभ्यधिप्रतिपरिविनीत्युपसर्गाः ॥

THE NIRUKTA.	BṚHADDEVATĀ.
N. 1. 1: भावप्रधानमाख्यातम् ।	Bṛh. D. II. 121: भावप्रधानमाख्यातम् ।
N. 1. 1: पूर्वापरीभूतं भावमाख्यातेनाचष्टे ।	Bṛh. D. I. 44: यः पूर्वापरीभूत इहैक एव । ...आख्यातशब्देन तमर्थमाहुः ॥
N. 1. 2: षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति ।	Bṛh. D. II. 121: षड् विकारा भवन्ति ते। जन्मास्तित्वं परीणामो वृद्धिर्हानं विनाशनम्॥

THE NIRUKTA.	THE BṚHADDEVATĀ.
N. 1. 4: अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति । अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः ।	Bṛh. D. II. 89: उच्चावचेषु चार्थेषु निपाताः समुदाहृताः । कर्मोपसंग्रहार्थं च क्वचिच्चौपम्यकारणात् ॥
N. 1. 4: तेषामेते चत्वार उपमार्थे भवन्तीति । इवेति...नेति...चिदिति...न्विति ।	Bṛh. D. II. 91: इव न चिन्नु चत्वार उपमार्था भवन्ति ते ।
N. 1. 5: अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार । स इन्द्र एत्य परिदेवयांचक्रे ।	Bṛh. D. IV. 48–50: स तानभिजगामाशु निरुप्यैन्द्रं हविस्तदा । मरुतश्चाभितुष्टाव सूक्तैस्त्विति च त्रिभिः ॥ महश्चिदिति चैवेन्द्रं सहस्रमिति चैतया । निरुप्तं तद्धविश्चैन्द्रं मरुद्भ्यो दातुमिच्छति ॥ विज्ञायावेक्ष्य तद्भावम् इन्द्रो नेति तमब्रवीत् ।
N. 1. 6: न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् । अन्यस्य चित्तमभि संचरेण्यमुताधीतं विनश्यति ॥	Bṛh. D. IV. 50–51: न श्वो नाद्यतनं त्वस्ति वेद कस्तद्यदद्भुतम् ॥ कस्यचित्त्वर्थसंचारे चित्तमेव विनश्यति ।
N. 1. 9: पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति ।	Bṛh. D. II. 90–91: मिताक्षरेषु ग्रन्थेषु पूरणार्थास्त्वनर्थकाः । कमीमिद्विति विज्ञेया ये त्वनेकार्थकाश्च ते ॥
N. 1. 20: तद् यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत् ।	Bṛh. D. I. 18: मन्त्रेऽन्यदैवतेऽन्यानि निगद्यन्तेऽत्र कानिचित् ।
N. 2. 2: अथ तद्धितसमासेष्वेकपर्वसु च... प्रविभज्य निर्ब्रूयात् । दण्ड्यः पुरुषो...दण्डमर्हतीति ।	Bṛh. D. II. 106: विग्रहान्निर्वचः कार्यं समासेष्वपि तद्धिते । प्रविभज्यैव निर्ब्रूयाद् दण्डार्हो दण्ड्य इत्यपि ॥
N. 2. 10: देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शन्तनुः कनीयानभिषेचयांचक्रे ।	Bṛh. D. VII. 155–157: आर्ष्टिषेणस्तु देवापिः कौरव्यश्चैव शन्तनुः । भ्रातरौ कुरुषु त्वेतौ राजपुत्रौ बभूवतुः ॥ ज्येष्ठस्तयोस्तु देवापिः कनीयांश्चैव शन्तनुः । त्वग्दोषी राजपुत्रस्तु ऋष्टिषेणसुतोऽभवत् ॥ राज्येन छन्दयामासुः प्रजाः स्वर्गं गते गुरौ । स मुहूर्तमिव ध्यात्वा प्रजास्ताः प्रत्यभाषत ॥ VIII. 1: न राज्यमहमर्हामि नृपतिर्वोऽस्तु शन्तनुः । तथेत्युक्त्वाभ्यषिञ्चंस्ताः प्रजा राज्याय शन्तनुम् ॥
देवापिस्तपः प्रतिपेदे । ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष ।	VIII. 2–6: ततोऽभिषिक्ते कौरव्ये वनं देवापिराविशत् । न ववर्षाथ पर्जन्यो राज्ये द्वादश वै समाः ॥

THE NIRUKTA.	THE BṚHADDEVATĀ.
तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितः । ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति । स शन्तनुर्देवापिं शिशिक्ष राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति ।	ततोऽभ्यगच्छद्देवापिं प्रजाभिः सह शन्तनुः । प्रसादयामास चैनं तस्मिन्धर्मव्यतिक्रमे ॥ शिशिक्ष चैनं राज्येन प्रजाभिः सहितस्तदा । तमुवाचाथ देवापिः प्रह्वं तु प्राञ्जलिस्थितम् ॥ न राज्यमहमर्हामि त्वग्दोषोपहतेन्द्रियः । याजयिष्यामि ते राजन् वृष्टिकामेज्यया स्वयम् ॥ ततस्तं तु पुरोऽधत्त आर्त्विज्याय स शन्तनुः । स चास्य चक्रे कर्माणि वार्षिकाणि यथाविधि ॥
N. 2. 12: पुरोहितः पुर एनं दधति ।	
N. 2. 17: अहिरयनात् । एत्यन्तरिक्षे । अयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति ।	Bṛh. D. V. 166: अहिराहन्ति मेघान् स एति वा तेषु मध्यमः ।
N. 2. 18: उषाः कस्मात् । उच्छतीति । सत्या रात्रेरपरः कालः ।	Bṛh. D. III. 9: तम उच्छत्युषाः ।
N. 2. 23: तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति ।	Bṛh. D. II. 135–136: सरस्वतीति द्विविधमृक्षु सर्वासु सा स्तुता । नदीवद्देवतावच्च तत्राचार्यस्तु शौनकः । नदीवन्निगमाः षट् ते सप्तमो नेत्युवाच ह ।
N. 2. 24: विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव...स वित्तं गृहीत्वा विपाट्छुतुद्र्योः संभेदमाययौ ।...स विश्वामित्रो नदीस्तुष्टाव गाधा भवतेति । अपि द्विवदपि बहुवत् ।	Bṛh. D. IV. 106; 107: पुरोहितः सन्निज्यार्थं सुदासा सह यन्नृषिः । विपाट्छुतुद्र्योः संभेदं शमित्येते उवाच ह ॥ प्रवादास्तत्र दृश्यन्ते द्विवद्बहुवदेकवत् ।
N. 5. 13: उर्वश्यप्सराः...तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द ।	Bṛh. D. V. 149: तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीम् । रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥
N. 5. 14: सर्वे देवाः पुष्करे त्वाधारयन्त ।	Bṛh. D. V. 155: सर्वत्र पुष्करं तत्र विश्वे देवा अधारयन् ।
N. 6. 5: शकटं शाकिनी गावो जालमस्यन्दनं वनम् । उदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तयः ॥	Bṛh. D. VI. 138: शकटं शाकिनी गावः कृषिरस्यन्दनं वनम् । समुद्रः पर्वतो राजा एवं जीवामहे वयम् ॥
N. 6. 31: करूळती...पूषेति...सोऽदन्तकः । अदन्तकः पूषेति च ब्राह्मणम् ।	Bṛh. D. IV. 139: करूळतीति पूषोक्तोऽदन्तकः स इति श्रुतेः ।
N. 7. 1: यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन्स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति ।	Bṛh. D. I. 6: अर्थमिच्छन्नृषिर्देवं यं यमाहायमस्त्विति । प्राधान्येन स्तुवन्भक्त्या मन्त्रस्तद्देव एव सः ॥
N. 7. 3: एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति ।	Bṛh. D. I. 3: तद्धितांस्तदभिप्रायानृषीणां मन्त्रदृष्टिषु । विज्ञापयति विज्ञानं कर्माणि विविधानि च ॥

THE NIRUKTA.

N. 7. 4: माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते । एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति ।

N. 7. 4: आत्मैवैषां रथो ..आत्मायुधं... आत्मा सर्वं देवस्य ।

N. 7. 5: तिस्र एव देवताः...अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः ।

N. 7. 8: अयं लोकः प्रातःसवनं वसन्तो गायत्री त्रिवृत्स्तोमो रथंतरं साम ये च देवगणाः समाम्नाताः प्रथमे स्थाने ।...अथास्य कर्म वहनं च हविषामावाहनं च देवतानां यच्च किंचिद्दार्ष्टिविषयिकमग्निकर्मैतत् । अथास्य संस्तविका. देवा इन्द्रः सोमो वरुणः पर्जन्य ऋतवः । आग्नावैष्णवं हविर्न त्वृक्संस्तविकी दशतयीषु विद्यते । अथाप्याग्नापौष्णं हविर्न तु संस्तवः ।

N. 7. 10: अन्तरिक्षलोको माध्यंदिनं सवनं ग्रीष्मस्त्रिष्टुप्पञ्चदशस्तोमो बृहत्साम...। अथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च [चिद् Shorter recension] बलकृतिरिन्द्रकर्मैव तत् । अथास्य संस्तविका देवा अग्निः सोमो वरुणः पूषा बृहस्पतिर्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुः । अथापि मित्रो वरुणेन संस्तूयते पूष्णा रुद्रेण च सोमो ऽग्निना [वायुना Shorter recension] च पूषा वातेन च पर्जन्यः ॥

THE BṚHADDEVATĀ.

Bṛh. D. I. 73; 74: तेषामात्मैव तत्सर्वं यद्यद्भक्तिः प्रकीर्त्यते ॥ तेजस्त्वेवायुधं प्राहुर्वाहनं चैव यस्य यत् ॥

Bṛh. IV. 143: आयुधं वाहनं चापि स्तुतौ यस्येह दृश्यते । तमेव तु स्तुतं विद्यात्तस्यात्मा बहुधा हि सः ॥

Bṛh. I. 69: अग्निरस्मिन्नथेन्द्रस्तु मध्यतो वायुरेव च । सूर्यो दिवीति विज्ञेयास्तिस्र एवेह देवताः ॥

Bṛh. D. I. 115–116: लोकोऽयं यच्च वै प्रातःसवनं क्रियते मखे । वसन्तशरदौ चर्तू स्तोमोऽनुष्टुबथो त्रिवृत् ॥ गायत्री चैकविंशश्च यच्च साम रथंतरम् ।

I. 119–120: देवतावाहनं चैव वहनं हविषां तथा ॥ कर्म दृष्टे च यत्किंचिद् विषये परिवर्तते ।

I. 117–118: इन्द्रेण च मरुद्भिश्च सोमेन वरुणेन च । पर्जन्येनर्तुभिश्चैव विष्णुना चास्य संस्तवः ॥ अस्यैवाग्नेस्तु पूष्णा च साम्राज्यं वरुणेन च । देवतामर्थतत्त्वज्ञो मन्त्रैः संयोजयेद्धविः ॥ असंस्तुतस्यापि सतो हविरेकं निरुप्यते ।

Bṛh. D. I. 130–131: छन्दस्त्रिष्टुप् च पङ्क्तिश्च लोकानां मध्यमश्च यः । एतेष्वेवाश्रयो विद्यात् सवनं मध्यमं च यत् ॥ ऋतू च ग्रीष्महेमन्तौ यच्च सामोच्यते बृहत् । शक्करीषु च यद्गीतं नाम्ना तत्साम शाक्करम् ॥

II. 6: रसादानं तु कर्मास्य वृत्रस्य च निबर्हणम् । स्तुतेः प्रभुत्वं सर्वस्य बलस्य निखिला कृतिः ॥

II. 2–5: संस्तुतश्चैव पूष्णा च विष्णुना वरुणेन च । सोमवाय्वग्निकुत्सैश्च ब्रह्मणस्पतिनैव च ॥ बृहतस्पतिना चैव नाम्ना यश्चापि पर्वतः । कासुचित्केचिदित्याहुर्निपाताः स्तुतिषु स्तुताः । मित्रश्च श्रूयते देवो वरुणेन सहासकृत् । रुद्रेण सोमः पूष्णा च पुनः पूषा च वायुना ॥ वातेनैव च पर्जन्यो लक्ष्यतेऽन्यत्र वै क्वचित् ।

The Nirukta.	The Bṛhaddevatā.
N. 7. 11: असौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशस्तोमो वैरूपं साम......चन्द्रमसा वायुना संवत्सरेणेति संस्तवः ।......शरदनुष्टुबेकविंशस्तोमो वैराजं सामेति पृथिव्यायतनानि । हेमन्तः पङ्क्तिस्त्रिणवस्तोमः शाक्वरं सामेत्यन्तरिक्षायतनानि ।	Bṛh. D. II. 13: असौ तृतीयं सवनं लोकः साम च रैवतम् । वैरूपं चैव वर्षाश्च शिशिरोऽथ ऋतुस्तथा ॥ II. 14: त्रयस्त्रिंशश्च यः स्तोमः कृत्या सप्तदशश्च यः । छन्दश्च जगती नाम्ना तथातिछन्दसश्च याः । II. 15: एतस्यैव तु विज्ञेया देवाः संस्तविकास्त्रयः ॥ II. 16: चन्द्रमाश्चैव वायुश्च यं च संवत्सरं विदुः ॥ I. 116: गायत्री चैकविंशश्च यच्च साम रथंतरम् । साध्याः साम च वैराजमाप्त्याश्च वसुभिः सह ॥ cf. I. 131.
N. 7. 13: देवताः...सूक्तभाजः......ऋग्भाजश्च...काश्चिन्निपातभाजः ।	Bṛh. D. I. 17: देवतानामधेयानि मन्त्रेषु त्रिविधानि तु । सूक्तभाञ्ज्यथर्ग्भाञ्जि तथा नैपातिकानि तु ॥
N. 7. 14: अग्निः कस्मात् । अग्रणीर्भवति । अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति संनममानः ।	Bṛh. D. II. 24: जातो यदग्रे भूतानामग्रणीरध्वरे च यत् । नाम्ना संनयते वाङ्गं स्तुतोऽग्निरिति सूरिभिः ॥
N. 7. 18: यस्तु सूक्तं भजते यस्मै हविर्निरुप्यतेऽयमेव सोऽग्निः । निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते ।	Bṛh. D. I. 78: निरुप्यते हविर्यस्मै सूक्तं च भजते च या । सैव तत्र प्रधानं स्यान्न निपातेन या स्तुता ॥
N. 7. 19: जातवेदाः...जातानि वेद । जातानि वैनं विदुः । जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानः ।	Bṛh. D. I. 92: यद्विद्यते हि जातः सञ्जातैर्यद्वात्र विद्यते । II. 30: भूतानि वेद यज्जातो जातवेदाथ कथ्यते । यच्चैष जातविद्योऽभूद्वित्तं जातोऽधिवेत्ति वा ॥ II. 31: विद्यते सर्वभूतैर्हि यद्वा जातः पुनः पुनः ।
N. 7. 23: रोहात्प्रत्यवरोहश्चिकीर्षितस्तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते...तत आगच्छति मध्यस्थाना देवता रुद्रं च मरुतश्च ततोऽग्निमिहस्थानमत्रैव स्तोत्रियं शंसति ।	Bṛh. D. I. 102–103: रोहात्प्रत्यवरोहेण चिकीर्षन्नाग्निमारुतम् । शस्त्रं वैश्वानरीयेण सूक्तेन प्रतिपद्यते ॥ ततस्तु मध्यमस्थाना देवतास्त्वनुशंसति । रुद्रं च मरुतश्चैव स्तोत्रियेऽग्निमिमं पुनः ॥

THE NIRUKTA.	THE BṚHADDEVATĀ.
N. 7. 23: अथापि वैश्वानरीयो द्वादशकपालो भवति।......अथापि छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवति।......अथापि हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवति। cf. 7. 24.	Bṛh. D. II. 16–17: केचित्तु निर्वपन्त्यस्य सौर्यवैश्वानरं हविः ॥ सौर्यवैश्वानरीयं हि तत्सूक्तमिव दृश्यते।
N. 7. 24: आदित्यरश्मयस्ते यदामुतोऽर्वाञ्चः पर्यावर्तन्ते।	Bṛh. D. II. 8–9:...सूर्यस्यैव तु पत्नयः ॥ अमुतोऽर्वाङ्निवर्तन्ते प्रतिलोमास्तदाश्रयाः।
N. 8. 1: द्रविणोदाः कस्मात्। धनं द्रविणमुच्यते...बलं वा द्रविणं...तस्य दाता द्रविणोदाः।	Bṛh. D. II. 25: द्रविणं धनं बलं वापि प्रायच्छयेन कर्मणा। तत्कर्म दृष्ट्वा कुत्सस्तु प्राहैनं द्रविणोदसम् ॥
N. 8. 2: तत्को द्रविणोदाः। इन्द्र इति क्रौष्टुकिः। स बलधनयोर्दातृतमः।..................	Bṛh. D. III. 61: तमाहुरिन्द्रं दातृत्वादेके तु बलवित्तयोः ॥
अयमेवाग्निर्द्रविणोदा इति शाकपूणिः। आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादाः भवन्ति।	Bṛh. D. III. 65: द्रविणोदोऽग्निरेवायं द्रविणोदास्तदोच्यते। आग्नेयेष्वेव दृश्यन्ते प्रवादा द्रविणोदसः ॥
N. 8. 2: अग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह सहसस्पुत्रं सहसः सूनुं सहसो यहुम्।	Bṛh. D. III. 62: जायते च बलेनायं मथ्यत्यृषिभिरध्वरे ॥ III. 64:...दृश्यते सहसो यहो ॥
ऋत्विजोऽत्र द्रविणोदस उच्यन्ते। हविषो दातारस्ते चैनं जनयन्ति। ऋषीणां पुत्रो अधिराज एष इत्यपि निगमो भवति।	Bṛh. D. III. 63–64: हवींषि द्रविणं प्राहुर्हविषो यत्र जायते। दातारश्चर्त्विजस्तेषां द्रविणोदास्ततः स्वयम् ॥ ऋषीणां पुत्र इत्येषाम्...।
N. 8. 3: एष हि वनानां पाता वा पालयिता वा।	Bṛh. D. III. 26: अयं वनानां हि पतिः पाता पालयतीति वा।
N. 8. 5: नपादित्यननन्तरायाः प्रजाया नामधेयम्।	Bṛh. D. II. 27: अनन्तरां प्रजामाहुर्नपादिति कृपण्यवः।
N. 8. 6: नराशंसो यज्ञ इति कात्थक्यः। नरा अस्मिन्नासीनाः शंसन्ति। अग्निरिति शाकपूणिः। नरैः प्रशस्यो भवति।	Bṛh. D. II. 28:...यज्ञे यच्छस्यते नृभिः। स्तुवन्त्याप्रीषु तेनेमं नराशंसं तु कारवः ॥ III. 2–3: नराशंसमिहैके तु अग्निमाहुरथेतरे। नराः शंसन्ति सर्वेऽस्मिन्नासीना इति वाध्वरे ॥ एतमेवाहुरन्येऽग्निं नराशंसोऽध्वरे त्वयम्। नरैः प्रशस्य आसीनैराहुश्चैवर्त्विजो नरः ॥
N. 8. 10: नक्तेति रात्रिनाम। अनक्ति भूतान्यवश्यायेन। अपि वा नक्ताव्यक्तवर्णा।	Bṛh. D. III. 9:...नक्तानक्तीमां हिमबिंदुभिः। अपि वाव्यक्तवर्णेति नञ्पूर्वाञ्चेरिदं भवेत् ॥

THE NIRUKTA.	THE BṚHADDEVATĀ.
N. 8. 13: त्वष्टा तूर्णमश्नुत इति नैरुक्ताः । त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणः ।	Bṛh. D. III. 16: त्विषितस्त्वक्षतेर्वा स्यात्तूर्णमश्नुत एव वा । कर्मसुत्तारणो वेति...॥
N. 8. 14: माध्यमिकस्त्वष्टेत्याहुर्मध्यमे च स्थाने समाम्नातोऽग्निरिति शाकपूणिः ।	Bṛh. D. III. 25: त्वष्टा रूपविकर्ता च योऽसौ माध्यमिके गणे ।
N. 8. 22: तान्येतान्येकादशाप्रीसूक्तानि । तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गार्त्समदमिति नाराशंसवन्ति । मैधातिथं दैर्घतमसं प्रैषिकमित्युभयवन्ति । अतोऽन्यानि तनूनपात्वन्ति ।	Bṛh. D. II. 154–157: अत्रैव प्रैषसूक्तं स्यात्...। तेषां प्रैषगतं सूक्तं यच्च दीर्घतमा जगौ ॥ मेधातिथौ यदुक्तं च त्रीण्येवोभयवन्ति तु । ऋषौ गृत्समदे यच्च वाध्र्यश्वे च यदुच्यते ॥ नराशंसवदत्रेश्च ददर्श च यदौर्वशः । तनूनपादगस्त्यश्च जमदग्निश्च यज्जगौ ॥ मेधातिथेर्ऋचां यास्तु प्रोक्ता द्वादश देवताः ॥
N. 9. 23: मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा संग्रामे व्यवहृत्याजिं जिगाय ।	Bṛh. D. VIII: 12: आजावनेन भार्म्यश्व इन्द्रासोमौ तु मुद्गलः । अजयद्वृषभं युक्त्वा ऐन्द्रं च द्रुघणं रथे ॥
N. 9. 40: शुनासीरौ । शुनो वायुः । शु एत्यन्तरिक्षे । सीर आदित्यः सरणात् ।	Bṛh. D. V. 8: वायुः शुनः सूर्य एवात्र सीरः शुनासीरौ वायुसूर्यौ वदन्ति । शुनासीरं यास्क इन्द्रं तु मेने सूर्येन्द्रौ तौ मन्यते शाकपूणिः ॥
N. 10. 5: यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकम् । यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम् ।	Bṛh. D. II. 34: अरोदीदन्तरिक्षे यद्विद्युद्वृष्टिं ददन्नृणाम् । चतुर्भिर्ऋषिभिस्तेन रुद्र इत्यभिसंस्तुतः ॥
N. 10. 8: इन्द्र इरां दृणाति ।	Bṛh. D. II. 36: इरां दृणाति यत्काले मरुद्भिः सहितोऽम्बरे । रवेण महता युक्तस्तेनेन्द्रमृषयोऽब्रुवन् ॥
N. 10. 10: पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्रार्जयिता वा रसानाम् ।	Bṛh. D. II. 37–38: यदिमां प्रार्जयत्येको रसेनाम्बरजेन गाम् । कालेऽत्रिरौर्वशश्चर्षी तेन पर्जन्यमाहतुः ॥ तर्पयत्येष यल्लोकाञ्जन्यो जनहितश्च यत् । परो जेता जनयिता यद्वामेयस्ततो जगौ ॥
N. 10. 12: ब्रह्मणस्पतिर्ब्रह्मणः पाता ।	Bṛh. D. II. 40: पातारं ब्रह्मणस्तेन शौनहोत्रः स्तुवञ्जगौ ।
N. 10. 27: तार्क्ष्यः...तीर्णेऽन्तरिक्षे क्षियति । तूर्णमर्थं रक्षत्यश्नोतेर्वा ।	Bṛh. D. II. 58: स्तीर्णेऽन्तरिक्षे क्षियति यद्वा तूर्णं क्षरत्यसौ ।...तार्क्ष्यं तेनैवमुक्तवान् ॥
N. 10. 42: देवतानामधेयान्यनुक्रान्तानि । सूक्तभाञ्जि हविर्भाञ्जि ।	Bṛh. D. I. 17: देवतानामधेयानि मन्त्रेषु त्रिविधानि तु । सूक्तभाञ्ज्यथवर्ग्भाञ्जि तथा नैपातिकानि तु ॥

THE NIRUKTA.	THE BṚHADDEVATĀ.
N. 10. 44: योऽहिः स बुध्न्यो बुध्नमन्तरिक्षं तन्निवासात् ।	Bṛh D. V. 166: योऽहिः स बुध्न्यो बुध्ने हि सोऽन्तरिक्षेऽभिजायते ।
N. 11. 5: चन्द्रमाश्चायन्द्रमति । चन्द्रो माता चान्द्रं मानमस्येति वा ।	Bṛh. D. VII. 129 (B): चारु द्रमति वा चायंश्चायनीयो द्रमत्युत ।
N. 11. 6: मृत्युर्मारयतीति सतो मृतं च्यावयतीति वा ।	Bṛh. D. II. 60: यत्तु प्रच्यावयन्नेति घोषेण महता मृतम् । तेन मृत्युमिमं सन्तं स्तौति मृत्युरिति स्वयम् ॥
N. 11. 16: ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः ।	Bṛh. D. III. 83: सुधन्वन आङ्गिरसस्यासन्पुत्रास्त्रयः पुरा । ऋभुर्विभ्वा च वाजश्च शिष्यास्त्वष्टुश्च तेऽभवन् ॥
N. 12. 1: तत् कावश्विनौ । द्यावापृथिव्यावित्येके । अहोरात्रावित्येके । सूर्याचन्द्रमसावित्येके ।	Bṛh. D. VII. 126: सूर्याचन्द्रमसौ तौ हि प्राणापानौ च तौ स्मृतौ । अहोरात्रौ च तावेव स्यातां तावेव रोदसी ॥
N. 12. 14: सूर्यः सर्तेर्वा सुवतेर्वा स्वीर्यतेर्वा ।	Bṛh. D. VII. 128 (B): सूर्यः सरति भूतेषु सु वीरयति तानि वा ।
N. 12. 16: अथ यद्रश्मिपोषं पुष्यति तत्पूषा भवति ।	Bṛh. D. II. 63: पुष्यन् क्षितिं पोषयति प्रणुदन् रश्मिभिस्तमः ।
N. 12. 18: अथ यद्विषितो भवति तद्विष्णुर्भवति । विष्णुर्विशतेर्वा व्यश्नोतेर्वा ।	Bṛh. D. II. 69: विष्णातेर्विशतेर्वा स्याद्वेवेष्टेर्व्याप्तिकर्मणः । विष्णुर्निरुच्यते सूर्यः सर्वं सर्वान्तरश्च यः ॥
N. 12. 25: केशी केशा रश्मयस्तैस्तद्वान्भवति । काशनाद्वा प्रकाशनाद्वा ।	Bṛh. D. II. 65: कृत्वा सायं पृथग्याति भूतेभ्यस्तमसोऽत्यये । प्रकाशं किरणैः कुर्वंस्तेनैनं केशिनं विदुः ॥
N. 12. 27: अथ यद्रश्मिभिरभिप्रकम्पयन्नेति तद्वृषाकपिर्भवति वृषाकम्पनः ।	Bṛh. D. II. 67: वृषैष कपिलो भूत्वा यन्नाकमधिरोहति । वृषाकपिरसौ तेन विश्वस्मादिन्द्र उत्तरः ॥ रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ एव सः ॥
N. 12. 40: यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते ।	Bṛh. D. II. 133: पादं वा यदि वार्धर्चमृचं वा सूक्तमेव वा । वैश्वदेवं वदेत्सर्वं यत्किंचिद्बहुदैवतम् ॥

THE NIRUKTA.	PĀṆINI'S AṢṬĀDHYĀYĪ.
Cf. 1. 3.	I. 4. 83–97.
1. 3: आ इत्यर्वागर्थे ।	I. 4. 89: आङ् मर्यादावचने ।
अभीत्याभिमुख्यम् ।	I. 4. 91: अभिरभागे ।
अति सु इत्यभिपूजितार्थे ।	I. 4. 95: अतिरतिक्रमणे च ।
	I. 4. 94: सुः पूजायाम् ।
अपीति संसर्गम् ।	I. 4. 96: अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ।
उपेत्युपजनम् ।	I. 4. 87: उपोधिके च ।
परीति सर्वतोभावम् ।	I. 4. 88: अपपरी वर्जने ।
अधीत्युपरिभावमैश्वर्यं वा ।	I. 4. 97: अधिरीश्वरे ।
1. 17: परः संनिकर्षः संहिता ।	I. 4. 109: परः संनिकर्षः संहिता ।

THE NIRUKTA.	THE ARTHAS'ĀSTRA OF KAUṬILYA.
N. 1. 1: तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति...	II. 10: 28, p. 72: वर्णसंघातः पदम् । तच्चतुर्विधं नामाख्यातोपसर्गनिपाताश्चेति ।
भावप्रधानमाख्यातम् ।	अविशिष्टलिङ्गमाख्यातं क्रियावाचि ।
सत्त्वप्रधानानि नामानि ।	तत्र नाम सत्त्वाभिधायि ।
